

वैक्रमीयः २०७४
वर्षः ६
अङ्कः २

# प्रेमपारायणम्

## श्रीनिःश्रेयसम् १२

(षाण्मासिकपत्रम्)

सम्पादकः
पंन्यासश्रीसम्यग्दर्शनविजयगणी







वैक्रमीयः २०७४ । वर्षः ६ । अङ्कः २



# प्रेमपारायणम्

## श्रीनिःश्रेयसम् १२

(षाण्मासिकपत्रम्)

**सम्पादकः**
पंन्यासश्रीसम्यग्दर्शनविजयगणी


प्रेमजीवनकला सदने
एकादशसौन्दर्यस्तम्भाः


१) अप्रमत्ततासौन्दर्यम्
२) प्रसन्नतासौन्दर्यम्
३) सहिष्णुतासौन्दर्यम्
४) समर्पिततासौन्दर्यम्
५) नम्रतासौन्दर्यम्
६) सरलतासौन्दर्यम्
७) निर्मायतासौन्दर्यम्
८) समतासौन्दर्यम्
९) जीवरक्षासौन्दर्यम्
१०) विशुद्धिसौन्दर्यम्
११) विरागितासौन्दर्यम्

श्रीनिःश्रेयसषाण्मासिकस्य

प्रेमपारायणविशेषाङ्के

विभिन्नलेखकैर्लिखितेषु

सर्वेषु लेखेषु सर्वांशेन

सम्पादकादिगणः सम्मतोस्तीति

नैव मन्तव्यः।

\- सम्यग्दर्शन वि. गणी



# प्रेम



# प्रेमजीवन सञ्जिवनी लतायाः पञ्चबीजानि

- निस्पृहताबीजम्
- निर्दम्भिताबीजम्
- निर्दोषिताबीजम्
- निर्गुणिताभानबीजम्
- निराभिमानिताबीजम्

श्री प्रेमसूरिं वरदं नमामि.....






# सर्वपर्वमयप्रेम


पूज्यपादाः सिध्दान्तसिन्धवः
विपुल महत्तमकार्यसर्जनपरायणाः
ततः पूज्यपादास्ते.....
• नैकशिष्यसर्जनकराः
• विनयगुणसर्जनकराः
• नैकग्रन्थसर्जनकराः
• ब्रह्मभावसर्जनकराः
• शुद्धचारित्रार्जनकराः
• परार्थभावसर्जनकराः
• अध्यात्मभावसर्जनकराः
• परमार्थसिद्धिसर्जनकराः

# "प्रेम"

## नैकरूपक एक आकरः

- गुणाकरः।
- सिद्धान्ताकरः।
- ज्ञानरत्नाकरः।
- भावरत्नाकरः।
- अध्यात्मभावाकरः।
- पुण्यामृताकरः।





# चित्रसमस्या

सिद्धान्तमहोदधिप्रेमसूरीश्वराः
कर्मगन्थिभेदनार्थं कर्मग्रन्थान्
प्रत्ये सादरं प्रेम दधुः,
अतः कर्मग्रन्थेषु तेषां मतिरतिवगतिवती आसीत्।
अतः कर्मसाहित्यनिष्णातास्ते विविधान् कर्मग्रन्थान् विदधुः।
अतस्तदर्थमियं प्रहेलीका प्रस्तूयते।
अस्मिन् चित्रे जीवानां किंरुपः कर्मविपाकः प्रवर्तते।
इति प्रस्तुतिः प्रकटयतु।
– ततो गिर्वाणगीरायां भवद्भिः
र्दशगद्यपङ्क्तयो लेखनीया प्रेषणीयाय।
तत्तु त्रयोदशमेऽङ्के प्रकाशयिब्यते।

– सम्पादकः

पूज्यपादानां विजय प्रेमसूरीश्वराणां जीवनसङ्गीते

प्रशस्यानेकगुणवाद्यानि ब्रह्मघोषं घोषयन्ति तानि चास्माभिरपि वादनीयानि। येनात्र संयमे





1 निरन्तरचरणामाटो वाद्यते।...2 वेयावच्चकं सतालो योज्यते।...3 समुदायसञ्चालनरूपककच्छभी पुनः पुनः पूर्यते। 4 स्वाध्यायकरम्बेन मोद्यते।...5 गुरुभक्तिकलतालः पुनः पुनः ताड्यते।...6 परमात्मभक्तिकुम्भा धार्यते।

7 सम्पूर्णसंयमभामरी नियोज्यते।...8 निर्भीकमनोभेरी सेव्यते 9 निष्पापतनुप्रवृत्तिपटहो धार्यते। 10 वरवचनगुप्तिघण्टा प्रहार्यते।...11 शुद्धयोगमदङ्गं वाद्यते।...12 गुणगणजातपुण्यमुरजसख्यं कार्यते।

13 भव्यपरलोकमुरवो ध्वन्यते।...14 मोक्षमार्गमग्नतावंसो हन्यते।...15 धर्मरहस्यवरमुरजेन गीयते। 16 धर्मसिद्धिवल्लकि र्स्यते...17 पापमुक्तिवाली स्मर्यते।...18 गुणदृष्टिविचित्रवीणा मुखर्यते।





# प्रेमपारायणम्

19 शुभेद्वलिविपञ्चि र्न वार्यते।...20 सद्भाववीणावाद्यते ...21 सद्गतिसमुत्पत्तिवेणु र्मर्द्यते।...22 दुर्गतिनाशनशङ्खं पूर्यते।...23 कर्महरणसिङ्गं नियोज्यते।...24 सर्वज्ञानहुडुक्कं वाद्यते।...25 प्रवरविज्ञानहोरम्भा हन्यते।...26 प्रथमहाव्रतहुडुक्की योज्यते।...27 शस्यसमितिदुन्दुभिरास्फाल्यते ।

28 द्वाविंशतिपरिषहसहननन्दी सेव्यते।...29 गुणप्रासिभम्भा भर्यते।...30 भावपूर्णताडमरुहेनान्द्यते।...31 उपसर्गसहनानसरो ध्वन्यते।...32 सर्वकष्टनाशककुतुम्बकः पुनः पुनः रच्यते।...33 सम्यग्ध्रप्रदखरमुखी सदैव धार्यते।

34 बोधिबीजगोमुखी न मुच्यते।...35 दुःखक्षयझाञ्झस्ताड्यते।...36 निर्गुणभावझल्लरिः सदैव प्रहार्यते।







॥ णमोत्थुणं समणस्स भगवओ महावीरस्स ॥
॥ ॐ ह्रीँ श्रीशङ्खेश्वरपार्श्वनाथाय नमः॥
॥ पूज्येभ्य आत्म-कमल-वीर-दान-प्रेम-रामचन्द्रसूरिसद्गुरुभ्यो नमः॥
॥ पूज्येभ्यो मुक्तिचन्द्र-महोदय-जयकुञ्जर-मुक्तिप्रभ-सूरिभ्यो नमः॥

# प्रेमपारायणम्

**निमित्तम्**
जैनशासनज्योतिर्धर पू.आ.श्रीविजय**रामचन्द्र**सूरीश्वराणां
दीक्षाशताब्दीवर्षः वैक्रमीयः२०६९

**आशीर्वादप्रदाः**
सुविशालगच्छनायकाः पू.आ.श्रीविजय**पुण्यपाल**सूरीश्वराः
प्रवचनप्रभावकाः पू.आ.श्रीविजय**मुक्तिप्रभ**सूरीश्वराः
वात्सल्यवारिधि पू.पं.श्री**वज्रसेन**विजयगणिवराः

**प्रेरकाः**
प्रसिद्धप्रवचनकाराः पू.आ.श्रीविजय**श्रेयांसप्रभ**सूरीश्वराः
प्रवचनकुशलाः पू.आ.श्रीविजय**हेमप्रभ**सूरीश्वराः

**सम्पादकः**
पूज्य पंन्यासप्रवरः श्री**सम्यग्दर्शन**विजयगणिवरः

**संशोधकः**
अमृतपटेल महोदयः

**प्रकाशनप्रतिष्ठानम् :**
**जगद्गुरू पू.आ.श्रीविजयहीरसूरीश्वरजी**
**श्रुतज्ञानभवनम्**
ए-१, घनश्यामपार्क फ्लेट, १७, आनंदनगर सोसायटी,
त्रिशला फ्लेट के सामने, भट्ठा, पालडी, अहमदाबाद

* प्रतयः - १०००
* मूल्यम् - ₹.

**प्रकाशनम् -**
वि.सं. २०७४,
आषाढकृष्णा चतुर्दशी
शुक्रवारः ई.सं. १०/७/२०१८

**परमगुरुश्रीसूरिरामचन्द्र**
**सप्तविंशतितमं समाधिपर्व**

अनुमोदनम्..... अनुमोदनम्.....अनुमोदनम्.....

प्रेमपारायण

विशेषाङ्कप्रकाशनसद्व्ययलाभार्थिनौ

दमण निवासी

**शेठश्री केसरीचंद मोतीचंद झवेरी परिवारः**

तथा

साचोर निवासी

**ताराचन्दजी बेचरजी बुरड परिवारः**

तथा

मुंबई निवासी

**वर्षिल अशोक छेडाया आत्मश्रेयार्थञ्च**

**अशोक भवानजीभाई छेडा परिवारः**

श्री जगद्गुरु पू.आ.श्री विजय हीरसूरीश्वरजी

श्रुतज्ञानभवनम्

पालडी-अमदावाद सञ्चालक गणः

श्रुतभक्तिकार्यं

पुनः पुनः अनुमोदयति।






# सम्पादकीयम्

ऐन्द्रवन्दितपूजितसेवित
जिनवरचरणसम्यगाचरणधराणामग्रभूताः,
सिद्धान्तमहोदधयः, कर्मसा हित्येऽतीवतीक्षणमतयः, परमाराध्यपादाः प्रेमसूरीश्वराः जगतितले विजयवन्तो वर्तन्ते।

यतस्ते शुद्धजल्पाः शुद्धकल्पाभावाचार्यभगवन्तः सन्ति। कोऽपि चतुर्थारके प्रविष्टमर्होऽयमात्मा केनाऽपि कारणेनाऽत्र पञ्चमारके प्रविष्टः इति मां लगति। तेषां जीवनपद्धतयः, वचनपद्धतयः, पठन पाठननमनपद्धतयः, तपस्त्यागपद्धतयः, संयमाचाराचरणपद्धतयः, सहिष्णुता-समर्पितता-नम्रता-सरलता-निरभिमानिता-निस्पृहिता-भाव-विरागिता-क्षमाभावितता-मृदुताभावितता-सत्यवचननिष्ठा-लब्धावधपरिणाम-प्राप्तनिर्मुक्तिभावादीनि गुणरत्नानि परेषां च परमाश्चर्यभूतानि सन्ति, तानि च कीर्तिमार्गेण द्युभुवं गतानि अतः सुपर्वाणोपि तान् स्तुवन्ति।

ते पूज्याः संयमे परममोदं लभन्ते, चारित्रे निष्ठां विदधति, ज्ञाने रहस्यमाप्नुवन्ति, मनसि मैत्रीभाव प्रफुल्लाः सन्ति, तनूभूतकषायाः, विषयपीडानष्टप्रायाः, गतपरस्पृहाः, अदीनभावाः, शुद्धचित्ताः सन्ति। ततो भगवदाज्ञासङ्गता रत्नत्रयारांधनतत्परा मोक्षमार्गप्रवासिनः विद्यन्ते।

तेषां जीवनावलोकनप्रसङ्गो मम जीवनपथे महोत्सवरूपोऽभवत्। मनश्चकोरचन्द्रपरमाराध्यपाद प्रवचनप्रभावकाचार्यप्रवरश्रीविजयमुक्तिप्रभसूरीश्वरप्रसिद्धप्रवचनकारपूज्यपादाचार्यप्रवरश्रीमद् विजयश्रेयांसप्रभसूरीश्वराभ्यां प्रेरितस्य मम परं परं सौभाग्यम्। येन

चारित्रपरिपूतस्य पुण्यपुरुषस्य जीवनस्योलेखनं संशोधनमपि परं परं चारित्रशुद्धेः कारणं भविष्यति।

अनेन संशोधनेन मया जीवनशैली किंरूपा स्वीकर्तव्या इति ज्ञातम्। किं स्वरूपं चारित्रं सेवनीयम्? गुरुणा सार्धं कथं व्यवहर्तव्यं? चारित्रशुद्ध्यर्थं किं कर्तव्यम्? कथं तस्य शुद्धिः कर्तव्या? गुरुवचनं कथं नोल्लङ्घनीयम्? स्वाध्यायः किंस्वरूपः? स कथं सेवनीयः? तेन च को लाभः? इत्याद्यनेक शङ्कासमाधानसम्प्राप्तसमुल्लासेन धर्मस्य मार्गः समुज्ज्वलः सञ्जातः।

तेषां बुद्धि–प्रतिभा–सौजन्य–समर्पितता–गुणादरादिमौलिकगुणसमृद्धानां गुणपक्ष–पातितायाः का वार्ता?

अन्यदा केनाऽपि सुज्ञेनैकेन प्रश्निताः पूज्यपादाः। ''यथा भगवन्तः! भवतां प्रथमशिष्य परमाराध्यपादाचार्यप्रवरश्रीमद्विजयरामचन्द्रसूरीश्वराणामर्थं भवद्भिः किं कथनीयं? तेषां शासन–शास्त्रनिष्ठाद्यर्थं भवद्भिः किं चिन्त्यते?''

पूज्यपादैश्च प्रोक्तम्– ''शास्त्रसिद्धान्तनिष्ठानां तेषां विषये यद्यहं किमपि वदामि तर्हि भवान्तरे नाऽहं जीह्वां लप्स्ये। ततस्तेषामर्थं न मया किमपि वक्तव्यम्।''

इत्थेवं स्वशिष्यस्यापि गुणावलोकनेन स्पष्टतया वचनोल्लासो यदि प्रवर्तते तर्हि तेषां गुणगरिमा पराकाष्ठां प्राप्ता इति दृश्यते। गुणप्राप्तिः सुलभा किन्तु गुणानुरागस्तु सुदुर्लभः। गुणरागेण गुणं ज्ञात्वा, तस्य निर्मायभावेन सर्वेषामग्रे वक्तव्यं, तद्गुणकीर्त्तनं तु सुतरां दुर्लभमस्ति।

इति प्रस्तुतगुणसम्पन्नानां श्रीमत्प्रेमसूरीश्वराणां समाधिसुवर्णपर्वानुमोदनार्थं 'श्रीनिःश्रेयसम्' षाण्मासिकस्य द्वादशमोङ्कः प्रेमपारायणं श्रीनिःश्रेयसमिति विशेषितं प्रकाश्यते। अत्र चानेके प्रतिकृतयोऽनकेपुस्तादिम्यः सादरं गृहिताः सन्ति, तेषां सम्पादकादीनामुपकारस्मृतिः।

इत्येवं स्थितौ यथा तेजोमूलं सूर्यः, प्रासादमूलं स्तम्भः, शीतलतामूलं चन्दनम्, वृक्षमूलं बीजम्, विनयमूलं विवेकः, तद्वत् सिद्धान्तमहोदधिजीवने सर्वगुणमूलं निस्पृहतानैष्ठिक–ब्रह्मव्रतयुग्ममस्ति। इति मया प्रेमगुरुजीवनावगाहनात् दृष्टम्।

अनेन मम संयमशुद्धि र्भवतु। ब्रह्मव्रतनिष्ठा भवतु। कर्ममर्मविघातकृच्चारित्रं भवतु। निस्पृहभावो भवतु। आत्मोत्थानमार्गो मिलतु। आत्मजागरुकता प्रकटयतु। मोक्षगमनेच्छा सदैव सम्भवतु। भवतरणेच्छा तीव्रतरा भवतु। गुणेषु पक्षपातिता सम्भवतु। दोषा नश्यन्तु। गुणाः प्राप्नुवन्तु।

।। इति शम्।।

प्रसिद्धप्रवचनकार पूज्यपादाचार्य

प्रवरश्रीमद्विजयश्रेयांसप्रभसूरिचरणसेवाहेवाकी

**– पंन्यास सम्यग्दर्शन वि.गणी...**



# क्रमनिर्देशः

## प्रथमो विभागः

पृष्ठाङ्क......





| विषयः | लेखकादयः | पृष्ठः |
|---|---|---|
| पूर्णं प्रेमगुरुं स्तुवे | आचार्यश्रीविजयपूर्णचन्द्रसूरिः | 002 |
| यावच्चन्द्र-दिवाकरौ जयतु सः श्रीप्रेमसूरीश्वरः | गच्छाधिपति आचार्यश्रीविजयपुण्यपालसूरिः | 006 |
| श्रीप्रेमशतकम् | आचार्यश्रीविजयमुक्तिप्रभसूरिः | 014 |
| सिद्धान्तमहोदधिस्तुत्यष्टकम् | आचार्यश्रीविजयमुक्तिप्रभसूरिः | 032 |


## द्वितीयो विभागः

पृष्ठाङ्क......





| विषयः | लेखकादयः | पृष्ठः |
|---|---|---|
| प्रेमसूरिस्तु मङ्गलम् | पंन्यासप्रवरश्रीवज्रसेनविजयो गणी | 036 |
| आचारविचारविशुद्धाः परमगुरुदेवाः | आचार्यश्रीविजयश्रेयांसप्रभसूरिः | 038 |
| आह्वानप्रत्यादाता... | आचार्यश्रीविजयरत्नसुन्दरसूरिः | 042 |
| 'प्रेम' जीवनोपवनम् | आचार्यश्रीविजययोगतिलकसूरिः | 044 |
| श्रीप्रेमचरणे शब्दकुसुमाञ्जलिः | पंन्यासश्रीमोक्षरतिविजयो गणी | 046 |

## तृतीयो विभागः
पृष्ठाङ्क......





| विषयः | लेखकादयः | पृष्ठः |
|---|---|---|
| प्रेमसूरीशगुणपद्मानि | रत्नबोधिविजयो मुनिः | 050 |
| श्रीप्रेमसूरिवरो गुणमूर्त्तिः | दर्शनरक्षितविजयो मुनिः | 079 |


## चतुर्थो विभागः
पृष्ठाङ्क......





| विषयः | लेखकादयः | पृष्ठः |
|---|---|---|
| सूरिश्रीप्रेमस्तुत्यनुवादः | ज्ञानभूषणविजयो मुनिः | 094 |
| अहो वचनसिद्धिः | प्रशमरक्षितविजयो मुनिः | 096 |
| ''नमो प्रेमसूरीश्वरं'' | देवाङ्गरत्नविजयो मुनिः | 098 |
| प्रेमषोडशकः | दिव्यदर्शनविजयो मुनि | 100 |
| निष्परिग्रहः प्रेमविजयः | आचार्यश्रीविजयरत्नसञ्चयसूरिशिशुः | 102 |
| प्रेमसूरीश्वरं स्तुवे | देवाङ्गरत्नविजयो मुनिः | 103 |
| सूरिप्रेमगुणगेयम् | रैवतभूषणविजयो मुनिः | 104 |
| नमो पेमसूरिवराणं (प्राकृतः) | क्षेमरत्नविजयो मुनिः | 106 |
| गुणनिधीनां गुणस्मरणम् | अक्षयरत्नविजयो मुनिः | 108 |
| विरलतमा महापुरुषाः | प्रियङ्करप्रभविजयो मुनिः | 110 |
| श्रीप्रेमसूरीश्वरमहाराजपञ्चाशिका | आगमरक्षितविजयो मुनिः | 112 |
| ज्ञानगर्भितवैराग्यवान् | निसर्गप्रभविजयो मुनिः | 117 |
| श्रीप्रेमसूरेः संयममन्दिरम् | पुण्यश्रमणविजयो गणी | 118 |
| चारित्रमहोदधिश्रीप्रेमसूरीश्वराः | आत्मदर्शनविजयो मुनिः | 120 |

## पञ्चमो विभागः

पृष्ठाङ्क......





| विषयः | लेखकादयः | पृष्ठः |
|---|---|---|
| षट्कारकैः प्रेमसूरिस्तवना | साध्वीश्रीविरागदर्शनाश्रीः | 124 |
| प्रेमपीयुषोद्गार | साध्वीश्रीविरागदर्शनाश्रीः | 127 |
| सङ्क्रमकरणग्रन्थांशः | साध्वीश्रीविरागदर्शनाश्रीः | 128 |
| श्रीप्रेमसूरिस्तवनाष्टकम् | साध्वीश्रीचिन्तनप्रियाश्रीः | 132 |
| श्रीप्रेमसूरिस्तुत्यष्टकम् | साध्वीश्रीव्रतरक्षिताश्रीः | 133 |
| सन्तः साश्चर्यचर्याः | साध्वीश्रीकुलरत्नाश्रीः | 135 |
| सद्गुरुभ्यो नमः | साध्वीश्रीकुलचन्द्राश्रीः | 136 |
| मधुरमसमञ्जसम् | श्रेयःपदहेवाकी | 138 |
| समाधिवाञ्छा | मुक्तिपूर्णताप्रार्थी | 140 |
| गुरुरिति किम्? | जिनपदप्रार्थी | 141 |
| श्रीप्रेमसूरिगुरुवराष्टकम् | साध्वीश्रीश्रेयःपूर्णाश्रीः | 142 |
| प्रेमवचनामृतम् | साध्वीश्रीसिद्धिश्रेयाश्रीः | 144 |
| श्रीगुरुवराः प्रेमसूरीश्वराः | साध्वीश्रीश्रेयःपूर्णाश्रीः | 146 |
| रत्नपरीक्षणेऽद्भुता शक्तिः | साध्वीश्रीदर्शनपूर्णाश्रीः | 148 |


## षष्ठो विभागः

पृष्ठाङ्क......





| विषयः | लेखकादयः | पृष्ठः |
|---|---|---|
| स्वचिन्ता गरीयसी परचिन्ता लघीयसी | श्रेयःसरित् | 152 |
| स्वाध्यायप्रदीपप्रकाशः | श्रेयःपद्मः | 154 |
| गुणपञ्चकम् | श्रेयःसेतुः | 156 |

| विषयः | लेखकादयः | पृष्ठः |
|---|---|---|
| प्रेमशब्दस्तवना | श्रेयःसद्मा | 158 |
| निर्दोषसंयमप्रेम | श्रेयःसखा | 160 |
| प्रेमगुरुः | श्रेयःपुण्यः | 161 |
| ब्रह्मव्रतस्य सम्यग्धारणं संरक्षणं च | श्रेयोदर्शी | 162 |
| प्रकृष्टतरानासक्तयोगिता | श्रेयःपथिकः | 163 |
| चरित्रं प्रति नवधाभक्तिः | श्रेयःपाथेयः | 164 |
| मोदनमनुमोदनम् | श्रेयःपथः | 166 |
| प्रेमप्रबन्धः | श्रेयस्करः | 170 |
| शुद्धम्... सिद्धिप्रदम्... शुभावहम्... | श्रेयःश्रीः | 176 |
| चारित्रचन्द्रोदयः | श्रेयोमतिः | 179 |
| बुद्धिपीयूषप्राकट्यम् | श्रेयःकान्तः | 180 |


## सप्तमो विभागः




पृष्ठाङ्क......


| विषयः | लेखकादयः | पृष्ठः |
|---|---|---|
| जयतु वरगुरुः... | अमृतपटेलः | 190 |
| आत्मप्रेमौपम्यम् | अमृतपटेलः | 192 |
| अमृतानुवादः | अमृतपटेलः | 194 |


## अष्टमो विभागः




पृष्ठाङ्क......


| विषयः | लेखकादयः | पृष्ठः |
|---|---|---|
| ।। काव्यप्रतिभाविष्कारः।। | | 204 |



सिद्धान्तमहोदधिपूज्यपादाचार्यप्रवराः
श्रीमद्विजयप्रेमसूरीश्वराः सदैव विजयतेतराम्

जैनशासनज्योतिर्धर पूज्यपादाचार्य
प्रवराः श्रीमद्विजयरामचन्द्रसूरीश्वराः
सदैव प्रमोदतेतराम्।



# प्रथमो विभागः



हस्तामलकवत्
प्रचुरनिर्मलतागुणसमन्वितं
पूज्यपादप्रवरं
प्रेमसूरीश्वरं सततं वन्दे



जलवत्पवित्रतां शैत्यतां
निर्मलतां धारयतां-शुद्धिकृतां-अशुद्धिहृतां
पारदर्शकस्वभाववतां पूज्यपादाचार्यप्रवराणां

## प्रेमपारायणाभिधे श्रीनिःश्रेयसे
## पयः पवित्रतापूर्णाभिधः प्रथमो विभागः

| पयः | प्रेमसूरीश्वराः |
|---|---|
| • पवित्रमस्ति। | • प्रवरगुणपवित्रतां धारयन्ति। |
| • शैत्यगुणं विदधाति। | • समताभावशीतलाः सन्ति। |
| • उष्णत्वे प्राप्तेऽपि सद्यः शीतलतां धारयति। | • कोपावसरेऽपि सद्यः समताभावं धारयन्ति। |
| • नैर्मल्यं वितरति। | • चारित्रनिर्मलतां साक्षात् कुर्वन्ति। |
| • शुद्धिं विदधाति। | • स्वात्मस्वभावशुद्धिं जनयन्ति। |
| • अशुद्धिमपहरति। | • स्वात्मदोषं निराकुर्वन्ति। |
| • पारदर्शकमस्ति। | • स्फटिकवत् पारदर्शिहृदयस्य स्वामिनः सन्ति। |
| • स्वस्वभावं न त्यजति। | • शीलस्वभाववन्तः सन्ति। |



# पूर्ण प्रेम गुरुं स्तुवे



– *आचार्यश्रीविजयपूर्णचन्द्रसूरिः

## १) स्तुत्यं जीवितव्यं

एकोऽनन्यः साधुपुरुषः साधुपौरुषमण्डितः आसीत्, सोऽद्य सद्यः स्मृतिक्षितौ जीवन्निव दरीदृश्यते। यः श्रीचतुर्विधसङ्घस्य श्रमणगणस्य च क्षेमकुशलं योग-क्षेमं च वोढुं सततं सचिन्त-चेतस्का आसन्। तस्मात् स्मृतिचित्रान्नेत्रपटलयोः प्रेमसूरिवराणां सुस्मिता मुखमुद्रा समुद्-रा समुल्लसति। ये सूरिवराः कर्मसाहित्यग्रन्थनिर्माणसूत्रधारा आसन्, चारित्रवद्गणेषु चक्रवर्तिनोऽवर्तन्त। तेषां निखिलं जीवनमस्मादृशां मनसो गीतोत्थानाय सोपानीयते।

**विश्वकोणनिभे जातस्त्वं मरौ पिण्डवाडके।**
**विश्वं कोणीकृतं भाभिस्तव शिष्यै र्गणाधिप!।**

येषां मनसि न मानलिप्सा, न चापमानगदचिकित्सा, किन्तु सततं शासनस्यैव चिन्ता, इत्याद्यनेकानेकविशेषतायाः गुणाकाराकारं देहतो वामनं किन्तु आत्मतोऽभिरामं व्यक्तित्वं दीपयन्तः श्रीमन्तः प्रेमसूरिवरमहाराजाः सन्ति।

सिद्धान्तमहोदधीनां प्रेमसूरीश्वराणां स्वर्गारोहणस्य सुवर्णवर्षौ जैनसङ्घेषु हर्षं वर्षन् महोत्सवं विधातुमुत्साहं प्रवर्धयति। अतोऽवसरमाप्त्वा तेषां या जैनसङ्घोपकारिता, सहजं सरलं विरलं यच्च जीवितमस्मादृशां जीवनादर्शरूपमासीद्, यया च चारित्र्य-सङ्कल्प-वात्सल्यानां शक्ति-त्रय्या यैरति कठोरतमानि शासनकार्याण्यपि साफल्यमश्चितानि विहितानि-इत्यत्र न काप्यतिशयोक्तिः।

---

* पू.आ.श्री विजय रामचन्द्रसूरि समुदायः

## २) कर्मग्रन्थग्रथनम्

जैनदर्शनस्य मूलमहत्तामाप्तानां कर्मसाहित्यग्रन्थानां सर्जन-संरक्षण-निर्माणार्थं निजमनोगतं शुभभावं साकारं विधातुं गङ्गावतारार्थं भगीरथ इव तेषां पूज्याचार्यवर्याणां पुरुषार्थोऽहोभावाश्रुभिः सर्वेषामक्षीणि सदार्द्राणि करिष्यति।

## ३) वात्सल्यसुधा

वात्सल्यसुधासिक्तचेतसां तेषां करकमलमपि वरदं चित्रकृदासीत्। कस्यचिन्मस्तके संस्पृशन् पाणिस्तस्य चेतसि वैराग्यामृतं वर्षति, वैराग्यवृद्ध्या च व्रतितामाधातुत्साहं वर्धयति। तथा तदैव वात्सल्यपाथेयामादाय काऽपि यतिसन्ततिस्तेषां वात्सल्यवरं सत्यापयति।

'गुरोस्तु मौनं व्याख्यानं शिष्याश्च च्छिन्नसंशया' इत्युक्तिं चरितार्थीकुर्वतां तेषां सुविशालः शिष्यवर्गः। विना प्रवचनमपि वचनमात्रादपि प्रतिबोधं प्रापयति। इत्यतुल्या वरदायिनी तेषां सत्वशक्तिः सर्वेषां स्मृतिं प्रवाहयिष्यति।

तत्रानुपममुदाहरणं रजोहरणवरदायी, शासनप्रभावनैकमहस्वी व्याख्यानवाचस्पतिः परमाराध्यपादआचार्यदेवेन्द्रः श्रीरामचन्द्रसूरीश्वर आसीत्, तथा तद्वदनेकशासनप्रभावकाः शिष्य-प्रशिष्यास्तेषां 'प्रेमनाम' सफलयन्तो वसुधायां संयमसुधां वर्षयन्तो विचरन्ति।

## ४) जन्माद्या निरवद्याः प्रसङ्गाः

**जन्म**-विक्रमस्य गगन-वेद-निधि नभोऽब्दे (१९४७) फाल्गुनशुक्लचतुर्दश्यां तिथौ मङ्गले पले नान्दियाग्रामे पूज्यानां जन्माऽभवन्, प्रेम्णा सत्वसुधां वसुधायां वृष्ट्वा सत्त्वसञ्चयमाश्वासयिष्यति इति तेषाममृतोपमभिधानं व्यधायि 'प्रेमचन्द' इति,

**व्रतग्रहणं**- मरुधरे वारिवाहमिव संयमस्य संयोगश्चातीव दुर्लभतरोऽस्ति', तथा व्रतग्रहणे शशिनि राहुग्रहणमिव विघ्नव्रततिं विदार्य तीव्रतरेण भावेन मनसाभिलषितं संयमजीवितं पादलेपापगमनपयसीव पादलिप्तपुरे विक्रमसंवति सप्तर्षि-महाव्रत-निधि सुधाकरे (१९५७) कार्तिककृष्णपञ्चमीतिथौ संप्राप्तं, तदर्थं यत्साहसमनुष्ठितं, तत् तु कस्यचिदेव भव्यजनस्य जीवने दृश्यते।









**ज्ञानार्जनं**- तदनु सकलागमरहस्यवेदिश्रीमद्दान-सूरिवरगुरोः सान्निध्ये यतिशिक्षा प्राप्ता, ज्ञानं च ससद्ध्यानं, साध्वाचारश्चातीव साधुराचारः, स दिवसनिशं कर्मप्रकृति-नामकातिकठिनकर्मविषयकग्रन्थस्य चिन्तनं मननं च, निजप्रज्ञाप्रकाशेन निजकर्मणां प्राक्कृततम इव कर्म-प्रकृतिग्रन्थः सप्रकाशमानीतः, ततश्च कर्मप्रकृतिग्रन्था-ध्ययनं पुनरुज्जीवितमभवत्।

**पदव्यः**- परमपूज्यानां गुरुदेवैः स्वीयवरदकरसरोजै र्गणिपदं पंन्यासपदमुपाध्यापदं च प्रदाय, मुनिश्री प्रेम-विजयोऽनीहमानोऽपि राजधन्यपुरे मुनिराजावलीधन्यपुरे विक्रमार्क-विधु-निधि-निधि-विधु (१९९१) वत्सरे परमेष्ठिनां तृतीये सूरिवरपदे प्रतिष्ठितः, तदा च महामहमये क्षणे प्रेमसूरिवराणा-मनन्य-ज्ञानोपासनया प्रसन्ना गुरुवर्याः। 'सिद्धान्तमहोदधिः' इति पदेन च तेऽभिषिक्ताः।

## ५) वैयावृत्यमादि

ततश्च तस्मान्महोदधेरनवरतं प्रादुर्भूतानां संयमसाधना-सिद्धान्तरक्षा-वैयावृत्यपीयूषधारेतिसरिद्वराणां सङ्ग-मीभूतास्ते भवन् अहो यतो यतिपतेः समुद्भूतास्ताः सरि-द्वरास्तत्रैव-तिरोभूताः तदैव तदेव महच्चित्रं यत् महोदधे गङ्गा-यमुना-सरस्वती-सरित्त्रिकं समजायत। सर्वदैव तेषां महाव्रतमहीधराणां परिसरे वैयावृत्यस्य परितोषः, संयमपद्माकरस्य सुवासः, मनोभवने च सरस्वत्या निवास आसीत्, एवमपि तेषां जीवनं त्रिवर्गसंसाधनमासीत्।

## ६) समाधिमरणम्

जीवनस्यान्तिमेषु वर्षेषु 'नाऽत्रास्माकमपनोदायासो भविष्यति' इति मन्वाना इव गदाः समुदः समागताः, तान् मित्रवन्मन्यमानाः पूज्यप्रेमाचार्यवर्याः सहर्षं सस्वागतं स्वी-चक्रुः। एवं अस्य मानुष्यभवस्य चतुरशीतितमवर्षं संयम-जीवितज्योतिर्वारणसमीरणायमानमभवत्। विक्रमस्य वेद-नयन-नभो-नयन (२०२४) तमं वर्षमस्ति। वैशाख-कृष्णपक्षैकादशीतिथिरस्ति। पापवारिधिस्तम्भनाय गिरि-समं स्तम्भनपार्श्वप्रभुमहिमान्वितं स्तम्भनपुरमस्ति।

JAL PANI NIR NEER WATER प्रथमो विभागः

तदा निजगुरुवराणां देहाऽस्वास्थ्यवृत्तमाकर्ण्य, तेषां ज्ञानमूर्तीनां संयममूर्तीनां ब्रह्ममूर्तीनां ब्रह्मवासितसिततरचेतसां दर्शनकामाः, प्रेमपट्टाचलादिमादित्याः प्रवचनपीयूषवर्षिणः व्याख्यानवाचस्पतयः सूरिरामचन्द्राः गुरुसमाधये निस्तन्द्राः मुम्बापुरीतः सततं विहारमादृत्य स्तम्भननगरमासादिवन्तः, प्रेमसूरिवरगुरूणां दृष्टिपातमाप्तुमेव तेषां समीप एवाऽऽसनस्थितिं विधाय तिष्ठन्त आसन्। श्रीप्रेमसूरिवराणां व्याधिवेदनाऽधिका समभवन्, तदा तत्रस्थाः सकला व्रतिन संगत्यैकत्रीभूताः।

श्रीरामचन्द्राचार्याः नमस्कारमहामन्त्रमश्रावयन्, सर्वे चान्येमनुयस्तत्समयमेव तत्सममेव नमस्कारमहामन्त्रं सघोषं समधुरालापं घोषयन्त आसन्, तदा चतुर्विधं सङ्घं क्षमापयन्तः नमस्कारमहामन्त्रं श्रुण्वन्तः समाधिसुधासमुद्रगाहमानमानसाः, वीर..... वीर.... इति शुभोद्गारपूर्वकं ससंयमं यमराज-क्रूरकटाक्ष-निरीक्षिता, श्रीमन्तः प्रेमसूरिवराः मुक्तिनगरीमाप्तुं मध्यमविरामस्थानमगमत्। ते प्रेमसूरिवराः ब्रह्ममयचेतस्काः, ज्ञानमयमानसा, आगमाभङ्गोपासकाः, व्रतविघ्नावारणनिवारणवज्रायमानाः, सङ्कमण - करण - मार्गणाद्वाराख्यौ महाग्रन्थौ निर्माय निर्मायास्ते तपगच्छे स्वच्छं विशालं साधुसङ्घं संसृज्य स्वं प्रेमनाम स्वं संयमधाम सफलं सकलं चाकुर्वन्, कलिकाले विकरालवासनाविषैर्विकारविषमे जीवितव्ये सूरिप्रेम एव मारमार्गणौघसन्नाहीयते। तन्नाम एव मारविषविकारापनोदाय विषवैद्यायते।



प्रान्ते-

❊ अमृतानुवादः ❊

कामनिशातबाणेषु ब्रह्मवर्म दृढं धृतम्।
कामनिशातमश्चन्द्रं पूर्णं प्रेमगुरुं स्तुवे।।



# यावच्चन्द्र–दिवाकरौ जयतु सः

# श्रीप्रेमसूरीश्वरः

– *गच्छाधिपति आचार्यश्रीविजयपुण्यपालसूरिः

त्राता योऽस्मिन् सुरेन्द्रै र्मनुजपतिगणैः पूज्यमानोऽतिभक्त्या
विश्वे देवाधिदेवो विशदगुणनिधि र्ध्वस्तमोहः स्वशक्त्या।
कुष्टातङ्कस्य पीडाऽभयसुरसुधियः संव्यनाशि स्वशक्त्या।
भूयास्सः 'स्थंभनाख्यो' द्विचरमजिनपो गोचरो मे प्रणत्याः 'स्रग्धरा' ॥१॥

मिथ्यात्व–ध्वान्तचक्रोद्भवकुमतगजे केशरिक्रूरदृष्टे!
विश्वाम्भोजैकभानु–श्रमणमतमृताबिन्दुरुक्सौम्यदृष्टे!
अर्हद्वक्त्राब्जभूते! हरतु मम तमो! विश्वविख्यातकीर्ते!
वीणाङ्के! वाग्! भवाब्धौ 'भवविरहवरं' देहि मह्यं भवार्त्तेः 'स्रग्धरा' ॥२॥

बाल्ये सिद्धान्तवार्धेरतिशयमथनात् प्राप्तनिर्वेदरत्नस्–
तारुण्ये दुर्जयाक्ष–द्विपततिदलने केशरी बद्धयत्नः।
वार्धक्येऽप्यप्रमत्तः स्फुरदुरुरुचिरद्युत् सुचारित्ररत्नो
योऽराजद् विश्वविश्वे चरणगुणनिधिव्योम्नि राजद्द्युरत्नः 'स्रग्धरा' ॥३॥

दूरापास्तसमस्तदोषमुनिपैः संसेव्यपादद्वयो–
यस्यान्तःकरणे व्यभाच्च सततं श्रीवीर–दानद्वयम्।
विश्वानन्दविधायि–तायि–वसुधालङ्कारहारोपमो–
मोहावेगविषोर्मिमूर्च्छितजने पीयूषधारोपमः शा.वि. ॥४॥

* पू.आ.श्री रामचन्द्रसूरि समुदायः

येनाऽपश्चिमशासने व्रतिततौ शार्दूलविक्रीडितम्
चारित्रे विलसद्क्षमादिक-गुणैः शार्दूलविक्रीडितम्।
हृद्रोगादिगणैर्यदीयसुतनौ शार्दूलविक्रीडितम्।
संसारोद्भवरागदन्तिदलने शार्दूलविक्रीडतम् शा.वि. ।।५।।

मर्त्यामर्त्य-सुदुर्जये रतिपतौ यो नीलकण्ठायते
विश्वेऽसङ्ख्यगुणाप्त-भूतिवसुतो यो नीलकण्ठायते।
पीताऽऽपत्तिविषोऽपि फुल्लवदनो यो नीलकण्ठायत-
आज्ञामर्त्यनदीं जिनस्य विवहन् यो नीलकण्ठायते शा.वि.।।६।।

जाड्यान्धस्य विनाशने तनुभृतां यः पद्मपाणीयते
पूर्वोपार्जितपङ्कशोषणविधौ यः पद्मपाणीयते।
साधुत्वप्रतिपक्षदैत्यहनने यश्चक्रपाणीयत-
एश्वर्याद् भुवि सूरिराजनिचये यश्चक्रपाणीयते शा.वि.।।७।।

मित्रामित्रजने कृपामृतकरैर्विश्वे शशाङ्कायते,
यो धर्मस्यैव निषेवन्नाञ्जनहिते यः सद्वृषाङ्कायते-
यः सूरीन्दुरजातशत्रुरवनौ ख्यातो विपक्षोज्वलो,
बह्माख्यानलकुण्डदग्धविषयासक्तिः सुवर्णोज्वलः शा.वि.।।८।।

एतद्भारतभूमिसुव्रतिपतिर्यः कल्पसालायते
भव्यानां हृदयेऽतिनिर्मलतरे यः पद्ममालायते।
उद्यन्मोहमहानलेऽत्र भुवने यो मेघमालायते
धात्र्यां प्राज्यगुणोत्तमस्य सुधियां मौलीषु मालायते शा.वि.।।९।।

दीपाः कोटिमितान् यथा गृहमणीन् प्रज्वालयन्ति क्षितौ
पथ्यापथ्यविपाकवस्तुविचयं संसूचयन्ति क्षितौ।
यस्माद् दीप्तदशेन्धनाः सुमुनयः संदर्शयन्ति क्षितौ
तत्त्वातत्त्वगणं तथाऽव्ययपदं संव्याहरन्ति क्षितौ शा.वि.।।१०।।

कर्मग्रन्थविचार सुनिपुणः सिद्धान्तपाथोनिधिर्-
विश्वैकाहितमोहमल्लविजयी कारुण्य-वारांनिधिः।
सूरीशस्सततोदयर्षिगणभृद् विश्वे गुणाधीश्वरो-
'यावच्चन्द्र-दिवाकरौ जयतु स श्री प्रेमसूरीश्वरः' 'नवभिःकलापकम्'।।११।।

अथ गीर्वाणगिरौ गद्यनृत्येन गुणमणिं श्रमणेश्वरं स्तौमिआकरो गुणरत्नानाम्, धौरेयो धर्माराध-नप्रवणमुनिमतल्लिकानां, अलङ्कारस्त्रिभुवनजनानाम्, पीयूषभानुर्भीषणतमभवभयभीतभव्यौघ-कुमुदवनाय, सहस्त्रभानुर्जाड्य-तमोभरक्षपणाय, रज्जुर्भयानक क्रोध-मान-माया-लोभ-मद-मत्सर-नक्रचक्र-मत्स्यपुच्छाच्छोटोल्लसित-भीषणकल्लोलभवाब्धिनिपतज्जन्तुजातोद्धरणाय, अशेषसुरासुरमत्यमानमर्दकमत्स्यकेतुमदभञ्जकः, सुविशाल-सुविहित-साधुमनोरञ्जकः, विश्व-विश्वोपकारकः, समस्तदुरितचक्रोपघातकः, कृतानेकाऽञ्जन-शलाकोपधानोद्यापन-प्रतिष्ठापन-प्रव्रज्याप्रदानादिशासनकर्मा, विश्वैकवीराप्रतिहतामोघशस्त्रमोघीकरणधृत-ब्रह्मवर्मा, चित्तैकधर्म-कर्मा, गुणानन्द्यशेष-भव्यभविकः, सुरेन्द्र-नरेन्द्रमौलिमालाघृष्ट-पादा-रविन्द-त्रिभुवनजन-हृदानन्दि-निजानन्दि-भवाऽनभिनन्दि-जनााभिनन्दि-त्रिभुवनाधिपस्य स्व-शिरसा समभ्यर्चि-तशासनः, व्यपगतविषयविषावेगजनित-कुवासनः सूरिचक्रसुरविसर-वज्रपाणिः, ''श्रीमद्विजय-प्रेमसूरीश्वरो बभूव''

अयि! कथं वर्ण्यते अल्पबुद्धिविभवेन जाड्यतमोभरमुद्रितलोचनयुगलेन विवेकविकलेन प्राज्ञचक्रेणानुपदं हास्यास्पदेनाज्ञजनावतंसेन मादृशेन मधुरसम्भाषणस्वायत्तीकृतजनसन्दोहस्-वान्तानां, जङ्गमकल्पवृक्षाणाम्, तपोगच्छगगन-गगनाध्वगानाम्, स्वपरानेकवाङ्मयापारपारा-वारपाथसां पारङ्गामिनाम्, त्रिभुवनजनजेगीयमानयशोभराणाम्, सिद्धान्तमहोदधीत्युपमालङ्-कृतात्मनाम् च, गुणसन्दोहम्, प्रोक्तं यद् 'हीरसौभाग्यमहाकाव्ये' -

'यो वालुका हैमवती प्रतीरे, प्रमाति सङ्ख्याति च विप्रुषोऽब्धेः।
ताराः पुनः पारयति प्रमातुं गुणान् गणेन्दोर्गणयेन्न सोऽपि।।१।।

गङ्गायास्तीरोपवर्तीवालुकाः कदाचित् कोऽपि ना देवानुभावात् प्रमाति, अपारपारावारपाथसां बिन्दुगणनायापि कोऽपि पुमान् सुमनसां सत्प्रभावात् समर्थः संभवेत्, अनन्तावकाशाकाशावाप्ता-वकाशतारकाणां गणमपि गणयितुं यस्य सुकरं भवेत्, सर्वसत्वसत्वाकर्षिततविषसदनप्रसादात्, तत् सर्वमपि शक्यं तथापि तत्तत्सुदुष्करकार्यकरणलब्धस्फारयशश्चक्रैर्मर्त्यचक्रैर्जगज्जीवन-जीवातोरगण्यवचोऽतीतोपकारकृतः, सूरीश्वरस्य गुणरत्नगणना सुदुष्करा एव.

क्व मेरुः क्वः सर्षपसदृशोऽहं, क्व गुणरत्नप्रभापटलखण्डखण्डीकृततमोभरद्युतिद्योतितदि-क्चक्रवालप्रचण्डरुक् सूरिशेखरः, क्व च खद्योतपोताभोऽहं अज्ञानतमोभरमुद्रितलोचनः, क्व स्फुरत्फक्किकोपहसितसुराचार्यसुमतिवैभव-काव्यकलाकलापकुशल-कुमुत्कविततिसमज्या-वाप्तयशश्चक्रैः कविचक्रैरगोचरं सूरिसरित्पतेश्च चरित्रम्, क्व च मे तनुप्रकाशा शेमुषी।



हास्यास्पदभूतोऽयं मे प्रयासः, 'यतनीयं सर्वैरपि स्वबुध्यनुसारेण गुर्वादिकानां गुणकथायाम्' इत्युक्त्यनुसारेणाहं प्रयते, भक्तिश्च मां मुखरीकरोति गौरवसम्भारस्यामरगुरुः प्रतिहतो यस्य गुणगणवदने, किं नाकिप्रदत्तवरात् पङ्गुरपि सुपर्वगिरौ न खेलायति? तथैव मातृमुखोऽप्यहं प्रेमपाथोनिधेः परमप्रभावात् प्रभुर्भविष्यामि निश्चयेन प्रेममुनीशस्य गुणगाने।

परमब्रह्ममग्नात्मनीनां, कारुण्यवैराग्यमूर्तिमतां, पवित्रपुण्यपुञ्जानां, अनन्तगुणरत्नानां, विश्वविश्वैक-धनपरब्रह्मगुणरत्नरोहणाचलानां सूरीश्वराणाम्, आत्मनि बहवः गुणाः दृश्यन्ते तथापि एकगुणस्त्वतीवसुन्दरः प्रशस्यतमः श्लाघनीयो वर्तते यं गुणं विना संसारचारके जीवचक्रो बम्भ्रमीति,

दृश्यन्तेऽधुना ऐदंयुगीना जीवास्त्वनार्यविद्यापठनप्रभावादनार्यजनसंसर्गवशाच्च धनकलत्रपु-त्रादिप्राप्तिगवेषणापरायमाणमनस, उद्भटवेशविभूषाविदूषकायमाणाः ज्वलदनलोपमविषयदवद-ग्धचेतस्काः कुवासनावासितान्तःकरणा दृष्टाऽदृष्टेन्द्रियार्थेषु धावमानाक्षाः, प्रतिपदं रागद्वेषमहासु-भटाभ्यां सगलग्रहाः, दुराग्रहाः विषयग्रथिलाः विवेकविज्ञानचक्षुर्विकलाः, विषयविषपरिपाको-न्मूर्च्छितचेतनाः, अनादिमिथ्यात्वाविरतिकषायनिगडेषु निक्षिप्ताः, चेतनावन्तोपि मर्त्त्या मूर्च्छन्ति करणार्थेषु व्याक्षिप्नुवन्ति ललितललनावदनगीतगीतिततिषु, बध्यन्ते विषमायुधलोलेक्षणेक्षण-वक्त्रविभ्रमकटाक्षजालेषु, परिपच्यन्ते दुःसहतरुणीजनविप्रयोगवह्निज्वालामालासु, किं बहुना-अधुना तु स्वायत्तीकृतैव एतादृक्भारतवर्षस्य भव्यतरा संस्कृतिः मृगाक्षीपिशाचिकागणैः, स्थापि-ताश्च सर्वेषां चेतसि सङ्ख्यातीताधिव्याध्युपाधि-शोक-सन्ताप-जन्म-जरा-मरण-कारयो विकृतयः, एतादृग्समये रक्षितं समस्तभारतवर्षालङ्कारहारोपमैः सूरीश्वरैश्चारित्ररत्नमात्मीयं विष-यतस्करेभ्यः कषायलुण्टाकेभ्यश्च, प्रार्थ्यतेऽतो भावतो यत्-

प्रेमपाथोनिधे! दद्यात्, प्रेमपूरितमानसम्।
द्योतिताशेष-दिक्चक्र-बह्मचक्रं तमच्छिदे।।१२।। 'अनुष्टुप्'

अभवत् बाल्यकालतो यः सूरीश्वरः परिणामैकदारुणविपाकविरस-मधुलिप्तासिलेहनतुलि-तकरालकृतान्तवक्त्रायमाण-कालकूटविषायमाण-विषयनिकरेषु किम्पाकफलसदृशेषु विरक्त-चेताः, मन्यते च स महानुभवो नारीरूपं तु विषवल्लीमिव धूम्रपटलश्यामीकृतवियज्ज्वाला-मालाशताकुलवह्निकुण्डमि; नास्पर्शि मनस्यपि तिलतूषत्रिभागमात्रमपि विषयविकारविचारः, नादर्शि परब्रह्मसुधारसास्वादलुब्धचेतस्केन धन्यतमेन येन महात्मना हालाहालोपमा वधूटीः स-रागदृष्ट्या, किरीटीभूतब्रह्मगुणेन विषयविषमवारणगण्डोद्भेदनपञ्चवक्त्रोपमेन योगनिष्ठपुरुषो-



त्तमेन सूरीश्वरेण स्वशुभ्रतरयशश्चन्द्रिकाभिः शुभ्रीकृतं जगत्त्रयमेतद्; स्वजन्मना पावनीभूतमेतद्-भुवनतलम्,

दृग्-वाग्-गात्राणि जातानि, दर्शन-स्तुति वन्दनैः।
कृतकृत्यादि मेऽत्रैव, प्रेम-पाथोनिधेस्सदा।।१३।।

प्रज्ञापहसितसुराचार्यमतयो - मोक्षाराधनैकप्रवणाः, प्रतिक्षणमाराध्यपादादेशे दत्तावधानाः, त्रिशता-धिकव्रतिव्रातजेगीयमानयशसां श्रीप्रेमसूरीश्वराणां केचन परमविनेयाः, स्वस्वराधरीकृत-किन्नरीगीत-गीतितति-मुनिपतिततयो द्योतयन्ति शासनम्, केऽपि विस्तारयन्ति प्रेमपूरपूरि-तप्रेमारामपरिमलं दिशोदिशं, केचित् प्रोल्लासयन्ति कृतानेकावधानाः, केचिद् विनेयाः माधुर्या-धरीकृतसुधा-सिता-द्राक्ष-जाम्बीरवचोविलासैर्भव्यकुमुदवनम्, स्फेटयन्ति केचिद् मिथ्यात्व-सन्निपातजनितशङ्काकलापं, नोदयन्ति केचित् शिष्याः मुमुक्षून् प्रवराराधनोद्यतचेतस्कान् जिन-मार्गेषु, वालयन्ति केचिद् यतयः कुपथपतितपथिकव्रजान् सर्वज्ञपथि, स्मारयन्ति भव्यमर्त्येभ्यः केचित् साधवः हेयोपादेयवस्तुतत्त्वम्, निघ्नन्ति केचिन्मुनयः तीक्ष्णतरकर्ममर्मापहारितपश्वक्रैः मोहमहारिपुं, किं बहुना, कलिकालेऽपि सम्यग्दर्शन-ज्ञान-चरणाराधनैकदत्तोपयोगाः पञ्चाचा-रनिरताः, न्याय-व्याकरण-काव्य-कोशा-ऽलङ्कार-सिद्धान्तपठनपाठनोद्यताः वैयावृत्यप्रव-णा भक्तिशौण्डीराः श्रमणशौण्डीराः शोभन्ते भुवनाभोगे प्रेममुनीशस्य।

- वादिदन्तिमद-मदोच्छेदहर्यक्षतुल्यानां शुद्धमुद्राणां प्रेममुनीन्द्राणां जिनाज्ञास्वच्छे गच्छे त्वपूर्वशासनप्रभावकास्सूरीश्वराः पंन्यासप्रवराश्चापि व्रतिवरा वर्तन्ते, इमे च ते-



- त्रैलोक्ये तिलकस्य यस्य सुगुरोर्व्याख्यानवाचस्पतिर्-
गच्छे स्फाति विशुद्धबुद्धिविभवै र्वित्रस्तवाचस्पतिः।
मिथ्यात्वाख्यगजेन्द्रगण्डदलने विश्वैकपञ्चाननः
सत्वाम्भोजगभस्ति-मौलिविनमत्सूरीशपञ्चाननः ।।१४।।

- श्री चौलुक्यकुमारपाल-नरराट्-मूर्ध्ना सुसंसेवित-
पादाम्भोरुह-हेमचन्द्र-सुगुरोः प्राज्ञैस्सदा सेवितः।
शैक्षाद्यस्सुमुनीन्दु-कोविदपतिः श्री रामचन्द्राभिघस्-
तद्वत् प्रेमविनेयमौलिमुकुटः 'श्री रामचन्द्राभिधः' ।।१५।। युग्मम्

- आचार्यागमप्रज्ञो हि श्रीमज्जम्बूर् मुनीश्वरः।
वर्धमानयशास्स्फाति प्रेमपत्कज-षट्पदः ।।१६।।

- श्रीयुक्कया भाति सङ्घे यशोदेव-व्रतीश्वरः।
कृतानेकनमस्कार-कोटिजापो बुधेश्वरः ।।१७।।

- कैवल्य-धर्म-चारित्रोपाध्यायाश्च भुवस्तले।
गणभृत्-पुङ्गवो मानो जीयासुः प्रेम-शासने ।।१८।।

- प्राज्ञेशः शान्तमूर्तिश्च महामहिम-भासुरः।
गणीन्द्रः कनकच्छायः पंन्यासः कनको जीयात् ।।१९।।

- पंन्यासप्रवरेश-कान्तिविजयो 'धन्येति' विश्वे श्रुत-
उद्यत्केन्सर-शोषरोगनिवहे स्वस्थश्शमाऽविच्युतः।
दिव्यावासविभूषणो गुणवसुव्रातैर्-व्रतीषूत्तमो
जीयात् क्षोणितले गुणाढ्यगणभृद् धर्माढ्यपुंसूत्तमः ।।२०।।

# स एष प्रेमगुरुर्विजयतु!!!

- वर्धमान–चिदानन्दौ चिदानन्दौ सहोदरौ।
  प्रशान्तौ शासने भातो विश्वे गुणगणेश्वरौ ।।२१।।

- पंन्यासप्रवरो–धृतीश–गणभृत्–पुण्याब्धि–'भद्रङ्करः'
  सच्छायो, गुणरत्नरोहणगिरिस्सत्त्वौघभद्रङ्करः।
  मैत्र्याद्यानघभावभासितमना विश्वे जनानन्दकृज्–
  जीयात् त्यक्त–ममत्व–सत्वमुकुटः कर्मारिसन्तापकृद् ।।२२।।

- मलयश्च मृगाङ्श्च सुदर्शन–जयन्तकौ।
  रैवतो भान्ति कर्पूरफेनकीर्तिर्महीतले ।।२३।।

- 'महिमाभासुराश्चात्र' हेमन्त–हर्ष–मुक्तयः।
  त्रिलोचनश्च जीयासु–र्नररत्नोऽवनीतले ।।२४।।

- हिमांशुरिव धात्र्यां यो राजमुनिर्विराजते।
  महोदयैकचेतस्कस्तपस्विमुनिपुङ्गवः ।।२५।।

- वैराग्याम्बुनिधिः प्रभावकगणी न्याये स्फुरत्फक्किक–
  आचाम्लादितपश्शरैः खरतरै र्येनाङ्गजो हक्कितः।
  पूज्यार्हद्–गुणगीतिलालसमना अब्धिश्च बुद्धेस्सदा
  पंन्यासप्रवरेश–'भानुविजयो' जीयात् क्षितौ सर्वदा ।।२६।।

- प्रगुरुवर्यपद्मारव्यो व्यभाद् गच्छे रविर्यथा।
  मानतुङ्गरिवोत्तुङ्गो मित्रानन्दाद्यशैक्षकः ।।२७।।

- पंन्यासप्रवराश्चैते, शासनोद्योतकारिणः।
  वादिमत्तेभशार्दूला गुणरत्नौघवार्धयः ।।२८।।

# स एष प्रेमगुरुर्विजयतु!!!

- मुमुक्षुयतिचक्रोऽपि, स्फातिं गच्छे गुणालये।
  पञ्चाचारपरः शीलालङ्कारो भक्तिलालसः ॥२९॥

- यद्भक्त्याऽऽप्स्यति सार्वमुख्यपदवीं श्रीश्रेणिकः क्ष्मापतिः
  सम्यग्क्षायिकरत्नभासुरमना वैराग्यलक्ष्मीपतिः।
  तस्याह्वां तमसो विपाकविचयं चित्ते मुहुश्-चिन्तयन्
  'खामेमीति' भणन् जगाम तविषं जीयात् स पञ्च स्मरन् शा.वि.॥३०॥

- यावत् स्फूर्जति सोमधामधवला भूः-क्षिति-स्व र्वर्त्तिनी
  सार्वाणां विमला यशस्त्रिपथगा विश्वस्य भद्रङ्करी।
  कीर्तिस्तावदिहापि नन्दतु गुरोश्चक्राङ्गपक्षोज्वला
  नौमि प्रेमपदाम्बुजं बुधजनै र्ध्येयं सुसेव्यं मुदा शा.वि.॥३१॥

- तीर्थे ते विजयन्तु शासनपतेस्तीर्थोन्नतौ साधकाः
  पाप्मानः सुजना भवन्तु निखिलास्तीर्थे च व्याबाधकाः।
  बोधिरत्नमवाप्य सत्वनिचयो यायाद् व्यथाब्धेस्तटं,
  भुक्त्वा दिव्यफलं सुखं चिरतरं यायाद् भवाब्धेस्तटम् ॥३२॥

- सङ्ख्यातीत-महोपकारी-जनक-ख्यातावदातव्रती-
  स्फाराकार-'महाबलाख्य'-सुगुरोः पुण्यप्रसत्तिव्रजात्।
  चम्पूकाव्यमिदं निबद्धमखिलं 'श्रीपुण्यपालेन' वै-
  सद्भिश्शोध्यमिदं विशुद्धमतिभिर्वात्सल्यपाथोधिभिः ॥३३॥

* अमृतानुवादः *

चन्द्रमा व्रतितारासु पापपङ्कदिवाकरः।
व्रताम्बुकतकब्रह्म-चर्ये जीयात् सदाचरत् ॥१॥

# श्रीप्रेमशतकम्

– *आचार्यश्रीविजयमुक्तिप्रभसूरिः

(छन्दः – मन्दाक्रान्ता)

नम्रः कम्रः प्रणतमुकुटो देवदेवेन्द्रवृन्दो–
यत् पद्पद्मं, प्रणमति सदा, प्रेमतः प्राप्तनन्दः।
तं देवेशं दलितदुरितं स्वीकृतानेकसेवं,
वन्देऽवन्ध्यप्रभवविभवं स्थम्भतीर्थाधिदेवम् ॥१॥

पूर्णीकृत्यागणितगुणसद्धैर्यगम्भीरतां ये,
चूर्णीकृत्याचलपृथुमहापापपृथ्वीधरं ये।
कर्णेकृत्याखिलजिनवरोक्तागमान् सर्वथा ये,
स्वर्गं याता अतुलबलिनः प्रेमसूरीश्वरा ये ॥२॥

तेषां दोषाऽस्खलितसुधियां लेशतोऽशेषभावैस्–
तत्प्रेमार्द्रस्तनुमतिरहं सर्वकर्मक्षयाय।
कर्तुं काङ्क्षे शतकमतिसद्भावभक्त्या विशिष्टं,
विद्वद्रम्यं यतिततिपतिप्रेमसूरीश्वराणाम् ॥३॥ (युग्मम्)

क्वाहं पङ्गुः क्व च गुणगणप्रौढिमान् प्रेमसूरिः
क्वाहं बिन्दुः क्व च गुणगणापारवाःशुद्धसिन्धुः।
आशङ्का मे मनसि नितरां[१] प्रागतः किं विधेयम्?
किं नादर्शः स्वतनुतनुना सूर्यबिम्बं बिभर्ति ॥४॥

नत्वा नत्वा गुरुवरपदान् वन्दनीयान् सदैव
स्मृत्वा स्मृत्वा महिममहितं नाम सारस्वतं सद्।
धृत्वा धृत्वा गरिमगुणिनः सद्गुरोर् धैर्यवन्तो
वाचां पारे गुरुगुरुगुणान् गोचरीकर्तुमीहे ॥५॥

---

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायः। १) 'प्राक्+अतः' इत्यत्र सन्धिः – अमृतः।

यः सर्वेषां प्रियतम इव प्रीतिकर्ता मुनीनां
यं सेवन्तेऽखिलमुनिवराः स्वाश्रयं मन्यमानाः।
येन प्राप्तः परमपुरुषश्रेणिमध्येऽवकाशो
यस्मै सर्वः प्रणमति सदा स्तौति सद्भक्तिभावात् ।।६।।

यस्मात् प्राप्तं प्रबुधपुरुषैः कर्मसाहित्यशास्त्रं
यस्य गच्छः श्रुतरतिमतिः सद्गुणान्वेषणेऽच्छः।
यस्मिन् सुस्थोऽखिलगुणगणः स्वाश्रयं मन्यमानः
स प्रेमात्मा जयतु नितरां प्रेमसूरिर्व्रतीशः ।।७।। (युग्मम्)

स्वस्तिश्रीमान् प्रथितपृथुतः प्राप्तपूर्णप्रतिष्ठः
शैलैः श्लिष्टो गहनगहनः सत्सरित्संयुतश्च।
सिन्धूः सिन्धोः पतिरनुदिनं प्रोच्छलत्युल्लसन् स-
शास्त्युच्चैः सोऽमरगिरिसमो भारताख्यप्रदेशः[1] ।।८।।



यस्मिन्नानाविधविधिकृताचारवैशिष्ट्यशिष्टाः
सन्तुष्टाश्च सहजसुभगाः पुण्यकर्मप्रविष्टाः।
लोकव्याप्ता ललितललनालङ्कृता लब्धलाभा
दृश्यन्ते सन्नयचययुता नैकदेशाः सुदृश्याः ।।९।।

एकस्तावत् परमजनसत्पादपद्मैः पवित्रो
हेयाहेय-प्रथित-सुपृथग्-भावसद्भावभव्यः।
श्रद्धाशुद्धानुपममहिमाश्लिष्टतीर्थप्रदेशो
भात्यत्यन्तं भुवि दिदिविवत् गूर्जरो नाम देशः ।।१०।।

देशे यस्मिन् रुचिररुचिमच्चित्तचिन्तापहारि-
चङ्गोत्तुङ्गाः प्रवरशिखरा नैकतीर्था विभान्ति।
धर्मागारा व्रतिततियुताः कर्ममर्मापहारा-
राराजन्ते प्रवरजनताः शुद्धबुद्ध्या विशुद्ध्या ।।११।।

अन्यश्चान्योपमितिवियुतो वृक्षमालाविशालो
वर्षापूर्णो विभवभवनः शोभनो भद्रभावः।
दुष्टानिष्टप्रदलनपरो वर्यदाक्षिण्यपुण्यो
दक्षः कक्षीकृतगुणगणः सन् महाराष्ट्रदेशः ।।१२।।

१) प्रकृष्टः देशः इति विग्रहः कार्यः - अमृतः।



कुम्भोजाख्यो गिरिवरवरः सिद्धशैलायतेऽस्मिन्
गोदावर्या विमलसलिलं स्वर्गगङ्गायतेऽस्मिन्।
लक्ष्मीः पौरे निजसुमनसा भृत्यकृत्यायतेऽस्मिन्
विद्या हृद्या [1]सुरधुनिरिवोत्कर्षवर्षः स देशः ॥१३॥

यत्रानन्ता परममुनयः सिद्धिसिद्धिं समापुः
स श्री सिद्धाचलगिरिवरो यत्र चित्रीयमाणः।
अन्ये नैके प्रवरगिरयो यत्र तं तीर्थपीठं
तार्तीयीकं सहजसुभगं स्तौमि सौराष्ट्रदेशम् ॥१४॥

पौरा यस्मिन् मधुरगिरया स्नेहतः संवदन्ति
सौधा यस्मिन् पवनपथमास्प्रष्टुकामा विभान्ति।
सच्चारित्रं स्फुरति सकलाः सत्कला संलसन्ति
सौराष्ट्रेऽयं जयतु नितरां शौर्यवीर्याढ्यदेशे ॥१५॥

यः सर्वेषां सहजरमणः शौर्यसौन्दर्यबद्धः
पादद्वन्दैः परमपरुषा यं पवित्रं प्रचक्रुः।
येनानेकं तरणतरणं रक्षितं तीर्थवृन्दं
यस्मै सर्वार्पितसुमनसो यत्र वास्तव्यलोकाः ॥१६॥

यस्मान्नैके महितमहसः सन्महान्तश्च जाता
यस्य ख्यातिर्दिशिविदिशि वै विस्तृता संस्तवेन।
यस्मिन् बुद्धिर्विपुलविशदा सर्वदा सर्वदात्री
देशेऽशेषे सुभगसुभगः सोऽस्ति देशो मरुश्च ॥१७॥ (युग्मम्)

देशाद् देशात् सकलविभवं स्वीयदेशे निधातुं–
सज्जीभूता इव खलु महासाहसाः सज्जना ये।
व्यापारार्थं कुशलमतयो दूरदेशेष्वटन्ति
सिन्धोः पारे परिकरयुताः संवसन्ति स्म केचित् ॥१८॥

अर्हच्चैत्याभिनवसृजने श्रावकैरत्र देशे
कोटीकोटी कनकमणिर[2]भिर् व्यय्यते राशिराशु।
आचार्याणां गणमगणितं सन्निमन्त्र्य प्रतिष्ठा–
मन्त्रोच्चारैः सह सुविधिना प्रक्रियन्ते प्रकामम् ॥१९॥

---

१) देवनदी – गङ्गानदी। २) कनकमणिभिः उपलक्षितः राशिः – इति उपलक्षणे तृतीया।

कल्याणानां विलसति वने विभ्रमालिप्रफुल्ले
देशे तस्मिन् परमरमणं नैव विस्मर्तुमिष्टम्।
पुष्टं पुण्यैः प्रथितसुयशो दोषमोषप्रतिष्ठं
पृथ्वीपीठं प्रथयितुमलं पिण्डवाडापुरं सत् ॥२०॥

श्रद्धाभाजो वरपुरजना रम्यचैत्याऽऽलयश्च।
धर्मागारा धवलितगृहश्रेणयो यत्र तत्र।
पौराः सर्वे सुभगहृदयाः पूजयन्ति [1]प्रभूत्का
अर्हद्गानं सुगणभजनाः शं[2]प्रधानाः प्रदानाः ॥२१॥

भक्तैर्भक्त्यान्वितसुहृदयैः स्वीयसम्पद्व्ययेन
सृष्टं नव्यं मुनिजनगणज्ञानसिद्धेर्निमित्तम्।
सूरिप्रेमाभिधमतिशुभं ज्ञानशालं विशालं
सूरिप्रेम्णः प्रवरमिति तद् स्मारकं संविभाति ॥२२॥

गुर्वादेशं निजशिरसि ये सम्प्रधार्यात्र सम्यग्
गन्तारश्च ग्रथितयशसो धर्ममार्गं विशेषम्।
नैके लक्षाधिपतय इह श्रेष्ठिनः श्रद्दधानाः
स्वर्गे स्वर्गाधिपतिततिवत् सर्वतः शोभमानाः ॥२३॥

पुण्यश्रेणिर्विलसति गृहे यत्र धर्मप्रधाने
धीरो वीरोऽतिशयगुणवान् धैर्यगाम्भीर्यवर्यः।
सङ्घाग्रीयस्त्वरितमतितो लब्धलोकप्रतिष्ठः
तत्र श्रेष्ठी सुभगभगवान्दास नामा विभाति ॥२४॥
सौन्दर्यौजःकलितवपुषा पूर्णतेजस्विनी या।
नाम्ना प्रेम्णा प्रियकृतिचणा सुप्रिया कङ्कुदेवी।
ज्योत्स्नाकल्पा हिमरुचिरता शङ्करस्येव गौरी
प्रद्युम्नस्य प्रियरतिरिव प्राप्तपुण्यास्ति तस्य ॥२५॥

---

१) प्रभौ उत्काः उत्कण्ठिताः – प्रभूत्काः।
२) शं सुखं, ददति इति शदाः सुखदायिनः, तेषु प्रधानाः मुख्याः–इति शप्रधानाः, प्रकृष्टं जिनाज्ञा पूर्वकत्वात् श्रेष्ठं दानं वितरणं येषां ते प्रदानाः।– अमृतः।



स्वच्छक्षीरे स्फुटितकमले मानसे मानसौकाश्-
चक्राङ्गिण्या रूचिररुचया संलसन् स्वेच्छयेव।
भुञ्जानोऽसौ सुधनधनिको दिव्यभोगं, स्वकीयः-
कालः कुत्र क्व च नहि हि तज् जानते याति यातः ।।२६।।

वर्षे [1]द्यो-दिक्-निधि-विधु-मिते वैक्रमीये वरेण्ये
सत्ताराया बलवति बले फाल्गुने सौम्यमासे।
शुद्धे योगे परमपवने पूर्णिमायाः प्रभाते
हृष्टे तुष्टे सति च सकले स्वीयसंसर्गिवर्गे ।।२७।।

प्राप्ते काले प्रसवनिकटा पुण्यपुञ्जैकगर्भा
देवी कङ्कुः शशधरमुखं पुत्ररत्नं प्रसूता।
पूर्वापूर्वं द्युतिगणयुतं व्योमशोभं पतङ्गं
प्रातः काले जनयति जगद्[2]दीप्रदीपं यथैव ।।२८।। (युग्मम्)

सर्वेषां हि प्रियकृतिपरः शास्त्ययं सौम्यबालो
मत्वेत्येवं स्वजनजनमामन्त्र्य मन्त्रप्रघोषैः।
मात्रा पित्रा सुविधिमवधिं प्राप्य नाम्नो विधेश्च
सञ्ज्ञा तस्य स्थितगुणगणा स्थापिता प्रेमचन्द्रः ।।२९।।

पुत्रं प्रेक्ष्य प्रतिदिनमुभौ भद्रभावस्वभावौ-
हर्षं प्राप्तौ शुचिशुचिवरं तौ पिता वापि माता।
किं नो सिन्धोः पतिरतिशयं पूर्णगम्भीरनादः
सिन्धुः सिन्धूद्भवमभिनवं प्रेक्ष्य पूर्णायते स्म ।।३०।।

हर्षोत्कर्षोल्लसितमनसोश्चित्रचारित्रयोश्च
पित्रोः पुत्रो विशदनयनो नेत्रपात्रं पवित्रः।
अङ्कादङ्कं बहुपरिचरन् क्रीडयन् क्रोडदेशे
मन्दं मन्दं सकलकलया वर्धते धामधामा ।।३१।।

धर्मज्ञाने विशदधिषणो बाल्यकालेऽप्यबालः
कौशल्यं च व्यपहृतिमतौ शल्यसंसर्गवर्जम्।
शिक्षां शिक्षाप्रदगुरुजनाद् बद्धकक्षः समस्तां
स्वल्पे काले स्वमतिगतितः प्राप्तवान् प्रेमचन्द्रः ।।३२।।



---

१) १९४० वर्षे। २) भानुम्।

बाल्ये यस्य प्रवररुचिता सर्वदा धर्मकृत्ये
नित्यं धर्मश्रवणमनिशं तन्निदिध्यासनं च।
देवार्चा–सच्चरणसुगुरूपासना पापभीतिः
शुद्धिः सर्वा सुकृतिनिकरे वर्धते धीश्च नित्यम् ॥३३॥

नानाकेलिं विपरिकलयन् केलिवेश्मन्यजस्रं
कल्लोलानां विकसति कला तत्र कादम्बवच्च।
धूलीक्रीडाविगतसमये यौवनं प्राप्तवान् स
तद् वैराग्यं वय इव सदा मानसेऽवर्धतास्य ॥३४॥

यस्याभ्यासे विलसति मनो वैभवे वर्धमाने
नीरात् क्षीरं परिकरजने यच्छमानेऽतिमानम्।
सर्वस्मिन् वै भवति च सति स्वानुकूले तथास्मिन्
संसारे नो स्फुरति विरतिप्राप्तचित्तं यदीयम् ॥३५॥

आयुर्यस्याञ्जलिजलनिभं, निर्गलद् भात्यनित्यं
लक्ष्मीरेषा जलधिलहरीलोललीला विभाति।
देहं गेहं शतशतरुजां स्नेहगेहं कथं स्यात्
चित्ते यस्यास्खलितविरतेः संसृतौ किं रतिः स्यात् ॥३६॥

स्वान्तं ध्वान्तव्रजविरहितं मेध्यमेकान्तकान्तं
जैनेन्द्राणां मतमभिगतं यस्य विद्यानवद्यम्।
सङ्क्रीड़न् सत्सरसि च सदा मानसे मानसौकाः
दृष्टः केन क्व परसरसि क्रीडितः किं कदाचित् ॥३७॥

कुर्वन् पात्रे रतिमरतिभाङ् नेतरस्मिन् कदापि
धर्मस्नेहं जगति वितरन् स्वीयकुलप्रकाशी।
धूमस्नेहैः खलु विरहितो नव्यदीप्रप्रदीपस्–
तेजोमात्रं नहि निजकुलं यः कलङ्कीचकार ॥३८॥



गात्रं यस्यास्त्यनुपमगुणं पूर्णसौवर्णवर्णं
तेजःपूर्णं विशदवदनं शारदेन्दूपमानम्।
नेत्रे लोकत्रयजनमनआस्तुते सौम्यपूर्णे
श्रोत्रे शास्त्रश्रवणकरणे कारणं पुण्यराशेः ।।३९।।

गच्छन्तं तं पथि पथगताक्षिद्वयं रम्यरुपं
दृष्ट्वा दृष्ट्वा विकचवदनं कामरुपं कुमार्यः।
सम्मुह्यन्त्यः सहसि सहसा संवदन्ति स्म नित्यं,
हस्तं बाला स्वकविधिवत् का ग्रहीष्यत्यमुष्य ।।४०।।

विश्वश्लाघ्यं विशदवदनं नन्दकन्दं निकामं
दर्शं दर्शं तरुणवयसि स्वागतं सञ्जगाद।
कान्ताकान्तं विनयवचसौदार्यसौन्दर्यवर्या
कन्या धन्या धवलितगुणा मार्गणायाङ्गजायाः ।।४१।।

आकर्ण्येत्थं मधुरवचनं स्माह कान्तः प्रियाया
उद्भूतायाः सुतपरिणये विस्मृतेः संस्मृतिर्मे।
अल्पे काले विशददिनमन्वेष्य कार्यं करिष्ये
कः स्यात् मूर्खो निजकुलकलां नाशयेदुल्लसन्तीम् ।।४२।।

सत्यः सन्त्यग्रिमगुणगणाः स्नेहदेहाः समुत्काः
श्रेष्ठाःश्रेष्ठ्यालयवलयवासिन्यभिज्ञाः कुमार्यः
पाणिं प्राप्तुं प्रवररुचयश्चावयोरात्मजस्य।
श्लाघ्यं भाग्यं भुवि विजयते नात्र सन्देहलेशः ।।४३।।

उद्वाहं मे रहसि पितरौ चिन्तयन्तौ विचिन्त्य
संसारार्तो भवभवनभीश्चिन्तयामास चित्ते।
संसारेऽस्मिन् निखिलसुषमं दुःषमैरन्वितं यन्-
निर्बन्धोऽयं परिणयकृते बन्धने मे कथं स्यात् ।।४४।।



इच्छैवं मे सकलबलमालम्ब्य नाना विलम्बं
सर्वानात्मक्षितिपतिरिपून् सत्त्वरं संविभिद्य।
स्वात्मक्षोणेर्जितपरजनोऽजेय्यसम्प्राड् भवेयं
मध्ये विघ्नं क्व च महदहोऽयाच्च तं नाशयिष्ये ।।४५।।

पित्रा प्रेम्णा कथितमथ तं पुत्रमाहूय चेत्थं
पुत्र! त्वं भो! कुलदिनकरो दिव्यतेजाः प्रियो मे।
वाणिज्ये स्यात् तव यदि रुचिस्त्वां नियोक्तुं ममेच्छा
वाणिज्यं ही सकलकुशलावासमन्त्र प्रधानम् ।।४६।।

विघ्नव्रातप्रचुरपुरतः **प्रेमचन्द्रः** स्वपित्रो–
राज्ञावज्ञा भवति महतां पापकर्त्रीति मत्वा
व्यापारार्थं विरतिविरतः सञ्जगे सोऽप्यनिच्छन्
व्याराग्रामं व्यवहृतिपरं स्वीयपित्रा सहैव ।।४७।।

जातोत्कण्ठा स्वहृदि वसतस्तस्य तत्रान्यदैका
तीर्थाधीशं प्रवरशिखरं सिद्धशैलं विशालम्।
आश्लेष्टुं वा सहजरुचिकृन्नाभिजातं जिनेशं
जातोत्कण्ठा हि पलमपि किं केपि यान्तं सहन्ते? ।।४८।।

स्वस्वान्तेष्टं सफलमखिलं कर्तुकामो विपश्चित्
कालं कार्यातिशयकुशलं प्रावलम्ब्याविलम्बम्।
निर्गत्यैव स्वकनिलयतः केनचित् सार्द्धमूर्ध्वं
सिद्धिक्षेत्रं परमपददं प्राप पुण्यातिपुण्यम् ।।४९।।

सत्शैलेशं शिशिरसमिरं स्पर्शभव्यत्वदर्शि
स्वैरं स्वैरं दुरितदलमुद्दालयश्चारुरोह।
दर्शं दर्शं निखिलसुखदं मोक्षनिःश्रेणिमेवं
हर्षोत्कर्षं निरवधिमगाद् भक्तिसंसक्तचेताः ।।५०।।



तीर्थेऽचिन्त्ये प्रथितमहिमाश्लिष्टतीर्थाधिराजं
नुत्वा स्तुत्वा स्तुतिगुणगणैरर्घ्यपुष्पैरनर्घैः।
पूज्यं प्रेम्णा विविधविधितः पूजयित्वा जिनेशं
तिष्ठन्नेवं प्रभुपदकजे प्रार्थयत् स्वेष्टमित्थम् ।।५१।।

हे! तीर्थेश! प्रथितयशसां पुञ्ज! प्रश्नो ममाग्रे
द्वावध्वानौ क्व मम गमनं संयमे संसृतौ वा।
को वा प्रश्नः परमपुरुषा येन याता स पन्थाः
पन्थानं तं निखिलविरतेः सत्वरोऽहं गमिष्ये ।।५२।।

वीर्यं प्राप्तुं विरतिविषये तप्तवान् सत् तपः स
नानाभेदं स्वपरिहतकृत् कर्ममर्मप्रभेदि।
तीर्थेऽनिष्टक्षयकृदवसत् तत्र चारित्रपात्रं
स्वप्रायोग्यं परमगुरुमन्वेषयन् मोक्षकाङ्क्षी ॥५३॥

सन्देशस्तं परम इति सन्दत्तवान् कोऽपि तावत्
त्वत्प्रायोग्योऽनघगुरुगुरुर्दाननामा मुनीशः।
घोघाग्रामे निखिलगुणभाक् शास्ति तत् तत्र तूर्णं
निर्गच्छ त्वं वरगुरुजने सम्भवी सङ्गमस्ते ॥५४॥



गत्वा तत्र स्वकभवभयोद्धारकं तं मुनीन्द्रं
मत्वा तं हि स्वकगुरुपदे सन्निधाय स्वचित्ते।
तत्सान्निध्येऽध्ययनकुशलो धर्ममार्गे प्रवृत्तस्-
तत्रागच्छद् व्यतिकरमिदं तत् पिताकर्ण्य तावत् ॥५५॥

आगन्तुं स्वावसथमथ सम्प्रेरितोऽनैकशोऽपि
सज्जीभूतो न खलु स यदा तं गृहीत्वाप्यकामम्।
आगात् तूर्णं निजपुरमथो तत्पिता वत्सलत्वात्
प्राप्ते योगे स च पुनरगात् दानसाधोः समीपम् ॥५६॥

ज्ञात्वागच्छत् पुनरपि पिता तं गृहीत्वा गृहं तत्
सङ्क्रुद्धः सन्निति कथितवान् नैव गन्तव्यमेतम्।
प्रेम प्राप्तुं पितुरतिशयं सद्मवासे स्थितो यः
स्वल्पे काले पुनरपि गुरोर्गन्तुकामोऽन्तिकं सः ॥५७॥

प्राप्ते काले पुनरपि गृहं त्यक्तवान् प्रेमचन्द्रो-
घोघाग्रामाच्चरणचरणात् क्रोशमष्टादशं वै।
सिद्धिक्षेत्रं गुरुवरपुरो गन्तुकामः प्रकाम-
मेकाकी स श्लथितवपुषा सञ्चरन् प्राप्तवाँस् तम् ॥५८॥

दीक्षाभिक्षां गुरुवर! वरां देहि मे प्रार्थयत् स
योग्योऽयं वै जगति भविता सद्गुणैर्धर्मभानुः।
दत्ता दीक्षा परमगुरुणा तत्र तद्योग्यकाले
शैक्षस्येदं विजयपरकं नाम प्रेम व्यधायि ॥५९॥

वर्षे [1]सप्त-व्रत-निधि-विधौ कार्तिके कृष्णपक्षे
षष्ठीघस्त्रे परिधृतयतिश्रेष्ठवेशो विशेषः।
कर्मग्रन्थप्रमुखप्रवरान् गूढग्रन्थान् विवेद
तूर्णं सर्वागमसुरपथे सूर्यवत् सन्दिदीपे ॥६०॥

पंन्यासादिप्रवरपदवीधारको दानसाधुः-
छाया[2]-ऽङ्का[2]-ऽष्टग्रह-शशिमिते वत्सरे वत्सरादौ।
छायापुर्यां निजगुरुकरात् पञ्चमीवासरादा-
वाचार्यस्याग्रिमपदधरो दानसूरिर्बभूव ॥६१॥



शब्दं यस्यैकमपि न यदा कोऽपि जानाति गूढं
ग्रन्थं कर्मप्रकृतिगहनं ज्ञातवान् यः स्वबुद्ध्या।
मेधामेतामतिनिरुपमां वीक्ष्य शिष्यस्य यस्य
सिद्धान्तोदध्यनुपमपदं तं ददौ दानसूरिः ॥६२॥

देशाद्देशं विहरति सहाचार्यवर्यै र्विनेयो,
धर्म्यं ध्यानं, परमुपदिशन् प्राणिनश्चोद्धरन् यः।
गुर्वाज्ञातो मनसि स मुनिर्मन्यमानः प्रमेति,
गुर्वाज्ञातो विहरति कदाचिद् विभिन्नप्रदेशम् ॥६३॥

ऊर्जे षष्ठ्यां [3]षड्दधि-निधि-स्यन्दसंवत्सरेऽग्रे
दर्भावत्यां गणिपदमभूत् सोत्सवं **प्रेम**साधोः
पंन्यासाख्यं पदमपि पुनः पञ्चवर्षे व्यतीते
प्राप्तं प्रेमप्रवरगणिना तत्तिथौ जैनपुर्याम् ॥६४॥

मध्ये तावन्[4]नव-रस-निधि-श्वेतवाज्यङ्कितेऽब्दे
तेजस्वी स्वप्रथितप्रतिभाप्रेरितक्षोणिलोकः।
शिष्यः श्रीमद्विजययुतसद् **राम**नामाभिरामः
प्राप्तः प्रेमश्रमणप्रवरैर्देशनादानदक्षः ॥६५॥

वर्षे[5] पञ्चा-ऽष्ट-नव [5]युवने प्राविशिद् मोहमय्यां
सङ्घाग्रीयाग्रहपरिगतो दानसूरिः स्वशिष्यैः।
श्रुत्वा रामश्रमणप्रवरात् शुद्धधर्मोपदेशात्
त्यक्त्वा मोहं मतिमुपगता मोहमय्यप्यथेत्थम् ॥६६॥

---

१) १९५७ वर्षे। २) १९६२ वर्षे। ३) १९७६ वर्षे। ४) १९६९ वर्षे।
५) १९८५ वर्षे। युवनः, चन्द्रार्थकोऽस्ति-अभि. चिन्ता. शेष. १४।

वर्षावासत्रितयमकरोन्मोहमय्यां हि तस्यां
दीक्षारोधे विलसति सति प्रेमपंन्यासवर्यः।
श्रीरामाख्यप्रवचनपटुप्राज्ञशिष्योपदेशात्
सज्जीचक्रे विषयरसतोऽलिप्तचित्तान् स्वशिष्यान् ॥६७॥

वर्षे [1]सप्ता–ऽष्ट–नव 'युवने कार्तिके कृष्णपक्षे
दानाचार्यैः क्रमगतपदं प्रेमशिष्याय दत्तम्।
एवं रामाभिधगणिवरे तत्तृतीयातिथौ हि
पंन्यासाख्यं पदमपि वरं मोहमय्यां तथैव ॥६८॥

धृत्वा रामाभिधमुनिगणिं पाठकः प्रेमनामा
गुर्वाज्ञातो गिरिवरमगादाशु शत्रुञ्जयाख्यम्।
चातुर्मासं निजनयनयो रोगतोऽकारि तत्र
मुम्बापुर्यां परमगुरुणा दानसूरीश्वरेण ॥६९॥

नैकान्येवं जिनवरसदने स्थापनादीन् प्रकुर्वन्,
[2]वर्षे चन्द्र ग्रह नव बुधे सङ्घविज्ञापितः सन्।
हारीजाख्यं प्रवरनगरं प्राप्तवान् दानसूरिः
शैथिल्येऽपि, निजकवपुषः, स प्रतिष्ठामकार्षीत् ॥७०॥

सङ्घस्यात्याग्रहपरवशः, पत्तनं राजधन्यं[3],
पश्चात् तूर्णं जिनसदनसद्–दर्शनार्थं ययौ सः।
स्वीयाऽऽसन्नान्तिमसमयविद् दानसूरिः स्वशिष्यं,
तूर्णं तत्राऽऽह्वयदतिगुणं पाठकं प्रेमसञ्ज्ञम् ॥७१॥

---

१) १९८७ वर्षे। २) १९९१ वर्षे। ३) राधनपुरम्।



गुर्वादेशं, निजशिरसि सङ्गृह्य शिष्यः सशिष्यः[1],
सान्निध्येऽगादणहिलपुरात्, पत्तनात् तूर्णमेव।
प्रादात्, तस्मै, गुरुरपि बलात्, तत्र चैत्रे तृतीय-
माचार्याख्यं, पदमनुपदं, प्रेमसूरिः स जातः ।।७२।।

कृत्वा वर्षावसनमथ स, प्रेमसूरिः सशैक्षो[2],
गुर्वाज्ञातो, झटिति गतवान्, स्थम्भतीर्थाधिराजम्।
एवं सङ्घाग्रहपरिगतः, पाटडीग्राममध्ये
सूरिर्दानः, शिथिलगतितोऽगात् प्रतिष्ठापनार्थम् ।।७३।।

माघे शुक्ले, जिनगृहप्रतिष्ठापनं सूरिपादः,
सोत्साहं सोऽकृत निरुपमं, सद् द्वितीयादिनाग्रे।
रात्रौ तस्यां, दिवि स गतवान्, हन्त! हा! दानसूरिः,
को जानीते, क्व च खलु कदा, यात्ययं कालधूर्त्तः ।।७४।। (युग्मम्)

आकर्ण्यैवं, स्वगुरुवपुषो, नाशवृत्तं व्यथाकृद्-
दुःखाक्रान्तौ, गुरुविरहतः, स्थम्भतीर्थे स्थितौ तौ।
किं कर्तव्यं, क्व च विहरणं, सद्गुरोरन्तरेण,
सत्यं तावद्, विधिविलिखितं, लङ्घितुं कः क्षमः स्यात्? ।।७५।।

ध्यायन् नित्यं निखिलगुणभृत्-सद्गुरोर्मूर्तिमन्तः[3]
स्वल्पे काले, स्वमतिबलतो, ब्रह्मतेजोबलाच्च।
लोके लब्धाप्रतिमसुयशा राजमानः समन्तात्
प्रेमाचार्यस्तरुणतरणिः, सङ्घखे भात्यतुल्यः ।।७६।।

राधे शुक्ले युग[4]-नव-नव-स्यन्दवर्षस्य षष्ठ्यां
मुम्बापुर्यामनुपमसमुत्साहतः प्रेमसूरेः।
आचार्याख्यं पदमनुपमं प्राप्य सोऽन्वर्थनामा
मान्यो जातः सकलजगतां सूरिराड् रामचन्द्रः ।।७७।।

---

१) पंन्यासरामविजयगणिसहितः। २) पंन्यासरामविजयगणि सहित इत्यर्थः।
३) मूर्त्तिम्+अन्तः हृदये इति विग्रहः कार्यः- अमृतः। ४) १९९५ वर्षे।



गत्वा कोल्हापुरमथ गुरुः प्रेमसूरिः सशिष्यः[1]
[2]सप्त-ग्रैवेयक-निधि-विधौ वत्सरे वर्यमासे।
लक्ष्मीपुर्यां जिनवरमहाचैत्यमध्येऽर्हतां तौ
सोत्साहं सोत्सवमकुरुतां सत्प्रतिष्ठाऽञ्जने च ।।७८।।

मुम्बापुर्यां तदनुगुणकृच्चोपधानं प्रधानं,
एकः श्राद्धः सफलविभवं भक्तितोऽकारयत् सत्।
लक्षोल्लङ्घ्यो द्रविणनिचयात् तद्गुरोः सन्निधाने
[3]हयष्ट-ग्रैवेयक-निधि-निशानाथसंवत्सरेऽग्रे ।।७९।।

सप्तम्यां[4] ग्लौ-विधु-गगन-दृग्-वर्षवैशाखशुक्ले
सत्तारायां विलसति शुभे शासने प्रेमसूरेः।
त्रायस्त्रिंशत् प्रवरपुरुषाः प्राव्रजन् मोक्षलक्ष्म्या
आसन् येषु स्थविरवयसोऽनैकबाला युवानः ।।८०।।

तत्तुर्येऽब्देऽनुपममहिमा निर्गतो भावसारो
राजस्थानाद् विपुलजनसङ्कीर्णसिद्धाद्रिसङ्घः।
प्रेमाचार्यप्रवरगुरुसत्सन्निधानेऽग्रधर्मा
सिद्धं शैलं प्रतिसमगमत् सोत्सवं पूज्यसङ्घः ।।८१।।

सिद्धक्षेत्रात् स च पुनरगात् प्रेमसूरिः सुरेन्द्र-
ग्रामं तत्रातिशयमतिभिः कर्मसाहित्यकार्यम्।
प्रारब्धं तन्निरुपमशुभामाशिषं प्राप्य शिष्यै
राशीर्वाणी फलति नितरां सद्गुरोः सर्वदैव ।।८२।।



तत्रायातो गुरुमकथयत् पिण्डवाडाग्रसङ्घो-
ह्यागन्तव्यं गुरुवर! यथा पूर्णतामाप्नुयान्मे।
हर्षात् कृत्यं जिनगृहयुगेऽर्हत्प्रतिष्ठाऽञ्जनस्य
स्वीकृत्यैतज्झटिति गतवान् प्रेमसूरिः पुरं तत् ।।८३।।

राधे शुक्ले [5]रस-शशि-वियन्-नेत्रवर्षस्य षष्ठ्यां
तस्मिन् ग्रामे जिनवरप्रतिष्ठाऽञ्जने स व्यधत्त।
यत्र व्यापारितमुपनवं लक्षमानं धनं सद्-
यस्मिन् ह्यासन् शतमुनिवराः प्रेमसूरेः प्रशिष्याः ।।८४।।

---

१) पंन्यासरामविजयगणिसहित इत्यर्थः। २) १९९७ वर्षे। ३) १९९८ वर्षे।
४) २०११ वर्षे। ५) २०१६ वर्षे।



[१]वर्षेऽष्टैका-ऽम्बर-युगमिते राधशुक्ले चतुर्थ्यां
प्रेमाचार्योऽञ्जनमथ प्रतिष्ठां व्यधाद् राजपुर्याम्।
कुर्वन्नेवं जिनगृहप्रतिष्ठामथ प्रेमसूरिर्-
ग्रामाद्ग्रामं विहरति सदा संयमेऽत्यप्रप्रमत्तः ॥८५॥

[२]पञ्चाम्यां च ग्रह-शशि-वियद्-द्व्यब्दकृष्णोर्जमासे
रोगस्तीव्रः समजनि महान् प्रेमसूरेः शरीरे।
राजस्थाने विहरति तदा 'हार्ट एटेक' नामा
दोषज्ञानां स खलु निखिलैर्नो प्रनष्टः प्रयत्नैः ॥८६॥

स्वीयैर्दण्डैः रचितशिबिकामध्यभागेऽधिरूढं
स्वीये स्कन्धे निजगुरुवरं भक्तिमान् शिष्यवर्गः।
धृत्वाऽशक्तं खलु विहरते संहरन् स्वीयपापं
धावन्ति स्माहमहमिकया साधवस्तेऽनुसाधु ॥८७॥

वर्षे [३]द्व्यक्ष्यभ्र-यमलमिते पौर्णमास्यां तिथौ च
प्रेमाचार्यप्रवरगुरुसत्सन्निधौ तस्य साधोः।
नूत्नग्रन्थद्वयमथ समुद्घाटितं श्राद्धवर्यैर्-
हस्त्यारूढं कृतमप्रतिमं सोत्सवं जैनपुर्याम् ॥८८॥

[४]विश्व-श्रोत्रा-ऽभ्रपथ-युग संवत्सरे स्तम्भतीर्थे
वार्धक्येऽपि श्लथितवपुभिः सूरिभिः सञ्चरद्भिः।
सार्धं स्वीयैर्वरपरिकरैः पावनं तच्चरित्वा,
चातुर्मासं विहितमथ तैस् तत्र सङ्घाग्रहेण ॥८९॥

वर्षावासे गुरुवरवपुर् नैकशश्चान्तराले
रोगव्रातं गतमपि पुनर्नोऽसमाधिं गतः सः।
साधून् सर्वानिति कथितवान् साधवो ! वः सकाशा-
दाशासेऽहं चरमसमये सर्वथान्तःसमाधिम् ॥९०॥

दुःखोत्पादां निजवरगुरोरार्तवार्तां विदित्वा
तत्रागच्छन्निजगुरुवरे भक्तिमान् सूरिरामः।
तूर्णं [५]वेद-द्वय-युग-युगे वत्सरे मोहमय्या
मासे माघे मिलनमभवत् शिष्यगुर्वोरपूर्वम् ॥९१॥



१) २०१८ वर्षे। २) २०१९ वर्षे। ३) २०२२ वर्षे। ४) २०२३ वर्षे। ५) २०२४ वर्षे।



स्वास्थ्येऽस्वस्थे ह्यपि गुरुवरः स्वस्थचित्तोऽप्रमत्तः
साधोः सेवालवमपि कदा स्वेच्छया नैव गृह्णन्।
कर्तुं सर्वं क्षतिविरहितं शोधयन् कर्मशास्त्रं
ज्ञान-ध्याने सततनिरतः सर्वदासीत् प्रसन्नः ।।९२।।

आधौ व्याधौ निरवधि सदा साधयन्तः समाधिं
सूरिः शास्तेऽप्रतिमप्रतिभायुक्तशिष्येन सार्धम्।
वर्षावासं निवसितुमथो सङ्घविज्ञप्तिवश्याश्-
चातुर्मासं तदपि च परं तत्र निर्णीतवन्तः ।।९३।।

हा! वैशाखे गुरुरगमदस्वस्थतां कालरात्रौ
तूर्णं तत्र त्वरितगतिमान् सङ्गतः शिष्यवृन्दः।
सङ्घोऽप्येवं सपदि मिलितस्तद् विदित्वैव वृत्तं
त्यक्त्वा निद्रामुप निजगुरुं रामसूरिर्जगामः ।।९४।।

सर्वानेवं कथितमथ मां कारयध्वं समाधिं
प्राप्यात्यन्तं प्रथमनिजसच्छिष्यवक्त्रात् समाधिं।
स्वर्यातास्ते परमगुरवो वीरनाम स्मरन्तः
को जानीते किमिह भविता कालसङ्केत एषः ।।९५।।

राजस्थानै रुदितमहहा! गूर्जरा दुःखितास्ते
सौराष्ट्रीयाः शिथिलवपुषो हा! महाराष्ट्रदेशः।
साधोः सङ्घो गुरुविरहतः शोकमाप्नोत् समग्रो
ध्वान्तध्वस्तं खलु जगदहो प्रेमभानौ प्रयाते ।।९६।।

सन्देशोऽयं पवनजवतो यातवान् सर्वदेशं
दुःखग्रस्ता अपि हृदयसद्भावतस्तत्र याताः।
सङ्घा नैके गुरुवरगुणासक्तभक्ताः गृहीत्वा
देहं तेषां जयजयरवैर्निर्गता निर्गताश्रु ।।९७।।

अग्नेर्दाहः कृत इति गुरोरेकत्रिंशदसहस्रैः
सद्रुप्याणां द्रवितहृदयाद् भक्तवर्गेण वर्यः।
लक्षोन्मानं द्रविणमखिलं तन्निमित्तेन जातं
तस्मात् संस्थापितमनुगुरु स्मारकं भाति तत्र ।।९८।।

अद्याप्येवं वदति विदुषां वृन्दमेतान् स्मरन्तो
नो यातास्ते क्वचिदपि सदा सन्ति सन्तो हि चित्ते।
अप्रत्यक्षा अपि गुरुवरा भान्ति प्रत्यक्षमेव
कीर्तेर्देहो भवति महतां स्थायि नित्यं समन्तात् ।।९९।।

यावच्चन्द्रं जगति जयतात् कीर्त्तिदेहात् सदेहो
यो विख्यातः प्रकटचरणाचारसञ्चारहारी।
वात्सल्याब्धिर्निरवधिगुणो देहधारी गुरुर्यो
यस्याकार्षं शुभदशतकं स प्रभुः प्रेमसूरिः ।।१००।।

।। इति प्रेमशतकम्।।

।। अथ प्रशस्तिः।।



जैनेन्द्रशासननभोद्युतिकृद्दिनेश–
श्रीप्रेमसूरिवरवर्यविनेयरत्नम्।
सूरीश्वरो नवरविस्समो ‘रामचन्द्रो’
**राराजते सकलभक्तचकोरचन्द्रः ।।१।। (वसन्ततिलका)**

धर्मोपदेशनपटुः प्रथितस्तदीयः
पंन्यासमुक्तिविजयो गणिराट् सुशिष्यः।
तच्छिष्यवर्यजयकुञ्जरनामधारी
**संशोभते मम पिता गुरुभावधारी ।।२।।**

शैक्षेन तस्य वरकार्तिकशुक्लपक्षे
वर्षे [1] मद–द्वय–वियद्–यमले चतुर्थ्याम्।
**मुक्तिप्रभेण** मुनिना खलु स्तम्भतीर्थे
**श्रीप्रेमसूरिशतकं विहितं हिताय ।।३।।**

।। सम्पूर्णम्।।

रचना – वि.सं. २०२८ – स्थंभ तीर्थ

---

१) २०२५ वर्षे।

* अमृतानुवादः *
मरोर्जातः सुधासिन्धुः प्रेमार्याख्यस्तु चित्रकृत्।
यमै र्बद्ध्वा यमान्मोक्तुं स्वं परान् सततोद्यतः।।


श्रीप्रेमसूरीश्वरचारित्र सूर्योदयो
मम भवान्धकारं नाशयतु.....

# सिद्धान्तमहोदधिस्तुत्यष्टकम्

– आचार्यश्रीविजयमुक्तिप्रभसूरिः

सिद्धान्तसागरसमुत्तरणे सुनावं
तत्त्वावबोधपरिकर्मितवाक्प्रभावम्।
भव्याब्जबोधकरणे तपनस्वभावं
श्रीप्रेमसूरिसुगुरुं सततं स्मरामि।।१।।

शास्त्रानुसारि तिथिमार्गप्रसारकारं
श्रीरामनामधरपट्टधरप्रसारम्[1]।
सर्वातिशायिमहिमानिधिसाधुसङ्घं
श्रीप्रेमसूरिसुगुरुं सततं स्मरामि।।२।।



सर्वज्ञशासनधुराधरणेऽतिसारं
कन्दर्पसर्पघनदर्पविहङ्गराजम्।
दर्पातितुङ्गनगपक्षसुरेन्द्रवज्रं
श्रीप्रेमसूरिसुगुरुं सततं स्मरामि।।३।।

दुष्टाष्टकर्मदलने स्फुरितातिशौर्यं
स्वाध्यायवह्निबहुदग्धघनाघकक्षम्।
शुद्धात्मधर्मधनरक्षणबद्धचित्तं,
श्रीप्रेमसूरिसुगुरुं सततं स्मरामि।।४।।

१) श्रीरामनामधरपट्टधरेण प्रकृष्टं सारं बलं यस्य सः इति विग्रहः कार्यः – अमृतः।

# सिद्धान्तमहोदधिस्तुत्यष्टकम्

वात्सल्यमस्य गतशल्यमिहातुलं तत्,
सज्ज्ञानप्रदानकृतसंयमशुद्धसाधुम्।
गाम्भीर्यशुभ्रमनघं कृतपापशुद्धौ,
श्रीप्रेमसूरिसुगुरुं सततं स्मरामि।।५।।

एकाशनं वरतपो गुरुणा सुचीर्णं,
यावज्जीवं जितमहारसना रसेन।
सर्वाः क्रियाः सुविधिशुद्धिपराः सुचीर्णाः
श्रीप्रेमसूरिसुगुरुं सततं स्मरामि।।६।।



सर्वै र्नयै र्जिनसदागमपद्ममित्रं,
चारित्रपालनगुणातिपवित्रगात्रम्।
सम्यक् स्वकीयगुरुवर्गकृपासुपात्रं
श्रीप्रेमसूरिसुगुरुं सततं स्मरामि।।७।।

कल्याणकल्पतरुमेरुमहामहीध्रं
गाम्भीर्यधैर्यगुणरञ्जितसर्वलोकम्।
मुक्तिप्रभोऽहमनघं घनकर्ममुक्त्यै
श्रीप्रेमसूरिसुगुरुं सततं स्मरामि।।८।।

रचना - वि.सं. २०७४ मुंबई

* अमृतानुवादः *
भीमकान्तगुणज्ञातं मुक्तिरमावरप्रदः।
सिद्धान्तसिन्धो! प्रेमश्री र्जीवारामे सुधां किरन्।।

# द्वितीयो विभागः

चन्दनाधिकशैत्यगुणसमन्वितताय
पूज्यपादाचार्याय प्रवराय
प्रेमसूरीश्वराय
नमोऽस्तु मे।



चन्दनाधिकशीतलतासाधित–
संयमगुणाकरपूज्यपादाचार्यप्रवराणां

# प्रेमपारायाणाभिधे श्रीनिःश्रेयसे
# अपूर्वप्रेमचन्दनाख्यो द्वितीयो विभागः

चन्दनं विलेपनेन शीतलतादिगुणमर्पयति,

प्रेमचन्दनं तु दर्शनेनैव रोग-शोकादिनाशं करोति।

चन्दनवृक्षो फलानि नार्पयति,

प्रेमचन्दनं तु दर्शनेन सेवनेन प्रौढतराणि फलान्यर्पयति।

चन्दनं तु बहुश्रमेण स्वगुणं प्रसारयति,

प्रेमचन्दनं तु विना श्रमेणैव स्वगुणं सहसैव प्रसारयति।

चन्दनसमीपं नागाः समागच्छन्ति,

प्रेमचन्दनसमीपं तु रोगनागाः कामादयो विलीनशक्तयो भवन्ति।

# प्रेमसूरिस्तु मङ्गलम्

– पंन्यासप्रवरश्रीवज्रसेनविजयो गणी

**आर्हन्त्यांशयुतं श्रेष्ठमाजन्म-ब्रह्मचारिणम्।**
**प्रेमसूरिं सदा वन्दे आमोदिदेहधारिणम्॥१॥**

संयमजीवनं प्रति पारवारप्रेमशालिनः संयमिनां संयमव्रतं प्रति परमप्रोत्साहकाः ज्ञानसाधनायां प्रकृष्टाः प्रेरणाप्रेमसुधागृहायमानाः पूज्यगुरुपितामहाः अर्थात् प्रेमसूरीश्वराः।

संप्रतिकाले परमशासनप्रभावकाः संयमसमाराधका आगमप्रज्ञा अध्यात्मज्ञानिनो महाप्रावचनिका भीमतपस्विनो जपस्विनो वैयाकरणमणयो ज्योतिष्मार्तण्डास् तार्किकशिरोमणयो वैयावृत्यनिपुणा अध्यात्मसाधकाः साहित्यकाराः प्राचीनसाहित्योद्धारकाः साहित्यसंशोधका विधिमार्गज्ञातारोऽन्तःस्पर्शि-विशुद्धवाचनादातारो बाल-युवात्मजीवनशुद्धिकारका बहुजनभवालोचनादायकाः सङ्घहितचिन्तकास् तीर्थसंरक्षकाः शताधिकदीक्षादातारः संयमार्गसंवाहका इत्यादयोऽनेके साधुश्रेष्ठाः व्रतिवर्याः श्रमणमणयो जिनशासनभूषणा ये सन्ति, तत्प्रभावः पूज्यपादानामेव।

परमगुरुदेवोऽर्थात् साक्षात् वात्सल्यनिर्झर एव, तत्र निर्झरे मङ्गलमज्जनमहाभाग्यं ममाप्यभवत्। तेषामेका प्रेरकविशेषता आसीत्- यत् ते शासनसमुदायसंबद्धेषु जिनागमपदार्थसम्बद्धेषु प्रश्नेषु निर्णयकरणार्थं समुपस्थितेषु तन्निर्णयं स्वयं जानन्नपि तत्-तद् विषयेषु पारगामिविद्वत्-प्रवरमुनीनां सूचनामवश्यंतया गृह्णन्त्येव, तथा तन्निर्णयं शास्त्रसम्मतं एव निर्मापयन्ति इत्येतत् तेषां निपुणत्वम् नितरां ज्ञायते।

पूज्यपादानामगाधा करुणा, अमेयं वात्सल्यं निर्व्याजस्नेहसुधाधारासारो ममोपर्यभवत्। मां संयमग्रहणादेर्दिनपूर्वं प्रेषितं पत्रं यदा पठामि तदाऽनुभवामि यदेत् पत्रं मां संयमजीवनाय प्राणवायुकल्पम्। तत्पत्रे यल्लिखितं सर्वेषामुपकारायात्र प्रस्तौमि।

''यादृशेनोत्साहेन दीक्षामादातुं सज्जीभवन्नसि तादृशेनैव न, परन्तु ततोऽप्यधिकतरेणोल्लासेन रत्नत्रयी चेतनाज्योतिषा दीप्या। जगद् विस्मृत्यात्मसाधनायां विशेषतरमुद्यमी भूयाः, लेशमात्रमपि प्रमादं न कुर्याः।

तेन महाभाग्योदयेनैव त्वां परमवैरागि-विद्वत्पंन्यासभद्रङ्करविजयाः गुरुस्वरूपेण प्राप्ताः। अतस्तेषामाज्ञा निर्विकल्पचेतसा शिरसि संधार्या पाल्या च। तेषामाज्ञाप्रभाप्रभास्वरभालतिलको भूयाः। रत्नत्रयी साधनया त्वमान्तङ्गशक्तीनां विकासं साध्यमाराध्यं मत्वा साध्नुहि। परम्परया च त्वमात्मनो महाकल्याणं कुर्याः... इत्येतन्मम शुभाशीर्वादः।''

मन्येऽहं एतादृशैर्भावैः पूज्यश्रीभिर्ममोपरि शक्तिपात एव कृतः। तैर्मद्विषयाऽऽसेविता शुभभावना द्वितीये पत्रेऽपि साक्षात् प्रेमस्वरुपेणागता यत्-

---

– पू.आ.श्री रामचन्द्रसूरि समुदायः

''वज्रसेनविजय! संयमजीवनसत्कमवधानं सावधानतया करणीयं तथा निष्कलङ्कसंयम-जीवनमेवास्मदीयं संयमावस्थाया अनन्यं प्राणभूतम्, अशुभसंस्कार-ग्रहणासेवनशिक्षाविषयेषु भूयो भूयो दृढतरां सावधानमनस्कतां प्राथम्येनैव चित्तस्थां कुरु।

ज्ञानोपार्जनया सह संयमशुद्धिरप्यात्यावश्यका। संयमसाधनायां प्रमादवशतो ये केऽप्यतिचाराः सञ्जायन्ते तत्संबंधि शोधन-प्रायश्चिताभ्यामतिचारशुद्धिकरणं न विस्मर्तव्यम्। सदैव सार्वाज्ञा स्मृतिपथि समानेया।

अस्त्येका ममाभिलाषा यत् त्वयाऽस्मिन् दुर्लभजीवने विनयगुणमात्मसात् कर्तुं प्रभूततरं प्रयतितव्यं सफलता च तत्र प्राप्तव्यैव तथा च हालारभूमिरात्मसाधनातेजसा तेजोमया विधेया।''

पूज्यपादैर्मद्सदृशानैकान् बालमुनिवरान् संयमयोग्याः प्रेरणाः क्रियमाणा एवासन्, तावदेव न परन्तु योग्यान् योग्यपदे स्थापयितुं सततमायासा अपि कृताः।

तेषु प्रेरणाप्राप्तेषु मम दादागुरुवर्यपंन्यास-भद्रङ्करविजयेभ्यस्तृतीयपदप्रदानाय तेषामनुरोध आसीत्, तदा तेषां मध्ये विचारविनिमयः प्रवृत्तः। तदा पूज्यपादानां प्रशिष्यपंन्यासभद्रङ्-करविजयैर्नम्रतापूवकमात्मनोभिप्रेतं प्रकाशमानीतं यत् तत् तेषामेव शब्देषु पठ्यताम्-

''पत्रे लिखितो विषयो ज्ञातः। एतादृशे गंभीरे विषये मदभिप्रायः किं कार्यकृद् भवेत्? तथापि भवन्तः पृच्छन्तः सन्ति, अतः मन्दाल्पमत्या यद् भातं तद् ज्ञापयामि-

''योग्यतातोऽधिका पदवी नाद्य कमपि प्राज्ञं विचारशीलनजनं समाकर्षति। सांप्रतकालीनो युगो न श्रद्धागम्यः, अपि तु बुद्धिवादिता सर्वगामिनी प्रसरति, अतः पदवीतो योग्यता त्वधिकं सन्मानभाजनतामर्हति। विशेषणानि अपि यावन्ति न्यूनानि स्युस्तावन्ति जनरुचेर्विषयानि भवन्ति। अत एव च केवलमात्रं मुनिशब्दमेव मह्यमधिकतरं रोरुच्यते। पुनश्च योग्येभ्यः पदप्रदानं भवद्भिः कृतमेव। अतो भवन्तो भवतः कर्तव्यताया मुक्ता एव।

अतः परं महत्महत्तरं पदं प्राप्तुं मुनिभिरेव स्वीययोग्यताविकासाय प्रयतितव्यम्, शास्त्रे सन्दर्भितगुणानात्मसात् कृत्वा पदायाधिकारिभि र्भवतिव्यम्।''

इत्यादि परमस्परमभिप्रायाणां या सहजाऽभिव्यक्तिर्भूता सा पूज्यपादानामत्युदार-मनोभावनैवास्ति इति मन्ये।

अस्तु एतादृशानेकानेकगुणानां निधानभूतानां पूज्यपादानां गुणदेहीभूतवर्षे अनन्तानन्ता वन्दनाः।

**मङ्गलं गौतमांशो यो श्रीदानसूरिधर्मसूः।**
**तपोगणाधिनेता स, प्रेमसूरिस्तु मङ्गलम्॥**

* अमृतानुवादः *
विहाय स्वजनाद्यान् ये बालास्तु, संश्रिता गुरुम्।
गुरुणा प्रेर्य पोष्यास्ते, प्रेमाचार्योऽत्र भद्रकृत्।।१।।

# आचारविचारविशुद्धाः परमगुरुदेवाः

– आचार्यश्रीविजयश्रेयांसप्रभसूरिः



हं हो! सद्भूतगुणानुरागिणो महानुभावाः श्रृणुत श्रृणुत!!! यैः परमगुरुदेवाचार्यदेवेश-श्रीमद्विजय-प्रेमसूरीश्वराणां प्रत्यक्षं दर्शनं समुपलब्धं, तादृग्गुरुदेवद्रव्यभावसानिध्य-सम्प्राप्त्या सफलीकृत-जीवनानां धन्यानां वदनकमलैस्तेषां गुरुदेवानां जीवनवर्णनं श्रुतं ते ज्ञानगर्भितवैराग्यं, शुद्धसंयमं, विशुद्ध-प्रज्ञाप्रकर्षं प्रत्यक्षं दृष्टवन्तः श्रुतवन्तश्चापी-त्यहं मन्ये।

गुणगणोऽपरिमितस्तेषां, तं वाचा वाच-स्पतिरपि वर्णयितुं नालं केऽत्र वयम्। तथापि 'स्वाध्यायवश्यकसमो गुरुणां हि गुणस्तव' इत्यार्षवचनं स्मृत्वाहं प्रयतोऽस्म्यत्र। **दुष्क-रकर्मणि गुरुकृपैव केवलं पर्याप्ता!**

सिद्धान्तमहोदधिः, कर्मसाहित्यनिपु-णमतिः सुविशालश्रमणसार्थाधिपतिः, स-च्चारित्रचूडामणिः, ब्रह्ममूर्त्ति' एते पञ्चगुणाः पश्चानुपूर्व्यात्र विचार्यमाणा प्रस्तुताः।

यद्यपि महतां महत्त्वं शब्दगोचरं न तथापि महत्त्वैनैवावार्जितोहं किञ्चिद् विवक्षुरस्मि।

'ब्रह्म' आत्मनः विशुद्धं स्वरुपमस्ति, कर्मपुद्गलात्मनोरनादिसाहचर्येऽपि नह्या-त्मा पुद्गलरूपः, नहि पुद्गलमात्मरुपं भ-वितुमर्हति, यतः पुद्गला जडस्वरूपा आत्मा तु चैतन्यरूप एव। पौद्गलसुखलुब्ध आत्मा

जडरूपो यत् प्रोच्यते तत्तु स्वस्वरूपासं-वेदित्वादेव, यतस्तदा तस्य चैतन्यं तिरोहितं वर्त्तते। यैस्तु देहनिवासित्वेऽपि विशालपरि-वारभक्तजनादिपरिवृतैरपि स्वात्मरमणता-सौख्यमेवोररीकृतं तैस्तु देहातीतसुखमग्रे ब्रह्मस्वरूपमेव प्राप्तमित्यभिधीयते, तत्रापि निर्विकारतया पशुधर्मरूपं मैथुनं त्रिकरण-शुद्ध्या यैः परिवर्जितं तैस्त ब्रह्मनिष्ठाकार-कोऽनुभूतोऽनेकसदाचारचारिभिः। 'सच्चा-रित्रमिति' सम्यग्दर्शनभावितत्त्वेन सम्यग्-भावं प्राप्तं यत् तत् सच्चारित्रं ज्ञेयम्। तत् सम्यक्चारित्रापरनामकं सर्वविरतिरूपं भावचारित्रमीरितं शास्त्रज्ञैः। तत्र त्रिकरण-योगेन हिंसासत्याचौर्याब्रह्मपरिग्रहात्मकप-ञ्चमहाश्रवानां रात्रिभोजनसाहितानां परि-वर्जनं यावज्जीवं क्रियते ब्रह्मनिष्ठा येषां परिशुद्धा वर्त्तते, तेषां शेषपापपरिहारोऽतीव सुकरो यतो ब्रह्मनिष्ठैवातिदुष्करा। एतादृशं सच्चारित्रं चूडामणिरूपेण स्वशिरसि धार-यतां पूज्यानां सम्यक्चारित्रचूडामणित्वं दे-वदानवमानवै र्जेगीयते तथा चारित्रचारि-त्रिणोरभेदोपचारात् ते चारित्रिषु चूडामणि-तया राजमानाः परमगुरवः सच्चारित्रचूडाम-णिविशेषणं सुतरां नातिवर्त्तन्ते। ते पूज्या ललाटंतपे तपने तपति युगप्रमाणदृष्ट्या गजगत्या बहिर्भूमिगमनं कुर्वन्तः, मुखव-स्त्रिकाच्छादितवदनेनैव वदन्तः, निर्दोषच-र्यया परिमितद्रव्यैरेकाशनव्रतमाचरन्तः, वयःपरिपाकेऽपि निर्दोषचर्यामेवोररीकुर्वन्तः, शेषसमितिष्वप्युपयोगवन्तः, गुप्तित्रयमययो-गधारिणः, साक्षात् संयमधर्ममूर्त्तय आसन्। तेन प्राचीनपरमर्षीणां महाविदेहमहर्षीणां च स्मरणं कारयन्तः, भव्यजीवोद्धारका बभू-वुः। निस्पृहा अपि ते शुभभावनाभभावितत्त्वं,



सूरि प्रेम



गुरुचरणोपासकत्त्वं क्रोडीकृत्य संयमधर्मे तन्मनास्तल्लेश्यास्तदध्यवसायाः समजा-यन्त। तैः शिष्यभावोऽपि तथाङ्गाङ्गीभावमानीतो यथा शिष्यस्पृहाऽपि नोत्पन्ना, तस्माद् ये केचन मुमुक्षव आगच्छन्ति तान् प्रतिबोध्याध्याप्य च गुरुचरणे समर्पितवन्तो नियमश्चापि तदर्थं कृतस्ततः समुपार्जितविशिष्टपुण्यप्राग्भारैस्तैः प्रथमशिष्यत्वेन 'श्रीरामविजयो मुनिः' सम्प्राप्तः, मुनिना च तेन यत् शासनप्रभावनारक्षादिकार्यं कृतं तत् शिष्यसहस्रैरपि कर्त्तुं नालम्। -

तदर्थं श्रीमेघसूरीश्वरैः श्री प्रेमविजयपंन्यासपदार्पणप्रवचने यदुक्तमासीत् तथाहि-ते (श्री प्रेमविजयाः) व्याख्यानं न ददत्यापि अहोनिशं व्याख्याने वर्त्तन्ते, व्याख्यानाधिकारस्तु तै स्विशष्यराम-विजयाय दत्तः येन महाभागेन स्वगुरोर्नाम विश्वप्रसिध्दं कृतं, तेन समग्रः श्रीजैनसङ्घः संस्तुतोस्ति' तद् यावज्जीवं सत्यापितं, जिनशासन-ज्योतिर्धरश्रीविजयरामचन्द्रसूरीश्वरै र्गुरुविनयगुरुवचनपालनगुर्वाचार-परंपरासिद्धान्तनिष्ठादिसमुज्ज्वालयद्भिःतैरन्येऽपि विद्वांसस्तप-स्विनः, प्रभावकाः शासनोद्योतिनः शतशः शिष्यप्रशिष्या सञ्जन-यायाञ्चक्रिरे। पूज्यपादानां विद्यमानतायां, स्वर्गतेष्वपि शत-सहस्रशः शत-सहस्रशः श्रमणगणशाखाप्रशाखाः प्रवृद्धाः, तस्मात् ते पूज्याः सुविशालश्रमणगच्छाधिपतित्वेन जेगीयन्ते।

कर्मसाहित्यनिपुणमतित्वं तेषां ज्ञानक्रियाभ्यां सहाद्वितीयमेवा-सीत्। दीक्षादिनादारभ्य ज्ञानयज्ञे कर्मसाहित्यं पठमानैस्तैः वडोद-राराज्याश्रितज्ञानभाण्डागारनिरीक्षमाणैः 'कम्मपयडी'-नामक-दुर्लभग्रन्थप्रतिः प्राप्ता। तत्सम्प्राप्त्या नरीनर्त्तितं हृदयं तेषाम्। गुरु-कृपया स्वयमेव सम्पूर्णो ग्रन्थः पठितपूर्वमिव पठितः, सूत्रार्थरूपेण कण्ठस्थीकृत्यानेकविद्यार्थिभ्यस्तथा पाठितो यथा कर्मसाहित्य-विषयः स्पष्टतरो बभूव, सङक्रमणकरणग्रन्थस्य तु स्वयमेव रचना कृता, युवामुनिभिश्च कर्मसाहित्यस्य लक्षाधिकप्रमितनव्यरचना अपि कारिता। यावज्जीवं संशोधिताश्च कर्मसिद्धान्तवैशद्येन तैः स्वजीवनं पावनीकृतं मरणञ्चादर्शरूपं कृतम् तेषां जीवनं मरणञ्चापि नैकसा-धकानां चिरकालं निःसंशयं दृष्टान्तीभविष्यतः।

'सिद्धान्तमहोदधित्वं' न्यायादिशास्त्राणां ज्ञातृत्वेन, प्रकरणा-गमादिस्वशास्त्रपारङ्गमित्वेन, बुद्धिप्रागल्भ्यात् पूर्णज्ञानगरिष्ठत्वेनैव पर-मगुरवः सिद्धान्तमहोदधित्वेन प्रसिद्धा इति तु न मनसि प्रतिभाति, किन्तु स्व-परशास्त्राणां साकल्यमाकलय्यापि तेषां सिद्धान्तमार्गनिष्ठत्वमद्भुत-मासीत् तेन सिद्धान्तमहोदधित्वेन प्रथिता इति प्रतिभाति। तेन गुणेनैव तैः शुद्धतिथिमार्गप्ररूपणा-बालदीक्षान्यायालयचर्चा-तिथिवादे मध्यस्थ-नियुक्ति-

तद्दत्त-स्पष्टाभिप्रायं स्वीकृत्य यावज्जीवं तथैवाचरणा-प्रचारणा-श्रीजिनसङ्घशान्त्यर्थमपि मागरक्षकापवादिकपट्टनिर्माणं, सैद्धान्तिकदृष्ट्या साध्वाचारपरिपालनमपि यथावत् प्रवर्त्ततेतिभावनया साध्वाचारपालनप्रबन्धः कृतः, एवं ते पुण्यपुंस आचारपालनेनाऽपि महान्तः, विचारशुद्यापि महान्तः। तेषामाचार-विचारशुद्धिं प्राणाधिकत्वेन स्वीकुर्वन्तो हि वयं तेषामनुयायित्वं वास्तवेन सार्थकं करिष्यामः। पूज्यानां परमपावनपदारविन्दे प्रणतिततिं कुर्वन्नहं प्रार्थये-भो! गुरुदेवा आशीर्वादं ददतु यद् वयं आचार-विचारदार्ढ्यं प्राप्य सुसाध्वाचारसमाराधका-मार्गसाधका-सन्मार्गरक्षका-मुक्तिप्रापकाश्च भवामः इति शम्।

* अमृतानुवादः *
गुणैर्गौरवशुभ्रैः श्री प्रेमाचार्यो गिरीश्वरः।
ब्रह्मनिष्ठा परा तत्र कैलासवद् गुणेश्वरः।।

प्रेमगुरुकृतनमनं
मयिब्रह्मनिष्ठां
संस्थापयतु....

# PREMSURI IS NO. 1



# आह्वानप्रत्यादाता...

– आचार्यश्रीविजयरत्नसुन्दरसूरिः*



शक्यं स्यादपि मदनवर्त्तिकायाः प्रज्ज्वलनम्, अपि तां प्रज्ज्वलितां तदस्तित्वं यावत्... रक्षितां विधातुं...तु महदेवाह्वानं...

आहारद्रव्याणि चास्वादयितुं सुकराण्युदरे च यथावत् तदाहारपाचनं,

तस्माच्च देहबलावाप्तिरपि महदेवाह्वानम्।

तथैव...तद्वत्, तन्न्यायतः...

संयमजीवितस्याङ्गीकारः सुकरो न चैतावदाह्वानम्,

नापि चै तावान् प्रतीकारः अपि तु... किञ्च संयमस्वीकारादनन्तरं...

तस्य लक्ष्यमेवैकं दृश्यते सर्वदा सर्वथा तथा लक्ष्यं प्रति प्रतिपदं पदन्यासस्तु सर्वेषां संयमिनां गिरामगम्यं अशक्यकल्पनं महदेवाह्वानम्...।

किन्तु अपि च... सिद्धान्तमहोदधिः, कर्मशास्त्रनिपुणमतिः पूज्यपाद आचार्यमूर्धन्यः श्रीमद् प्रेमसूरिवरस्तु...एवंविधेन शब्दसञ्चयेन स्तोतुं शक्यः... स्तुतिपात्रं... स्तवनजीवन-मासीत्

यत् संयमजीवनस्य प्राप्तिं प्रति प्रत्येकाह्वानं तै महापुरुषैरतीव स्वीय-सहज-शौर्य...सत्ववत्तया प्रतिविदधे... प्रत्यकुरुत...

गुणास्तु तेषां कैः कैर्वणै वर्ण्याः...अस्तु तथापि बालचापलम् मम तत्र...

---

* पू.आ.श्री विजय भुवनभानुसूरिसमुदायः

एकं तावत्...–क्रियास्वपरिमेयाऽप्रमत्तता

द्वैतीयिकं – सर्वद्रव्यादिकस्य त्यागे चानन्याग्रेसरता,

तार्तीयिकं जिनवचनरमणतापूर्वकं स्वाध्याये नितरां निर्मग्नता,

चर्तुथं च संयमयात्रा चर्यायां दोषपरिहारशीलता,

पञ्चमं यावद् यतनायाः परिपालने प्रौढता...

सर्वं च सङ्गीयते यथैकत्रं यथा समितिगुप्तिपालने प्रतिपलं सबलं जागरूकता...पापे प्रमादे च भीरूकता....

एतेष्वखिलेष्वेते महातपोधनाः मूर्धन्या आसन्

मनसि पवित्रता..., वचसि प्रसन्नता..., आत्मनि परिणतिः..., सर्वात्मसु प्रेम!

एतैः चतुर्भिर्गुणैस्तेषां संयमजीवनस्य चतुराघाटा सर्वथा सदैव यथाऽनघाऽऽसीत् यथा सर्वेऽपि जनाः श्राद्धाः श्रमणाद्याः निर्निर्मिषतामाप्नुवन्ति स्म विस्मय मोदमानाः, किं बहुना?

मदनवर्तिका ज्वलितापि रक्षितुं शक्यते न प्रवर्धयितुम्,

शक्यते च गिरिशिरसि समारोढुं, न तु तत्र सर्वदैव स्थातुम्,

किन्तु एते संयमस्थेमवीर्याः प्रेमधामानः प्रेमाह्वयाः परमपुरुषाः महात्मानः प्रेमसूरिवराः वर्यव्रतै र्विरतिवन्त आसन्, पञ्चनखर इव पराक्रमेण प्रव्रज्या स्वीकृता तथैव च पराक्रमेण तथा श्रद्धोत्साह–सन्निष्ठेति गुणत्रयी पवित्रत्रिपथगाया परमप्रेरकबलमवाप्य विरतिजीवितं विमलं विमलतरं विपुलोन्नतं च विदधति स्म, तच्च विमलं विरतिजीवितं न किमपि प्रलोभनं मलीमसीकर्तुमलं, न च कापि पीडा वार्त्तिर्वा तां विमलतां पर्यस्तयितुमूर्जस्विनी देहजीवितस्यान्तिमसमयं यावत् तां विरतिविमलतां दृढां प्रौढां च रक्षं रक्षं, एते महापुरुषाः परमपदं नेदिष्ठं कर्तुमना इव इतो भवादायुःकर्मवर्त्तिकायां क्षीणायां वैशाखकृष्णैकावदश्यां स्ववश्यंच समाधिमाधाय परलोकं प्रयाताः,

परलोकं च प्रलोकं परमपदं प्राप्तुमधैर्यवानिव।

तेषां गुणरत्नरत्नाकराणामहमेकमपि रत्नस्य अंशं प्राप्नुयाम्,

तदा मन्ये मम संयमस्वीकरणस्य तदाचरणस्य साफल्यमाप्नुवम्...

※ अमृतानुवादः ※

प्रत्याह्वां कर्मणां दत्वा ब्रह्मणाजयदाहवम्।<br>मुक्तिनेदिष्ठसंसारं प्रेमसारं स्तुवे गुरुम्।।



# 'प्रेम' जीवनोपवनम्

– *आचार्यश्रीविजययोगतिलकसूरिः।

पूज्यपादानां प्रेमसूरीश्वराणां जीवनं नाम गुणपुष्पैः सुवासितमुपवनम्। तेषां गुणपुष्पाणां सुरभिरनन्योऽद्वितीयश्चास्ति, श्रेयस्करः शाश्वतश्चास्ति। केवलं तं सुरभिं श्वासेषु सम्भृत्य जीवनया-पनस्यावश्यकतास्ति।

अस्माकं प्रकृष्टेन पुण्योदयेन पूज्यपादानां जीवनसुरभेरनुभवस्यावसर आगतोऽस्ति। अतस्तस्मात् सुवासितादुपवनादेकं पुष्पमवचित्याहं भवतां करकमले समर्पयामि। निःसंशयतया तस्य पुष्पस्य परागोऽस्माकं सर्वेषां जीवनं सुरभिणा सुवासितं करिष्यति।

पूज्यपादानां जीवनोपवने सदा सुवासितं पुष्पं तदस्ति ''यत् संयमैकनिष्ठत्वम्'' अर्थात् पूज्यपादानां जीवने संयम एव प्राणाः, संयम एव जीवनम्...संयम एव श्वासाः।

विविधस्वरूपेण सा निष्ठा प्रकटीभवति स्म। तद्यथा – पूज्यपादा जानन्ति स्म यत्, ''विशिष्टं कारणं विना शिबिकाया योगो दोषपूर्णः संयमघातकश्च इति। अतः संयमरक्षार्थं पूज्यपादाः शिबिकायामुपवेशनं सर्वदा वर्जयन्ति स्म। वृद्धत्वकारणेन, जङ्घाबलस्य क्षीणतया शिष्याणां चात्याग्रहेण यदोपवेष्टव्यं भवति स्म, तदा तेषां मुखं ग्लानिना व्याप्तं भवति स्म।

तस्यां ग्लानावपि संयमरक्षायाश्चिन्तासीत्। या चिन्ता तेषां छत्रछायायां स्थितैरनेकैर्महात्मभिरनुभूता समस्ति।

तस्याः संयमनिष्ठाया अपरं स्वरूपमासीत् 'मितभाषिता, आवश्यकतायां सत्यामेव वक्तव्यम्। अन्यथा मौनेन स्थेयम्। केचन बालिशा जना अस्यार्थघटनं विपरीततया कुर्वन्ति स्म, अस्य महात्मनः क्षयोपशमो न्यूनः स्यादितीति। किन्तु ते न जानन्ति यत्, अस्यां मितभाषितायां वैशिष्ट्यं तु पूज्यपादानां संयमनिष्ठायाः संयमरक्षायाश्च सावधानतां समुल्लासयति स्म।

आवश्यकताया अभावेऽपि वाचावदन् वाचालः साधुर्जानन्नजानन् वा सावद्यं वचनमुच्चार्य संयमनिष्ठायाः भ्रश्यति। अथवा तूत्सूत्रं प्ररूप्य संयमं नाशयति, एतत् पूज्यपादैः स्पष्टतयावगम्यते स्म। अबुद्धैरवमैर्जनैः यवत् कया रीत्या अवगम्येत?

– * पू.आ.श्री विजय शान्तिचन्द्रसूरिसमुदायः



संयमस्याधारो जीवने निर्दोषता विद्यते लेशमात्रदोषयुतं जीवनं संयमघातकमस्ति। किञ्च जीवननिर्वहणायान्न-पानमनिवार्यम्। पूज्यपादा जीवननिर्वहणाय अनिवार्येऽ-प्यस्मिन् विषये निर्दोषताया आग्रहिण आसन्।

अनेकवारं निर्दोषं भोजनमप्राप्य केवलं गुडमण्डकान् स्वीकृत्य कृतैरेकाशनैः संयमरक्षां कृत्वा शिष्यसमुदायेभ्यः शासनाय चाद्भुतमालम्बनमर्पितमस्ति।

एकदा रुग्णावस्थायां वैद्येनोष्णजलसेकस्य सूचनं कृतम्। शिष्या गृहस्थस्य गृहे जलमुष्णीकारयित्वा सेकार्थं गृह्णन्ति स्म। पूज्यपादैरेष वृत्तान्तो ज्ञातः। निर्दोषताया आग्रहिभिः संयमैकनिष्ठायाः स्वामिभिश्च पूज्यपादैराजीवनं रुग्णावस्थायामपि दोषितं जलं न सेवनीयमिति सङ्कल्पितम्।

'रोगो मान्यः.....दोषितं जलं त्वमान्यम्.....'

एतादृशेभ्यः संयमैकनिष्ठातायाः स्वामिभ्यो वयमस्मिन्नवसरे किमर्पयिष्यामः ?

ते यदि वर्तमानकालिकमस्माकं जीवनं पश्येयुः, तर्ह्यानन्देन भावार्द्रा भवेयुः किम् ?

एतमुत्तमवसरं प्रायोऽस्माभिरेष प्रश्नश्चिन्तनीयः। पूज्यपादानामालम्बनेन यदि वयं संयमैकनिष्ठां प्रति पदमात्रमप्यग्रेगमनं करिष्यामस्तदस्माकं तेषां प्रति वास्तविकं तर्पणं भविष्यति।

अन्ते पूज्यपादानां जीवनोपवनस्य एतत्पुष्पं हृदयेऽवधार्य नो जीवनमपि संयमसुरभिणा सुवासितं कुर्मः.....एष एवाभिलाषः।.....

* अमृतानुवादः *

आर्यवर्य! गुणाराम! प्रेमधाम! व्रतीश्वर!।<br>
व्रतवार्यं[1] गुणावासं[2] प्रसारय कृपां कुरु।।

---

१) वरदान २) गुणानां। आ समन्तात् वासः सुवासः इति गुणावासः, तं। अमृतः



# श्रीप्रेमचरणे शब्दकुसुमाञ्जलिः

– *पंन्यासश्रीमोक्षरतिविजयो गणी

जयन्ति विजयानन्दसूरयः शुद्धबुद्धयः। येनापास्य कुमिथ्यात्वं पूज्यतां मूर्त्तेराश्रयत्।।१।।

तत्पट्टद्रह सत्पद्मः कमलसूरिसत्तमः। ब्रह्ममूर्तिः सत्त्वनिधिः[1] स्पष्टवक्ता गतस्पृहः ।।२।।

तत्पट्टपूवशैलेश–रविः श्री दानसद्गुरुः।सर्वज्ञशास्त्रमर्मज्ञो ज्योतिर्विन्मार्गदेशकः।।३।।

तत्पट्टव्योमशीतांशुः प्रेमसूरीश्वरः प्रभुः। निर्वाणार्धशताब्देऽस्य जीवनांशः प्रशस्यते।।४।।

एकाकी सिंहवद् गेहान्निःसृत्य नावलक्षितः। यौवने पूर्णवैराग्यश्चारित्रं स्वीचकार **यः**।।५।।

**यं** प्रेमविजयं नाम्ना श्रीदानविजयो गुरुः। स्वशिष्यमकरोन्नित्यं ग्रहणासेवनापरम्।।६।।

प्रवचनस्य मातृणामङ्के **येन** दिवानिशम्। अक्रीड्यत च लेभे च सुसाधुरिति सद्यशः।।७।।

**यस्मै** चारित्रपात्राय सुशिष्यवृन्दशालिने। शास्त्रज्ञाय सूरिपदं[1] ददुः श्रीदानसूरयः ।।८।।

कर्मप्रकृतिमुख्यानां ग्रन्थानां साम्प्रते युगे। पुनः प्रवर्तितं **यस्माद**ध्ययनं स्थले स्थले।।९।।

---

* पू.आ.श्री विजय रामचन्द्रसूरिसमुदायः

१) भविपुलानामानुष्टुभां भेदः।

कर्मविषयसाहित्यं निर्मितं शिष्यसत्तमैः। राजते लक्षशः श्लोकं शोधितं येन प्रज्ञया।।१०।।

विशालगच्छा[२]धिपतौ श्रीसिद्धान्तमहोदधौ। शास्त्रीयसत्यसन्निष्ठे **यस्मिन्** मे रमते मनः।।११।।

श्री स्तम्भतीर्थधरणौ समताविमान-, मारुह्य वेद[४]-नयन[२]-क्षिति[०]-बाहु[२]वर्षे।
निर्यामणां प्रमुखशिष्यमुखेन शृण्वन्, श्रीप्रेमसूरि-प्रवरस्त्रिदिवं जगाम ।।१२।। वसन्त०

---

२) भविपुला।
२०२४ तमे वर्षे.

*** अमृतानुवादः ***
शब्दाब्जेषु गुणाः प्रेमसूरेः परिमलायिताः
दत्ते मोक्षरतिं यस्मै यः पर्यधाद् व्रतसज्रम्



चन्दनाधिकशैत्यगुणसमन्विताय
पूज्यपादाचार्याय प्रवराय
प्रेमसूरीश्वराय नमोस्तु मे।

# तृतीयो विभागः

सुरभिविकचकुसुमवत्
प्रवरविनयादिकिञ्जल्कपूर्ण
पूज्यपादाचार्यप्रवरा !
प्रेमसूरीश्वराः!
सदैव भद्रं दिशन्तु।





विकस्वराम्लानमनोहरगुणपराग-

सुरभितदिग्मण्डलसंयमारोऽभिरामकुसुमायमानानां

पूज्यपादानां प्रेमाचार्याणां प्रेमपारायणाभिधेश्रीनिःश्रेयसे

प्रशस्यगुणपुष्पाख्यस्तृतीयो विभागः।

- विकचपुष्पवत् प्रेमपुष्पं
  निरन्तरं गुणसौरभं प्रसारयति।
- प्रेमपुष्पं नवं नवं गुणपरागेण विलसति।
- प्रेमपुष्पं सदैव विकस्वरं विराजते।
- प्रेमपुष्पं सर्वत्र सुमनोजनभ्रमरानामाकर्षयति।
- प्रेमपुष्पं सर्वान् शीलगुणसौरभेन प्रमोदयति।

PREMPUSHP




# प्रेमसूरीशगुणपद्मानि

– *श्री रत्नबोधिविजयो मुनिः

**कर्मसाहित्यनिष्णातं, सिद्धान्तस्य महोदधिम्।**
**नमामि प्रेमसूरीशं, विशुद्धब्रह्मचारिणम्।।**

**जन्म** – मरुभूमौ पिण्डवाडानाम नगरम्, तत्र श्राद्धवर्यो भगवानदासो निवसति स्म। तस्य भार्या शीलविभूषिता कङ्कुबाई श्राविका। तस्याः पितृगृहं नान्दियानगरे आसीत्। सा तत्र वैक्रमीय १९४० वर्षे फाल्गुनशुक्लपूर्णिमातिथावेकं पुत्ररत्नं प्रसूतवती। तस्य नाम 'प्रेमचन्दः' इति स्थापितम्।

**दीक्षा** – प्रेमचन्देन पिण्डवाडानगरे शालायां व्यावहारिकं शिक्षणं प्राप्तम्। ततः स सूरतसमीपस्थव्याराग्रामे मातुलगृहे पित्रा प्रेषितो गतः। तत्र स मातुलहट्टे व्यवहारमकरोत्। व्याराग्रामे गच्छदागच्छत्साधुसाध्वीनां भक्तिं प्रेमचन्दः सोल्लासं करोति स्म।

**(१) वैराग्यबलीयस्त्वम्-** ततस्तद्भक्तिप्रभावेण तन्मनोभूमौ चारित्रग्रहणभावनाङ्कुरः प्रादुर्भूतः। शनैःशनैस्तस्य चारित्रग्रहणमनोरथो दृढीभूतः। एकदा स कञ्चिदप्यनुक्त्वा व्याराग्रामात्

– * पू.आ.श्री भुवनभानुसूरिसमुदायः

ट्रेनेन सूरतनगरमगच्छत्। सूरते स श्रावकोपाश्रयं प्राप्तः। इतो व्याराग्रामे मातुलेन तस्य गवेषणा कृता। ट्रेनविश्रामस्थलस्थहट्टवर्त्तिजनैर्ज्ञापितं 'प्रेमचन्दः सूरतं प्रति प्रस्थितं ट्रेनमारूढः' इति। मातुलः स्वजनैः सह सूरते श्रावकोपाश्रयमागतः, तेन प्रसह्य प्रेमचन्दो व्याराग्रामं प्रत्यानीतः। इत्थं प्रेमचन्दस्य चारित्रस्वीकारार्थं प्रथमः प्रयासो निष्फलीभूतः।

**(२) पुनश्च प्रयत्नः -** स्तोकदिनानि व्यतीतानि, प्रेमचन्देन पुनः सुरतं प्रति गमनं सङ्कल्पितम्, प्रथमनिष्फलतायाः कारणं तेन गवेषितम्। प्रथमवेलायां स ट्रेनेन सूरतं गतः। ततः ट्रेनविश्रामस्थलस्थहट्टवर्तिजनेभ्यो मातुलेन प्रेमचन्दोदन्तो ज्ञातः। ततो द्वितीयवेलायां पादचारेण सूरतं गन्तव्यमिति प्रेमचन्देन निर्णीतम्, अन्यदा स स्वजनाननापृच्छ्य प्रातर्व्याराग्रामात् सूरतं प्रति पादचारेण प्रस्थितः। स्वजनज्ञानभयेन प्रेमचन्देनाऽतिरिक्तं वस्त्रपाथेयादिकं न गृहीतम्। स मार्गे चनकानि खादन्नचलत्। तस्मिन् दिने स द्विसप्ततिक्रोशान् चलित्वा सन्ध्यासमये सूरतं प्राप्तः। अतिशयेन श्रान्तः स सूरतनगराद् बहिर्वृक्षतलेऽस्वपत्। द्वितीयदिने प्रातः स सूरतनगरे साधूपाश्रयं प्राप्तः। तत्रत्यमुनये तेन स्वचारित्रग्रहणभावना ज्ञापिता, तेन मुनिना प्रेमचन्दाय कथितं 'यदि त्वं सुविशुद्धसंयमं पालयितुमिच्छसि तर्हि त्वमुपाध्यायश्रीदानविजयानां समीपे चारित्रं गृहाण, सोऽधुना पालिताणानगरे वसतिं करोति इति।

**(३) श्रीदानविजयोपाध्यायै स्वशिष्यत्वेन दीक्षितः-** मुनिकथनानुसारेण प्रेमचन्दः पालिताणानगरे उपाध्यायवर्याणां समीपं प्राप्तः। तेन तेषामग्रे स्वभावना प्रदर्शिता। तैः कथितं 'चातुर्मासेऽस्माकं समीपे उषित्वा त्वं संयमशिक्षां गृहाण' इति। तेन तथाकृतम्। चातुर्मासात् पश्चात् तद्योग्यतां ज्ञात्वोपाध्यायश्रीदानविजयैर्वैक्रमीय १९५७ वर्षे सिद्धगिर्युपत्यकायां प्रेमचन्दाय प्रव्रज्या प्रदत्ता, तदाऽन्ये चत्वारो मुमुक्षवोऽप्युपाध्यायवर्यैः प्रव्राजिताः। प्रव्रज्याया अनन्तरं प्रेमचन्द उपाध्यायश्रीदानविजयानां शिष्या मुनिराजश्रीप्रेमविजयाः इत्याख्यया प्रख्याताः सञ्जाताः। इत्थं प्रेमचन्देन चारित्रप्राप्त्यर्थं तीव्रः पुरुषार्थः कृतः।





• **समर्पणम्** - प्रव्रज्याप्राप्त्यनन्तरं मुनिप्रेमविजयैः साधनायज्ञः प्रारब्धः। साधनाया मूलं समर्पणम्, अतस्ते गुरुचरणयोः सदैव समर्पिता आसन्।

**(१) प्रव्रज्यायाः प्रथमवर्षे तैर् नियमोभिगृहीतः** - 'यावदहं मम गुरुदेवानां पञ्चशिष्यान् न निष्पादयामि तावन्मयाऽऽम्राणि न भोक्तव्यानि।' इति। एकस्मिन्नेव वर्षेऽयमभिग्रहः पूर्णोऽभवत् स्वसमीपे आगच्छतो मुमुक्षूँस्ते स्वगुरुदेवानां शिष्यानाकुर्वन्। ते स्वार्थं नाऽचिन्तयन्।

**(२) विनापराधमपि गुरूणामुपालम्भः सोढः** - अन्यदा केनचिन्मुनिवरेण कस्मैचिन्मुमुक्षवे तत्स्वजनानुमतिं विना रहसि दीक्षा दत्ता। पूज्यदानसूरीश्वरैर्ज्ञातं- 'प्रेमविजयेन सा दीक्षा दत्ता' इति। ततस्तैः मुनिप्रेमविजयानाहूयोपालब्धाः। तथापि मुनिप्रेमविजयैः स्वस्य निर्दोषता न प्रदर्शिता, नाऽपि गुरवो निरुत्तरीकृताः। तैर्गुरुप्रदत्तोपालम्भः सम्यक् सोढः। 'गुरुदेवा मन्निमित्तमप्रसन्ना जाताः।' इति विचार्य तेषामक्षिणी बाष्पार्द्रे सञ्जाते, तैर्गुरुदेवेभ्यो मिथ्यादुष्कृतं दत्तम्, इयं तज्जीवने समर्पणस्य पराकाष्ठाऽऽसीत्, यदपराधं विनाऽपि तैर्गुरोरुपालम्भः सोढः।

भोजनादनन्तरं पूज्यदानसूरीश्वराः पूज्यप्रेमविजयशिष्यमुनिहेमन्तविजयेन सह मध्याह्ने स्थण्डिलभूमिं प्रति चलिताः। मार्गे मुनिहेमन्तविजयेन प्रगुरुदेवेभ्यः कथितं, 'अद्य भवद्भिर्मम गुरुदेवा भृशमुपालब्धाः' तदा पूज्यै र्दानसूरीश्वरैः कथितं 'शिष्यस्य क्षतौ जातायां गुरुणा सा सम्मार्जनीया। प्रेमविजयेनाऽनुमतिं विना दीक्षां दत्त्वाऽपराधः कृतः। ततो मया स उपालब्धः। स तव गुरुरस्ति परन्तु मम तु शिष्य एव। मां विनाऽन्यः कस्तं कथयिष्यति?

मुनिहेमन्तविजयेन कथितम्- 'यदि मम गुरुदेवानामपराधो भवेत् तर्हि भवद्भिर्दत्त उपालम्भः स्थाने स्यात्, परन्तु यदर्थं भवद्भिर्मम गुरुदेवा उपालब्धास्तदुदन्तं तु मम गुरुदेवा न जानन्ति एव सा दीक्षाऽन्येन- मुनिना दत्ता, मम गुरुदेवैः कोऽप्यपराधो न कृतः।' एतच्छ्रुत्वा पूज्यैर्दानसूरीश्वरैः कथितं, 'यदि तस्याऽपराधो नाऽभवत् तर्हि तेन मह्यं किमर्थं न कथितम्?' मुनिनोक्तं, 'भवतामग्रे मम गुरुदेवाः कदाचिदपि स्वस्य निर्दोषत्वं न प्रकटयिष्यन्ति। तत् तेषां स्वभावे नास्ति।' सञ्ज्ञाव्युत्सर्गादनन्तरं त उपाश्रयं प्राप्ताः। पूज्यदानसूरीश्वराः प्रेमविजयानां समीपं गत्वा तेभ्यो मिथ्यादुष्कृतं दत्तवन्तः। पूज्यदानसूरीश्वरैः पृष्टं, 'त्वया तव निरपराधत्वं मह्यं किमर्थं न कथितम्?'

प्रेमविजयैर्गुरुचरण-योर्निपत्य कथितं, 'भवतामग्रे मम को वचनविलासः? भवद्भिर्मम हितार्थमेव कथितम्, स्वनिर्दोषत्वप्रकटनेन मम को लाभः? प्रत्युत एवंकरणेन द्वितीयवेलायां भवन्तो मह्यमुपालम्भं न दास्यन्ति, ततो मम हानिरेव स्यात्, शिष्यहृदयवर्त्तिनं गुरुसमर्पणभावं शिष्यवचनैर्ज्ञात्वा पूज्यदानसूरीश्वरा प्रामोदन्त।

इत्थं गुरुदेवान् प्रति प्रेमविजयाः स्वहृदयेऽद्वितीयं समर्पणभावमधारयन्।

**(३) ज्ञानार्जनार्थमनन्यः प्रयासः-** अन्यदा प्रेमविजयाः छाणीनगरे चातुर्मासार्थं स्थिताः। वडोदरानगरे काशीनगरादागतस्यैकस्य पण्डितवर्यस्य समीपे तैर्न्यायग्रन्थस्याऽध्ययनं प्रारब्धम्, तदर्थं ते प्रत्यहं छाणीनगरादष्टक्रोशान् चलित्वा वडोदरानगरं गच्छन्ति, वडोदरानगराच्चाष्टक्रोशान् पुनश्चलित्वा छाणीनगरमागच्छन्ति। इत्थमध्ययनार्थं ते प्रत्यहं षोडशक्रोशानचलन्त।

एकदाऽध्ययनार्थं ते पण्डितसमीपं प्राप्ताः, तदा पण्डितवर्यः कस्मिंश्चित् कार्ये व्यग्रोऽभवत्, ततः प्रेमविजयास्तं प्रतीक्षितवन्तः, द्विमुहूर्त्तानन्तरं पण्डितेन कथितं, 'अद्याऽध्ययनं न भविष्यति।' तदा प्रेमविजयानां मनसि पण्डितं प्रति लेशमात्रोऽपि दुर्भावो न जातः। यावत्या प्रसन्नतया तेऽध्ययनार्थमागतास्तावत्यैव प्रसन्नतया ते प्रतिगताः। पण्डितं प्रति तैः किञ्चिदपि दुष्टं न चिन्तितम्। इत्थं गृहस्थमपि विद्यागुरुं प्रति तेऽसाधारणं समर्पणभावमबिभरुः।

**(४) स्वर्गतानामपि गुरूणां समर्पणत्वं-** शिष्याः तेषां वार्धक्ये विहाराय स्ट्रेचरे (द्वयो र्दण्डयो र्मध्यवर्त्त्यासने समुपाविष्टस्य नरस्य वाहनायोपयुज्यमाने नरैर्वाह्यमाने साधने) एकदा स्ट्रेचरस्यैका बाहैकस्य मुनेर्हस्तात्स्रस्ता, ततः स्ट्रेचरो भूमौ पतितः। पुण्ययोगेन प्रेमविजयानामीषदपि बाधा न सञ्जाता, तदा तेषां मुखात् शब्दा निःसृताः, 'सुरलोकस्था अपि गुरुदेवा मां रक्षन्ति।' इत्थं गुरुदेवानां स्वर्गमनादनन्तरमपि तेषां हृदये गुरुसमर्पणभावस्तथैव प्रत्यग्र आसीत्।

• **ब्रह्मचर्यम् -** प्रेमविजया मनो-वाक्-कायैः सुविशुद्धं ब्रह्मचर्यं पालितवन्तः। तेषां मनस्यपि कदाचिदपि विकारो न जातः। ते नखशिखपरमब्रह्ममूर्तिरासन्।

**(१) ज्योतिर्विदश्चित्रम् -** एकदैको निष्णातो ज्योतिर्विदागतः। तदा भानुविजयैः (पश्चात् आचार्यविजयभुवनभानुसूरिभिः) तस्मै एका जन्मपत्रिका दर्शिता। ज्योतिर्विदा सा सम्यग्निरीक्षिताऽधीता च। ततस्तेन कथितं, 'इयं जन्मपत्रिका कृत्रिमा, न स्वाभाविकी। इयं कस्यचिदपि मनुष्यस्य नास्ति।' भानुविजयैः कथितं, 'इयमस्माकं गुरुदेवानां जन्मपत्रिकाऽस्ति, इयं स्वाभाविकी, न कृत्रिमा।' ज्योतिषेणोक्तं 'भवतां गुरुदेवाः सम्प्रति विद्यन्ते न वा?' भानुविजयैरुक्तं, 'अस्माकं गुरुदेवाः सम्प्रति विद्यन्ते।' ज्योतिषेण कथितं, 'अहं तान् द्रष्टुमिच्छामि,' भानुविजयै-र्ज्योतिषायाऽपवरकस्थिता गुरुदेवा दर्शिताः। ज्योतिषेण वन्दित्वा पूज्येभ्यः पृष्टं, 'किमियं भवतां जन्मपत्रिका?' पूज्यैरुक्तं, 'ओम्।' ज्योतिषेणोक्तं, 'अस्या अध्ययेन मया ज्ञातं यत् सम्पूर्णब्रह्मचारिण इयं जन्मपत्रिका वर्त्तते। किं भवतां





मनस्यपि कदाचिदपि विकारो न जातः?' महापुरुषाः स्वमुखेन स्वप्रशंसां न कुर्वन्ति। ततः पूज्याः स्मित्वा तूष्णीं स्थिताः। ज्योतिषः पुनश्च तच्चरणयोर्निपत्य तान् वन्दितवान्। इत्थं तेषां जन्मपत्रिकाऽपि तेषां ब्रह्मचर्यगुणं प्रकटितवती।

**(२) वार्धक्येपि नेत्रनियन्त्रणम् -** वार्धक्येऽपि ते साध्वीभिः स्त्रीभि र्वा सार्धं कदाचिदपि सम्मुखं विलोक्य न भाषितवन्तः। कार्ये समापतिते ते भूमिं दृष्ट्वा ताभिः सह परिमित-शब्दैर्भाषितवन्तः। ते केवलाभ्यः साध्वीभ्यः स्त्रीभ्यश्च वाचनां न दत्तवन्तः। सूर्यास्तात् पश्चात् ते साध्वीनां-स्त्रीणां प्रवेशं साधूपाश्रये निषेधितवन्तः।

**(३) विजातीयसंसर्गापूर्वस्त्यागः -** एकदा तैः प्रवचनं दत्तम्, तेषां प्रवचनं तात्विक-मासीत्, प्रवचनादनन्तरमेका श्राविका प्रवचनगतपदार्थसम्बन्धिप्रश्नं प्रष्टुमागता, तैः सङ्क्षेपेण समाधानं दत्तम्, ततस्तैश्चिन्तितं, 'मया प्रवचनं दत्तम्। ततः सा श्राविका प्रष्टुमागता। मया तस्यै समाधानं दत्तम्। इत्थं प्रवचनहेतुकोपि स्त्रीपरिचयो न समीचीनः। सुविशुद्धं ब्रह्माचर्यं पालयितुं मया स्त्रीपरिचयः सर्वथा वर्जनीयः। इत्थं विचिन्त्यि तैः सुविशुद्धब्रह्मचर्यपालनाय प्रवचनदानमपि त्यक्तम्।

**(४) ब्रह्मचर्यस्यानन्योऽनुभावः -** तेषां ब्रह्मचर्यस्य प्रभावोऽचिन्त्य आसीत्, तेषां समीपे निषीदनमात्रेणाऽप्यन्येषां मनोगतविकारा अशाम्यन्त। तेषां नामस्मरणमात्रेणाऽप्यन्येषां चित्तगतमन्मथविकारा अशाम्यन्त।

- एकदैका मुमुक्षुश्राविका सङ्घेन सह तीर्थयात्रार्थं गतवती। व्यवस्थाकरणायैको युवा पुरोवर्त्ति नगरं प्रति प्रस्थितः। तदा तया मुमुक्षुश्राविकया स विज्ञप्तः। स्वजनमिलनार्थं तन्नगरं भवता सार्धमहमपि गन्तुमिच्छामि। तदा यूना सा निषिद्धा। तया निर्बन्धः कृतः, ततो यूना सा स्वेन सह नीता।

मार्गे तस्या मनसि विकारा प्रादुरासन्, सा विलासान् कर्तुं लग्ना, तया यूनोऽग्रे मार्गे प्रार्थना कृता युवा सज्जन आसीत्। तेन तस्याः प्रतिबोधनार्थं प्रयत्नः कृतः। तथापि सा न प्रतिबुद्धा। ततो यूना मनसि प्रेमसूरीश्वरनाममन्त्रजापः कृतः। चमत्कारो जातः। यथा यथा यूना जपितं तथा तथा श्राविकामनोगतविकारा अशाम्यन्त। तया युने मिथ्यादुष्कृतं दत्तम्,

**'मन्मथविकाररोगशमनाय 'नमो नमः श्रीगुरुप्रेमसूरये'** इति मन्त्रजपोऽमो-घौषधकल्पः।

**(५) ब्रह्मचारिणा चिन्तितं सदैव सफलं** - अन्यदा सिद्धगिरियात्रां कृत्वाऽ-वरोहणसमये प्रेमसूरीश्वरैः सहवर्त्तिमुनये कथितं, 'सम्प्रति जिनशासनस्य स्थितिर्विषमा। आयतौ जिनशासनस्य सुसञ्चालनं कः कारयिष्यति? अहं पञ्चविंशतिं तरुणमुनीन् निर्मातुमिच्छामि, ये जिनाज्ञायाः प्ररूपणया जिनशासनं प्रभावयिष्यन्ति।' मुनिना कथितं, 'भवन्तो नैष्ठिकब्रह्मचारिणः। ब्रह्मचारिणा चिन्तितं कदाचिदपि निष्फलं न भवति। ततो भवन्मनोरथोऽवश्यं सफलीभविष्यति।' ततः पालिताणाचातुर्माससमाप्तेरनन्तरं प्रेमसूरीश्वराः शिष्यपरिवारेण सह मुम्बापुरीं प्राप्ताः। तत्रा-ऽऽसन्नचत्वारिंशन्मुमुक्षवः प्रव्रजिताः। इत्थं युवामुनिनिष्पादनमनोरथः प्रेमसूरीश्वराणां सफलीभूतस्तद् ब्रह्मचर्यस्यैव प्रभावः।

**(६) शिष्यवर्गे ब्रह्मचर्यपालनोद्यताः** - शिष्याणां जीवनेऽपि ब्रह्मचर्यं सुविशुद्धं भवेदिति ते प्रायतन्त। 'विजातीयपरिचयो दूरेण वर्जनीयः। युष्माकमन्याः क्षतीरहं क्षमिष्ये, परन्तु ब्रह्मचर्यव्रतसम्बन्धिनीं स्वल्पामपि स्खलनामहं न क्षमिष्ये।' इति हितशिक्षां ते शिष्य-प्रशिष्येभ्यः पौनःपुन्येन दत्तवन्तः। ततस्तच्छिष्य-प्रशिष्या अपि सुविशुद्धं ब्रह्मचर्यं पालितवन्तः।

• **मुनिचन्द्रशेखरविजयो (पश्चात् पन्यासचन्द्रशेखरविजयः)** स्ववन्दनार्थमागतायाः स्वसांसा-रिकमातुरपि सम्मुखं न विलोकितवान् न वा भाषितवान्। ततो मात्रा प्रेमसूरीश्वराणां कथितं, 'मम पुत्रेण प्रव्रज्या गृहीता। अतो मयापि सार्धं स न भाषते। स मम सम्मुखमपि न विलोकयति, मया किमपराद्धम्?'

ततो पूज्यैर्मुनिचन्द्रशेखरविजय आहूतः। तैस्तस्मै मातृमनोरथपूरणार्थं कथितम्। ततो माता प्रमुदितवती। सा गृहं गता।

इतः पूज्यैर्मुनिचन्द्रशेखरविजयाय धन्यवाददानपुरस्सरं कथितं, 'चन्द्रशेखरविजय! त्वया सुष्ठु कृतम्, अहमीदृशं शिष्यमेवैच्छं, यः स्वमातुरपि सम्मुखं न पश्यति। मातुः समाधानार्थं तदग्रे मया तुभ्यं तया सार्धं भाषणाय कथितम्। परन्तु त्वत्प्रवृत्त्याऽहं सन्तुष्टोऽस्मि। त्वया न किमप्यनुचितं कृतम्।'

• **मुनिहेमचन्द्रविजयो (पश्चात् आचार्यविजय-हेमचन्द्रसूरिः)** यदा स्वसांसारिकभगिनीं प्रव्रज्याग्रहणार्थं प्रेरित-वानासीत् तदा पूज्यानामाज्ञया स स्वसमीपे मुनिमतिधन-विजयमुपावेशयत्।

• **मुनिहेमचन्द्रविजयः** पूज्याज्ञयाऽन्यनगरे चातुर्मासार्थं स्थितः। अन्यदा तेन पूज्यनिश्रावर्त्तिमुनीन् प्रति पत्रं लिखितं, 'मया हस्तलिखितं यत् कर्मप्रकृतिपदार्थसङ्ग्राहकं पुस्तकं तत्र वर्त्तते, तदत्र कर्मप्रकृत्यध्येत्रीभ्यः साध्वीभ्यो दानाय प्रेषणीयम्।' पूज्यैः पत्रं पठितम्। ततस्तै र्मुनिहेमचन्द्रविजयं प्रति पत्रं लिखितं, 'साध्वीभ्यः कर्मप्रकृतिपदार्थसङ्ग्राहकपुस्तकदानात् पश्चात् धृतसंयमजीवने हानिरपि संभविष्यति। ततः साध्वीभ्यः पुस्तकं न दातव्यम्। तव भगिनीसाध्व्यै यदि तद् दातव्यं तर्हि वयं





प्रेषयिष्यामः।' वस्तुतो मुनिहेमचन्द्रविजयेन स्वभगिनीसाध्वीकृते एव ततपुस्तकप्रेषणाय पत्रं लिखितम्। –

- दूरस्था अपि गुरुदेवाः स्वप्रशिष्यजीवने ब्रह्मचर्यं सुविशुद्धं स्यादिति सदैव प्रयतितवन्तः।
- योगवाहिसाधुसाध्वीनां योगक्रियाः पृथक् पृथक् कारणीया इति ते साग्रहं कथितवन्तः।

**गीतार्थता** - छेदग्रन्थानधीत्य य उत्सर्ग–संयोगेषु उत्सर्गमवलम्बते, अपवादसंयोगेषु चाप–वादमवलम्बते स गीतार्थः। लाभालाभौ विचार्य यः स्वल्पहानिं स्वीकृत्यापि महालाभकारिणीं प्रवृत्तिं करोति स गीतार्थः। प्रेमसूरीश्वरा अद्वितीयगीतार्था आसन्।

**(१) स्त्रीसंसक्तवासात्तु रात्रिविहारेऽल्पदोषः** - अन्यदा विहारं कृत्वा ते साधुभिः सह सन्ध्यासमये एकं ग्रामं प्राप्ताः। तत्र जैनेतरमन्दिरस्योपरिभागे ते स्थिताः। साधुभिः प्रतिक्रमणं कृतम्। तन्मन्दिरं महिलानामासीत्, रात्रौ तत्र मन्दिरे महिलाः प्रभुभक्तिं कर्त्तुमागताः। पूज्यैर्गृहस्थेभ्यः कथयित्वा ता निवारिताः। तथापि ताभिः प्रभुभक्तिः प्रारब्धा, तासां शब्दा मन्दिरोपरिभागवर्त्तिसाधूनां श्रवणगोचरमागताः। ततः पूज्याः साधुभिः सहान्यग्रामं प्रति प्रस्थिताः। शास्त्रेषु रात्रिविहारः स्त्रीसंसक्तवसतिवासश्च द्वावपि निषिद्धौ। ततो द्वावपि वर्जनीयौ। यदि द्वाभ्यामेकस्य वर्जनमशक्यं तर्हि स्त्रीसंक्तवसतिवासो वर्जनीयः, यतो स्त्रीसंसक्तवसति–वासापेक्षया रात्रिविहारोऽल्पदोषकृत्। इत्थं यो जानाति स गीतार्थः। गीतार्थवर्यैः पूज्यैरत एव रात्रिविहारो निर्णीतः। ग्रामजनैस्ते निवारिताः। पूज्यैः कथितं, स्त्रीसंसक्तवसतौ साधुभिर्वासो न कर्त्तव्य इति पारमेश्वर्याज्ञा, ततोऽस्माभिर्विहर्तव्यमेव। ग्रामजनैस्तत्स्थानतो महिला दूरीकृताः, तत एव पूज्यास्तत्र रात्रावुषिताः। यदि महिलास्ततो नाऽगमिष्यंस्तर्हि पूज्या अवश्यं रात्रिविहार–मकरिष्यन्। अनेन प्रसङ्गेन तेषां गीतार्थता सूच्यते।

**(२) बाह्याभ्यन्तरयोस्तपसोभ्यन्तरं तपोधिकम्** - 'एगभत्तं च भोयणं' इतिशास्त्रवचनानु–सारेण प्रेमसूरीश्वराणां प्रेरणया तेषां समुदाये सर्वेऽपि साधव एकाशनानि कुर्वन्ति स्म। मुनिजयघोषविजय–मुनिचन्द्रशेखरविजय–मुनिहेमचन्द्रविजयाद्या मुनयः सांसारिकावस्थायां तपसाऽपरिकर्मितदेहा आसन्, ततः प्रव्रज्याग्रहणादनन्तरं ते तपः कर्तुं नाऽशक्नुवन्। प्रातः नववादने क्षुधापीडितास्ते सुप्तवन्तः। मध्याह्ने एकाशनावसरे ते उत्थिवन्तः। ततः पूज्यैश्चिन्तितं, 'इमे नूतनसाधव एकाशनानि कुर्वन्ति परन्तु क्षुधाक्षामकुक्षयस्ते स्वाध्यायं कर्तुं न पारयन्ति, इयं तु हानिः।' ततः स्वाध्यायलाभमिच्छद्भिः पूज्यैर्नूतनमुनिभ्यः प्रथमालिकाऽनुज्ञाता। ततस्ते नूतन–मुनयः पादमुहूर्तेन प्रथमालिकां कृत्वा मध्याह्नं यावत् स्वाध्यायं कृतवन्तः। यदि शक्यं तर्ह्येकाशनं

स्वाध्यायश्च द्वावपि कर्त्तव्यौ। यदि द्वाभ्यामेकमेव शक्यं, तर्ह्यभ्यन्तरतपोरूपः स्वाध्यायः कर्त्तव्यः। इत्थं यश्चिन्तयति स गीतार्थः। गीतार्थवर्यैः पूज्यैरत एव नूतनमुनिभ्यः प्रथमालिकाऽनुज्ञा दत्त्वाऽपि तैः स्वाध्यायः कारितः। अनेन प्रसङ्गेनाऽपि तेषां गीतार्थता ज्ञायते।

**(३) शास्त्रोक्ताचारकर्तृत्वम्** - शास्त्राण्यधीत्य तदुक्ताचारान् यो न पालयति स केवलं ज्ञानभारं वहति न तु सद्गतिं प्राप्नोति, यथा चन्दनकाष्ठभारं वहमानो गर्दभः केवलं भारं वहति न तु चन्दनसुगन्धं प्राप्नोति तथा यो ज्ञात्वाप्याचारं न पालयति स केवलं ज्ञानभारं वहति न तु विपुलनिर्जरां लभते। यदुक्तं **श्री धर्मदासगणिभिः उपदेशमालायाम्**

'जहा खरो चंदणभारवाही, भारस्स भागी न हु चंदणस्स।
एवं खु नाणी चरणेण हीणो, नाणस्स भागी न हु सुग्गइए।।४२६।।'

**श्रीमुनिसुन्दरसूरिभि**रप्युक्तम्- अध्यात्मकल्पद्रुमग्रन्थरत्ने

'अधीतिमात्रेण फलन्ति नागमाः, समीहितैर्जीव सुखैर्भवान्तरे।
स्वनुष्ठितैः किन्तु तदीरितैः खरो, न यत् सिताया वहनश्रमात् सुखी।। १००।।'

प्रेमसूरीश्वरैर्न शुष्कं शास्त्रज्ञानं प्राप्तम्, शास्त्रज्ञानं तु तेषां जीवने परिणतमासीत्, ते शास्त्रेषु यद् यत् पठितवन्तस्, तद् तत् स्वजीवने आचारितवन्तः यथा-

- शास्त्रेषु तैर्पठितं, यत् साधुना नित्यमेकाशनानि कर्त्तव्यानि,
ततस्तैः प्रायो यावज्जीवमेकाशनानि कृतानि।
- तैः शास्त्रेषु पठितं यत् साधुना तृतीयपौरुष्यां सञ्ज्ञाभूमौ निहारार्थं गन्तव्यम्।
ततस्ते एकाशनं कृत्वा तृतीयपौरुष्यां तीव्रतापेऽप्यातप्तराजमार्गे
चलित्वा दूरवर्त्तिस्थण्डिल-भूमिमगच्छन्,
- यज्ज्ञानमाचारं न प्रसूते तज्ज्ञानं ज्ञानमेव न भवति, फलादायकत्वात्।

प्रेमसूरीश्वरैराचाराङ्गसूत्रे पठितं यदाहारकवलो मुखे दक्षिणपार्श्वाद् वामं पार्श्वं, वामपार्श्वाच्च दक्षिणं पार्श्वं न सञ्चारणीयः। ततस्ते कवलं मुखे इतस्ततो न। सञ्चारितवन्तः किन्तु गिलितवन्तः।

इत्थं शास्त्रोक्ताचाराः तेषां जीवनामलादर्शे प्रतिबिम्बिता अभवन्।

**गुणानुरागः** - परगुणेषु प्रमुदितमानसाः गुणमरालाः

प्रेमसूरीश्वराः स्वयं तु गुणमणिमण्डिता आसन्नेव, परन्तु गुणवतोऽन्यजनान् दृष्ट्वाऽपि ते प्रमोदं प्राप्नुवन्ति। ते गुणिषु मत्सरं न धरन्तिस्म। तेषां हृदयं प्रमोदभावनाभावितमासीत्। ते



परच्छिद्रान्वेषिणो नाऽभवन्, ते परगुणदर्शकाः परगुणरागिणः परगुणग्राहिणश्चाऽभवन्। ते परेषां दोषान् दृष्ट्वा तेषु द्वेषं नाधारयन्, परन्तु परेषां गुणान् दृष्ट्वा तेषु बहुमानं धारयन्ति। हंसो मानससरोजलं पिबति, काकस्त्वशुचिजले चञ्चुं क्षिपति। एवं गुणिमणिः गुणानुरागी गुणान् पश्यति, मत्सरी तु परदोषान् पश्यति। प्रेमसूरीश्वरा गुणानुरागिण आसन्। ते परदोषेषु चञ्चुपातं न कृतवन्तः।

• **"महाविदेहक्षेत्रस्य सन्तः विराजमानाश्च श्री गौतमस्वामिनः** - अन्यदा राजनगरे उस्मानपुरा-जैनसङ्घजिनालये श्रीसम्भवनाथस्वामिनः प्रतिष्ठामहोत्सवः आसीत्। तदा श्रीसङ्घविज्ञप्त्या तत्रोपाश्रये द्वौ प्रभावकावाचर्यौ स्वशिष्यपरिवारेण सह निश्राप्रदानार्थं समुपस्थितवन्तौ- (१) श्रीनेमिसूरीश्वरसमुदायनायकाः श्रीमदुदयसूरीश्वराः (२) श्रीदानसूरीश्वर-समुदायनायकाः श्रीप्रेमसूरीश्वराश्च,

तदा श्रीपालिसङ्घाग्रण्यस्तत्र वन्दनार्थमागताः, तैः श्रीमदुदयसूरीश्वराः वन्दिताः। ततस्तैः पृष्टं, 'भवतामभावे आयतावस्माकं क आधारः? कस्य मार्गदर्शनेनाऽस्माभि-राराधना कर्त्तव्या सङ्घसञ्चालनञ्च कर्त्तव्यम्?' तदा श्रीमदुदयसूरीश्वरैः प्रोक्तं, 'यूयं किमर्थं चिन्तां कुरुथ? पुरः पश्यत, तत्र महाविदेहक्षेत्रस्य सन्तो विराजमानाः सन्ति। आयतौ ते युष्माकमाधारा भविष्यन्ति। तेषां मार्गदर्शनं युष्माभिर्ग्राह्यम्।' पुरः श्रीप्रेमसूरीश्वरा विराजमाना आसन्, ते चतुर्थारकसंयमतुल्यं संयमं पालयन्ति। अत एव श्रीमदुदयसूरीश्वरैस्ते 'महाविदेहक्षेत्रस्य सन्तः' इत्युक्ताः। अनेन ज्ञायते यत् प्रेमसूरीश्वरा निर्मलमप्रमत्तञ्च चारित्रं पालितवन्तः।

ततः श्रीपालिसङ्घाग्रण्यः श्रीप्रेमसूरीश्वरान् वन्दितवन्तः। तैस्ते पृष्टाः, 'भवतामभावे आयतौ कः श्रीसङ्घस्य योग-क्षेमौ विधास्यति? अस्माकं समस्याः कः समाधास्यति? तदा श्रीप्रेमसूरीश्वरैरुक्तं, 'यूयं वृथा चिन्तां कुरुथ। अग्रे पश्यत तत्र, गौतमस्वामिनो विराजमानाः सन्ति। ते आयतौ युष्माकं योगक्षेमौ विधास्यन्ति। युष्मत्समस्याश्च समाधास्यन्ति। अग्रे श्रीमदुदयसूरीश्वरा विराजमाना आसन्। यथा श्रीवीरप्रभुचरणयोर्गौतमस्वामिनः समर्पिता बभूवु स्तथा श्रीमदुदयसूरीश्वराः श्रीनेमिसूरीश्वरचरणयोः समर्पिता आसन्। तेऽपि गौतमस्वामिन इव विनयवन्त आसन्। अत एव श्रीप्रेमसूरीश्वरैस्ते गौतमस्वामित्वेनोक्ताः।

अनेन ज्ञायते यत् प्रेमसूरीश्वरा गुणानुरागिण आसन्।

**रसनेन्द्रियविजेतृत्वम् - (१) नित्यमेकाशनं स्वल्पद्रव्यं स्वल्पसमयः-** प्रेमसूरीश्वरैः प्रायो यावज्जीवमेकाशनप्रत्याख्यानानि कृतानि। यावज्जीवं मिष्टान्न-पक्वान्न-शुष्कफलानि (सुको मेवो इति भाषायाम्) चार्द्रफलानि त्यक्तानि। चर्वणेनाऽऽहारस्य रसोऽनुभूयते। ततश्च रागो भवति, ततस्ते आहारं न चर्वन्ति, किन्तु गिलन्त्येव। ते मुहूर्तस्य सप्तमभागेनैकाशनमकुर्वन्। एकाशने ते पञ्चद्रव्याण्येवाऽभुञ्जन्। यदैकाशने ते भोजनं कुर्वन्ति तदैको मुनिस्तेभ्यः पञ्चसूत्रं श्रावयति। पञ्चसूत्रे सोपयोगिनस्ते

भोजनस्वादं नाऽविदुः। इत्थं भोजनसमयेऽपि ते जागरूका आसन्।



**(२) न रसनायाः स्वादनं** - अन्यदैकेन बालमुनिना पूज्येभ्यो मिष्टगोलिका दत्ता, तां च खादनार्थं विज्ञप्तिः कृता। पूज्यैर्निषिद्धम्, बालमुनिना निर्बन्धे कृते पूज्यैः सा मिष्टगोलिका कट्वौषधमिव गिलिता। बालमुनिरेतद् दृष्ट्वोक्तवान्, 'गुरुदेवाः! भवद्भिरेतत् किं कृतम्?' पूज्यैरुक्तम्, 'मिष्ट-गोलिकाया मुखे इतस्ततो भ्रमणेनाऽऽस्वादे गृह्यमाणे रागो भवति। ततो मया सा गोलिका गिलिता। एवं तवेच्छाऽपि पूर्णा मम च रागो न जातः।' बालमुनिः पूज्यानां रागभीरुत्वं दृष्ट्वा नतमस्तकोऽभवत्।

**(३) क्षारेऽपि मुद्गजले प्रसन्नता** - वार्धक्ये ते स्वास्थ्यकृते मुद्गजलपानं कुवन्ति स्म, मुद्गजलानयनपात्रकं मुनिगुणरत्नविजयो धौत्वा धावनजलं पीतवान्। अन्यदा तद्धावनजलं क्षारमासीत्। तस्मिन्नास्वाद्यमाने मुनिना ज्ञातं यन्मुद्गजलं क्षारमासीत्। पूज्यास्तत्क्षारमपि मुद्गजलं प्रसन्नतया पीतवन्तः, न च कश्चिदपि प्रतिभावं दर्शितवन्तः। ते मुद्गजलदायकगृहस्थाय मनस्यपि दुर्भावं न कृतवन्तः। मुनिनोक्तं, 'गुरुदेव! मुद्गजलं क्षारमासीत्, तथापि भवन्तः किं किञ्चिदप्यनुक्त्वैव तत् पीतवन्तः?' पूज्यैरुक्तम्, 'स्वास्थ्यकृतेऽहं दोषदुष्टं मुद्गलजलं पिबामि, क्षारं मुद्गजलं निन्दित्वा किमर्थं मयाऽधुना तत्पापस्य गुणाकारः कर्त्तव्यः?' गुरुदेवानां रसनिग्रहं ज्ञात्वा मुनेर्हृदये साश्चर्यं बहुमानं जातम्।

**(४) मुद्गजलं व्यञ्जनं च रसनाप्रतिकूलम्** - अन्यदा वार्धक्यवशतो बले क्षीयमाणे मुनिचन्द्रशेखरविजयेन पूज्याः पृष्टाः, 'गुरुदेवा! भवतां स्वास्थ्यकृते यदनुपानादिपथ्यमानीयते तत् किमनुकूलं प्रतिकूलं वा?' तदा पूज्यैः कथितं, 'एकतोऽहं स्वास्थ्यकृते दोषदुष्टमनुपानं गृह्णामि, ततो मया तस्य निन्दया प्रशंसया वा किमर्थं तस्य दोषस्य संस्कारः दृढः कर्त्तव्यः?' तथापि मुनिना भृशं निर्बन्धे कृते पूज्यैरुक्तं, 'मुद्गजलं तिक्तं भवति, व्यञ्जनञ्च क्षारं भवति,' मुनिना साश्चर्यमुक्तं, 'गुरुदेवाः! एतावन्तो दिवसा गतास्तथापि भवद्भिर्मह्यं किमर्थं न कथितम्?' पूज्यैरुक्तं, 'दोषसेवनेऽपि मया किमर्थमनुकूलता प्रतिकूलता गवेषणीया?' ततोऽनुपानगतप्रतिकूलतानिवारणाय मुनिना गृहस्थेभ्यः सूचितम्।

यदि मुनिना पूज्याः पृष्टा नाऽभविष्यंस्तदा पूज्याः कदाऽपि प्रतिकूलतां नाऽकथयिष्यन्, परन्तु समतया तामसहिष्यन्। अनेन प्रसङ्गेनाऽपि तेषां रसनेन्द्रियविजेतृत्वं ज्ञायते।

**(५) रसनास्वादविजये शास्त्रं शास्त्रार्थचिन्तनम्** - साधवोपि रसनाया रसे आसक्ता न भवेयुरिति विचिन्त्य पूज्या भोजनमण्डल्यां सर्वसामान्यमेकं गूढं प्रश्नं पृच्छन्तिस्म। साधवो भोजनसमये तदुत्तरं चिन्तयन्ति। ततस्ते



भोजनपदार्थेषु रागं न विदधति, तैः किं भुक्तमित्यपि ते न जानन्ति। इत्थं पूज्याः साधूनपि रसगृद्ध्या रक्षितवन्तः।

**(६) साधूनां स्वाध्यायप्रोत्साहनं-** रसनेन्द्रियविजेतारः पूज्याः साधून् स्वाध्याये प्रोत्साहनार्थमपि द्रव्यत्यागाभिग्रहान् गृहीतवन्तः। 'अमुकसाधवोऽमुकशास्त्राणि यावन्न पठेयुस्तावन्मया-ऽमुकद्रव्याणि न भोक्तव्यानि।' इत्यभिग्रहं तेऽनेकशो गृहीतवन्तः। अनेन द्वौ लाभौ जातौपूज्यानां रसनायाः रसनिग्रहः साधूनाञ्च स्वाध्याये रसवृद्धिः।

**निःस्पृहत्वम् - (१) न शिष्यः करणायोत्साहः-** प्रेमसूरीश्वरा निःस्पृहशिरोमणयः श्रमणा आसन्, आदौ ते कमपि संयमार्थं न प्रतिबोधितवन्तः। 'भवाटव्यां भ्रमतां जीवानामुपेक्षा न कर्त्तव्या, ते जिनधर्मे प्रतिबोधनीया इति साधोः परमं कर्त्तव्यं।' इति केनचित् सूचिते ते जीवान् प्रतिबोधयितुमारभन्त, परन्तु प्रतिबुद्धास्तांस्ते दीक्षाग्रहणार्थमन्यमुनीनां समीपे प्रेषितवन्तः। ते स्वस्य शिष्यान् कर्तुं नाऽभ्यलषन्। अत एव त्रिशताधिकश्रमणसार्थपतीनां तेषां स्वशिष्याः सप्तदशैव सञ्जाताः। इत्थं पूज्याः शिष्यस्पृहानिर्मुक्ता आसन्।

**(२) नोपधिपुस्तकादि सङ्ग्रहः-** पूज्याः परिहितवस्त्रातिरिक्तानि वस्त्राणि न धृतवन्तः। अन्यदैकस्मिन् ग्रामे तेषां चोलपट्टको भिन्नः। पूज्यदानसूरीश्वरैरुक्तं, 'प्रेमविजय! त्वमति-रिक्तामुपधिं न धारयसि, अधुनाऽस्मिन् ग्रामे कुतश्चोलपट्टक आनेतव्यः? तदैव कश्चिच्छ्रावको वस्त्रदानार्थमागच्छत्। स्वपुण्यप्रभावेण ग्रामेऽपि ते वस्त्रं लब्धवन्तः।

यः स्पृहां त्यजति स सर्वं प्राप्नोति। यः स्पृहयति तस्मात् सर्वं दूरमपसरति. यदुक्तं योगसारग्रन्थे-

'नार्थ्यते यावदैश्वर्यं, तावदायाति सम्मुखम्।
यावदभ्यर्थ्यते तावत्, पुनर्याति पराङ्मुखम्।।१४३।।'

तदा पूज्यदानसूरीश्वरैरुक्तं, 'प्रेमविजय! तव पुण्यप्रभावोऽचिन्त्यः।'

• प्रेमसूरीश्वरा विद्वच्छिरोमणय आसन्। तथापि ते एकमपि पुस्तकमेकामपि लेखिनीं च नाऽधारयन्। ज्ञानालयात् ते शास्त्राणि प्राप्य पठनान्तरं तानि तत्र प्रत्यर्पितवन्तः। लेखनावसरे प्राप्ते तेऽन्यसत्कां लेखिनीं गृहीत्वा लेखनकार्यसमाप्तौ तां प्रत्यर्पितवन्तः। ते पुस्तकानि लेखिनीर्न सङ्गृहीतवन्तः।

**(३) नामाऽऽशंसापि नैव -** प्रेमसूरीश्वराः स्वनामप्रसिद्धिमपि नाऽस्पृहयन्। तैरनेक-जिनालयेषु जिनप्रतिमानां प्रतिष्ठाः कृताः। तथापि तैः कुत्रचिदपि स्वनामपट्टकस्थापनाकरणार्थं कदाचिदपि गृहस्था न प्रेरिताः। पिण्डवाडा-सिरोडी-सान्ताक्रुझनगरेषु तैः जिनबिम्बानां प्रतिष्ठाः

कृताः, परन्तु तत्र कुत्रचिदपि तन्नामपट्टकं न दृश्यते।

**(४) पदाकाङ्क्षापि नैव** - प्रेमसूरीश्वराः पदमपि नाऽभ्यलषन्। गुरुवरैः प्रसह्य तेभ्यः पदं प्रदत्तम्। पूज्यदानसूरीश्वरा अनेकशश्चिन्तितवन्तो, 'मत्पश्चाद् गच्छसञ्चालनं कः करिष्यति? पदयोग्योऽपि प्रेमविजयः सूरिपदं न स्वीकरोति। ततः किं कर्त्तव्यम्?'

अन्यदा ते राधनपुरनगरे स्थिता आसन्, प्रेमविजयाः पत्तने ग्लानमुनिवैयावृत्त्यार्थं स्थिता आसन्, पूज्यदानसूरीश्वरैश्चिन्तितं, 'यदा यदाऽहं सूरिपदस्वीकारार्थं प्रेमविजयं कथयामि तदा तदा स नयने साश्रुणी कृत्वा निषेधयति। अधुना मयाऽऽज्ञाशस्त्रं प्रयोक्तव्यम्, तर्ह्येव स सूरिपदं स्वीकरिष्यति।' इत्थं विचिन्त्य तैः प्रेमविजयाः पत्रद्वारेण पत्तनादाहूताः। पत्रे तैराह्वानकारणं न लिखितम्, इतो वर्तमानपत्रेष्वपि तैः 'प्रेमविजयेभ्यः सूरिपदप्रदानं चैत्रशुक्लचतुर्दश्यां भविष्यति।' इति निवेदितम्, प्रेमविजयाः शीघ्रं राधनपुरं प्राप्ताः। गुरुदेवान् स्वस्थान् दृष्ट्वा ते स्वस्थीभूताः, पूज्यदानसूरीश्वरैः कथितं, 'प्रेमविजय! श्वस् त्वया सूरिपदं ग्राह्यमिति मे आज्ञा,' प्रेमविजयै-र्गुरुदेवानामाज्ञायाः प्रतीकारो न कृतः, तैः सा स्वीकृता, गुरुदेवाज्ञापालनाय तैः सूरिपदं स्वीकृतम्, ततस्ते 'सिद्धान्तमहोदधि-आचार्य-विजयप्रेमसूरीश्वरा इत्याख्यया' विख्याताः सञ्जाताः। सूरिपदप्रदानदिवसे एव सन्ध्यायां ते पत्तनं प्रति ग्लानमुनिप्रतिजागरणार्थं विहृतवन्तः। -

इत्थं प्रेमसूरीश्वराः पदप्राप्त्यर्थमपि निःस्पृहा आसन्

**(५) न शिष्याणां परिकरणं परिचरणं च** - अन्यदा विहारे ते एकं ग्रामं प्रातः प्राप्ताः। सान्ध्यासमये अग्रेतनं ग्रामं प्रति विहार आसीत्, मध्याह्ने एकाशनादनन्तरं पूज्याः स्थण्डिलभूमिं गतवन्तः। स्थण्डिलभूमिर् दूरे सन्ध्यासमये गन्तव्यस्थानदिशि चाऽऽसीत्। सञ्ज्ञाव्युत्सृजनातः पश्चात् पूज्यैः कश्चित् पृष्टः,'अग्रेतनग्रामः कियद्दूरे अस्ति?' तेनोक्तं, 'भवद्भिरर्धो मार्गोऽ-तिक्रान्तः। अधुना अर्ध एव गन्तव्यः।' ततः पूज्यैश्चिन्तितं, 'अधुना यद्यहमुपाश्रयं गमिष्यामि तर्हि सन्ध्यायां पुनरनेन मार्गेणैवाऽऽगन्तव्यम्। यद्यहमग्रेतनं ग्रामं प्रति चलिष्यामि तर्हि मम चलनाऽऽयासोऽल्पो भविष्यति।' एवं विचार्य तैरुपाश्रयं प्रति गच्छन् कश्चिद् गृहस्थ उक्तः, 'उपाश्रयस्थितमुनिभ्यस्त्वया कथनीयं यद् भवतां गुरुदेवा अग्रेतनं ग्रामं प्रति गतवन्तः। भवद्भिः सन्ध्यायां तत्राऽ गन्तव्यम्।' एवमुक्त्वा तेऽग्रेतनं ग्रामं प्रति प्रस्थिताः।



इतो गृहस्थेनोपाश्रयस्थितसाधुभ्यो गुरुदेवस-न्देशः कथितः। तदा मुनिजयघोषविजयो (पश्चात् आचार्यविजयजयघोषसूरिः) ज्वरेण पीडित आसीत्। गुरुदेवा एकाकिन एवाऽग्रेतनं ग्रामं प्रति प्रस्थिता इति श्रुत्वा स संस्तारकादुत्थितः। कल्पं परिधाय कम्बलं स्कन्धे निधाय दण्डं हस्ते आदाय 'ममोपधिर्भवद्भिः सन्ध्यायामानेतव्या।' इति शेष-मुनीन् कथयित्वा स उपाश्रयान्निर्गत्य शीघ्रं चलित्वा पूज्यान् प्राप्तवान्।

यदि स पूज्यान्न प्राप्स्यत् तर्हि ते एकाकिनोऽपि विहृत्याऽग्रेतनं ग्राममगमिष्यन्। 'मम सार्धं शिष्यैर्भवितव्यमेव शिष्यान् विना मम का शोभा? शिष्यान् विना मया न विहर्तव्यम्।' इत्यादिकं ते न चिन्तितवन्तः। यद्यपि तेषां शिष्य-प्रशिष्या उत्तमा भक्तिमन्तश्चासन्, तथापि ते कदाचिदपि शिष्येभ्यः सेवां नाऽभ्यलषन्, न च शिष्यकृतसेवायां ते स्पृहावन्तः। इत्थं ते शिष्यकृततत्सेवां प्रत्यपि निःस्पृहा आसन्।

**संयमप्रतिबद्धता** - पूज्या संयमैकनिष्ठा अभवन्।

(१) तेऽष्टप्रवचनमातृपालनेऽप्रमत्ता आसन्। गमनसमये ते सदैव चक्षुषा युगमात्रां भूमिं सम्यग् निरीक्ष्यैव चलितवन्तः। अत एव तेषां ग्रीवेषन्नतवती। गमनसमये तेऽन्यैः सह न भाषन्तेस्म।

(२) भाषणसमये ते मुखवस्त्रिकां करे गृहीत्वा मुखाग्रे स्थापयित्वैवाऽभाषन्त। मुखवस्त्रिकोपयोगं विना भाषणे जाते ते स्वमदण्डयन्।

(३) ते सदैव द्विचत्वारिंशद्दोषरहितां भिक्षां भुक्तवन्तः। विहारेऽपि जैनेतरगृहेभ्य आनीतं निर्दोषमेवाहारं ते भुक्तवन्तः।

(४) वस्तुग्रहणनिक्षेपणात् पूर्वं ते प्रत्युपेक्षितवन्तः प्रमार्जितवन्तश्च। निद्रायामपि पार्श्वपरिवर्त्तनसमये ते पूर्वं रजोहरणेन प्रमार्जितवन्तः। वातायनद्वाराणि प्रत्युपेक्ष्य प्रमृज्य चैव ते उद्घाटितवन्तः पिहितवन्तश्च।- एकदा राणकपूरे एकस्य धूलिधूसरवातायनस्य पिधानसमये तै समुज्ज्वलरजोहरणेन प्रमार्जितम्। ते एवं न चिन्तितवन्तो यद् 'वातायनप्रमार्जनेन ममोज्ज्वलं रजोहरणं धूल्या खरण्टिष्यते।'

(५) तैर्मनसा कस्यचिदपि कदाचिदपि दुष्टं न चिन्तितम्। प्रतिकूलाचरणं कुर्वतामप्युपरि ते दुर्भावं न कृतवन्तः।

(६) ते स्वल्पमेव भाषन्ते। अनावश्यकभाषणं मुखरत्वं च ते न कुर्वन्ति।

(७) कायेन ते सदैव निर्वद्यामेव प्रवृतिं कृतवन्तः, न सावद्याम्,

इत्थं तेऽष्टप्रवचनमातरं सुष्ठु पालितवन्तः।

सूरि प्रेम









(८) वार्धक्ये पादचारेणैव विहृतवतां तेषां यदा जङ्घाबलं क्षीणम्, ततस्ते विहारं कर्तुं नाऽशक्नुवन्। ततः साधवः स्ट्रेचरेण तान् वोढ्वा विहारं कृतवन्तः। तुल्योत्सेधाश्चत्वारः साधवः स्ट्रेचरेण तान् त्रिकोशान् यावद् वोढवन्तः। ततः परे तुल्योत्सेधाश्चत्वारः साधवस्त्रिकोशान् यावत् स्ट्रेचरेण तान् वोढवन्तः। ततः परे तुल्योत्सेधाश्चत्वारः साधवस्त्रिक्रोशान् यावत् स्ट्रेचरेण तान् वोढवन्तः। ततः परे तुल्योत्सेधाश्चत्वारः साधवस्त्रीन् त्रीन् क्रोशान् यावत् स्ट्रेचरेण तान् वोढवन्तः। ते साधवः स्वोपधिवहनपूर्वं स्ट्रेचरं वोढवन्तः। वहमानसाधूनामानुकूल्यार्थं मुनिचन्द्रशेखरविजयेनैकः कर्मकरो नियुक्तः यो वोढृसाधूनां घटान् दण्डांश्च वहति। एकदा पूज्यैः स दृष्टः। तैः पृष्टं, 'कोऽयम्? केषां घटदण्डानयं वहति?' मुनिचन्द्रशेखरविजयेन वस्तुतत्त्वं प्रकटितम्। पूज्यैरुक्तं, 'यद्येवंप्रकारमसंयमं कृत्वा साधवो मां स्ट्रेचरेण वक्ष्यन्ति तर्हि मया विहारो न कर्तव्यः। अहमेकस्मिन् स्थाने स्थिरवासं करिष्यामि।' मुनिचन्द्रशेखरविजयेन स कर्मकरो मुत्कलितः, ततः साधवो घटदण्डादिसर्वोपधीन् वोढ्वा स्ट्रेचरं वोढवन्तः। इत्थं प्रेमसूरीश्वरा ईषदप्यसंयमं न कृतवन्तः, न चान्यकृतमसंयममसहन्त। ते उग्रसंयमिन आसन्।

(९) प्रेमसूरीश्वराणां साधवो विहारे उपधीन् स्वयं वोढवन्तो न कर्मकरैर्वाहितवन्तो न वा वाहने प्रेषितवन्तः। प्रेमसूरीश्वराणां साधवो यस्मिन्नुपाश्रये स्थितवन्तस्तत्र रात्रौ परै ज्योतिर्न प्राज्ज्वाल्यन्त। 'विहारे न कर्मकरः उपाश्रये च न ज्योतिः' इति प्रेमसूरीश्वरसमुदायस्य विशेषताऽऽसीत्, अनेनाऽपि प्रेमसूरीश्वराणां संयमप्रेम ज्ञायते।

असंयमभीरवः पूज्याः समयदर्शकयन्त्रं न धृतवन्तः, यतस्तत्र वायुकायविराधना भवति।

(१०) वार्धक्ये प्रेमसूरीश्वरा भ्रमद्वायुव्याधिना पीडिताः। पीडाशामनार्थमेक एवोपायः सफलोऽभवत्। उष्णजलभृतदृतितापेन भ्रमद्वायुपीडाऽशाम्यत्, तथापि तापार्थं ते आधाकर्मदोषदुष्टमुष्णजलं नोपयुक्तवन्तः, परन्तु होटलेषु 'चहा'निष्पादनार्थमुष्णीकृतं जलं साधुभिरानाय्य तद्दृतौ क्षिप्त्वा, तया ते पीडितावयवं तापितवन्तः। इत्थं पीडाशामनार्थमपि तेऽसंयमं नाऽऽसेवितवन्तः।

(११) वार्धक्ये जङ्घाबलक्षीणे डोलिवाहकासंयमिमनुष्यकृतासंयमदोषभीरवस्ते डोलिकोपयोगं न कृतवन्तः। (डोलिः- दण्डालम्बितरज्जुनियन्त्रितासनस्थनरस्य वहनार्थमुप-

युज्यमानं साधनम्। तां द्वौ नरौ वहतः।)

(१२) शिष्यप्रशिष्याणां जीवनेऽप्यसंयमो न प्रविशेदिति ते प्रयत्नशीला आसन्, पिण्डवाडानगरे तेषामेकः शिष्यः कश्चिद् भक्तं कथितवान्, 'दर्भावत्यामुपाश्रयो निर्माणाधीनोऽस्ति, तदर्थं युष्माभिर्धनविनियोगः कर्त्तव्यः।' प्रेमसूरीश्वरैस्तच्छ्रुतं भक्तश्रावके गते तैः शिष्यायोक्तं, 'इत्थं धनविनियोगप्रेरणां कुर्वाणस्त्वं भवसागरे निमङ्क्ष्यसि। साधुना गृहस्थेभ्यो धनं न याचनीयम्, गृहस्थेभ्यो धनयाचनेन साधुः स्वसंयमं सातिचारं करोति।'

**सहनशीलता - (१) वपुर्वेदनायामपूर्वः समभावः -** मध्याह्ने एकाशनादनन्तरं स्थण्डिलभूमिगमनावसरे ते छायायां न चलितवन्तः, परन्त्वातपे एव चलितवन्तः। तदा ते राजहंससदृशगत्या शनैः शनैरचलन् न तु शीघ्रम्। एकदा वर्तमानपत्रेष्वेवमुदन्तो मुद्रितः, 'यदि भवता राजनगरस्य रिलिफरोडमध्ये मध्याह्ने तीव्रातपे पादत्राणरहितः शनैः शनैश्चलन्-कोऽपि मुनिर्दृष्टस्तर्हि स प्रेमसूरीश्वरो ज्ञेयः।' इति।

**(२) वायुकायविराधनां मा कुरु -** वार्धक्ये हृदयरोगेण यदा ते आक्रान्तास्तदा तेषां स्वास्थ्यकृते एकः साधुर्वस्त्राञ्चलेन वायुं प्रेरितवान्। तदाऽसह्यपीडया पीडिताः सन्तोऽपि ते साधुं निषिध्योक्तवन्तः, 'एवंकरणनेन वायुकायविराधना भवति। अतो मैवं कुरु।' इत्थं मारणान्तिकपीडावसरेऽपि तेऽसंयमं निषिध्य समतया पीडां सोढवन्तः।

**(३) अभ्याख्यातृजनेपि न दुर्भावः -** गृहस्थकृतां मानहानिं ते समतया सोढवन्तः, शिष्य-प्रशिष्यादिकृतमपमानमपि ते समतया सोढवन्तः। तेऽपमानकर्त्तरि कदाचिदपि दुर्भावं न कृतवन्तः। ते केषाञ्चिदपि शत्रुर्नासीत्, ततस् तेषामपि कोऽपि शत्रुर्नाऽऽसीत्, यतस्ते कस्यचिदप्यशुभं न कृतवन्तो न वा चिन्तितवन्तः।

केचिदसन्तुष्टास्तान् प्रति द्वेषिण आसन्। तैर्वर्तमानपत्रेषु प्रथमपत्रे बृहदक्षरैर्मुद्रितं, 'महामृषावादी आचार्यविजयप्रेमसूरीश्वरः।' केनचिच्छ्रद्धालुश्रावकेनैतत् पठित्वा पूज्येभ्य उक्तं, 'अस्माभिरस्योत्तरं देयम्।' तदा पूज्यैः समतयोक्तं, 'अस्माभि र्न कञ्चिदप्युत्तरं देयम्। वर्तमानपत्रगतोदन्तेन नाऽहं मृषावादी भवामि। श्वा यं प्रति भषति तस्य किमपि न हीयते, परन्तु शुन एव कण्ठः शुष्यति, एवं येनाऽऽभ्याख्यातं स एव दोषदुष्टोऽभवन्नाऽहम्।' इत्थमपमानकटुजलमपि ते मधुरजलमिव प्रसन्नतया पीतवन्तः। तेषां हृदयं द्वेषग्रस्तं नाऽभवत्।

**(४) नापमानाद्भीतिः-** यदा ते पिण्डवाडानगरे चातुर्मासार्थं प्रवेशं कृतवन्तस्तदा तेषां स्वागतयात्रायां केनचित् पत्राणि विकीर्णानि



# Guru Premsuri



येषामुपरि लिखितमासीत्, 'श्रीसङ्घविज्ञप्तिं विना प्रेमसूरीश्वराश्चातुर्मासार्थमागताः।' श्रीसङ्घाग्रण्यः पत्राणि पठित्वा भयभीताः सन्तः पूज्यानामग्रे क्षमां याचितुमागताः। तदा पूज्यैरुक्तं, 'युष्माभिश्चिन्ता न कर्तव्या। ईदृशाणि पत्राणि दृष्ट्वा युष्माभिर्न भेतव्यम्, युष्माभिर्मह्यं विज्ञप्तिः कृतास्ति अतोऽहमवश्यमत्र चातुर्मासं करिष्यामि। पत्रगताऽपमानेन क्रुद्धोऽहमितो विहृत्याऽन्यत्र चातुर्मासं करिष्यामीति युष्माभिर्न शङ्कनीयम्। यूयं स्वस्थीभवत।' एवंप्रकारां मानहानिमपि ते समतयाऽसहन्त, परकृताक्षेपांस्ते नाऽगणयन्।

विषमपरिस्थितावपि तेषां मनःस्थितिस्तु समैवाऽभवत्। शारीरिकमान-सिकप्रतिकूलतासु ते न विचलितवन्तः। मेरुवन्निष्कम्पा भूत्वा ते सहर्षं सर्वमसहन्त।

**स्वाध्यायसाधना** - (१) ते पञ्चचत्वारिंशदागमानधीतवन्तः। तत्कालीनं सर्वं श्रुतज्ञानं तेऽवगाहितवन्तः। अत एव ते प्रावचन्याख्यप्रथमप्रभावका आसन्।

ते शास्त्राणि न केवलमधीतवन्तः, परन्तु चित्ते जीविते च धृतवन्तोऽपि। ते तत्कालीन-सर्वजिनवाङ्मयपारदृश्वान आसन्। अत एव ते बहुश्रुता आसन्, शिष्यप्रशिष्या अप्यवसरे तान् शास्त्रपाठान् पृष्टवन्तः।

(२) ते कर्मसाहित्ये निष्णाता आसन्, प्रभूतं पुरुषार्थं कृत्वा तैः 'कर्मप्रकृतिः' नामकं ग्रन्थं स्वयमधीतवान्। कर्मप्रकृतेरध्ययनं यदनेकवर्षैः स्थगितमासीत्, तत् तैः प्रारब्धम्, तैरनेकसाधु-श्रावकेभ्यः कर्मप्रकृतिग्रन्थः पाठितः, सम्प्रति कर्मप्रकृतिग्रन्थाध्ययनं यत् सर्वत्र दृश्यते तत् तेभ्यः



प्रवृत्तम्, तैः कर्मग्रन्थ-कर्मप्रकृतिग्रन्थपदार्थाः कण्ठस्थीकृताः, ते मध्यरात्रावुत्थाय तेषां पाठं कृतवन्तः। ते कर्मग्रन्थान् कर्मप्रकृतिग्रन्थं च पुस्तकं विनैव पाठयन्ति स्म।

(३) ते साधूनपि स्वाध्यायार्थं भृशं प्रेरितवन्तः। ततस्तेषां साधवः सदा स्वाध्यायनिरता अभवन्। उपाश्रयवातावरणविलोकनेनैवमभासत यत् स्वाध्याययज्ञ एव प्रारब्धः।

(४) वार्धक्येऽपि ते स्वयं रात्रिस्वाध्यायं कृतवन्तः। साधूनपि रात्रिस्वाध्यायार्थं ते भृशं प्रेरितवन्तः। रात्रौ प्रतिक्रमणसमाप्तेरनन्तरं ते 'साधवः किं रात्रिस्वाध्यायं कुर्वन्ति, वार्तालापं कुर्वन्ति, निद्रां वा कुर्वन्ति?' इति निरीक्षणार्थमुपाश्रयेऽटितवन्तः। मुनिचन्द्रशेखरविजयः प्रत्यहं पञ्चभिर्मुहूर्त्तैश्चतुःसहस्रगाथानां रात्रिस्वाध्यायमकरोत्, मुनिहेमचन्द्रविजयः प्रत्यहं सप्तभिर्मुहूर्त्तैः कर्मग्रन्थ-कर्मप्रकृति-ग्रन्थपदार्थानां रात्रिस्वाध्यायमकरोत्।

• दिवा रात्रौ चोपाश्रये स्वाध्यायस्य घोषोऽश्रूयत। स्वाध्यायः प्रेमसूरीश्वराणामतीव प्रिय आसीत्। अत एव ते केनचित् सह वृथा वार्त्तालापं न कृतवन्तः। ते सदैव स्वाध्यायमग्ना अभवन्। साधवोऽपि स्वाध्यायमग्ना भवेयुरिति ते सदैवाऽवाञ्छन्। यथा यथा साधूनां स्वाध्यायोऽवर्धत तथा तथा प्रेमसूरीश्वराणामानन्दोऽवर्धत।

(५) शासनरक्षाध्येयेन प्रकाश्यमाने साप्ताहिके मुनिजम्बूविजयः (पश्चात् आचार्यविजय-जम्बूसूरिः) लेखानलिखत्। पाठकवर्गे स लब्धप्रतिष्ठ आसीत्। एकदा पूज्यैः स उक्तः, 'अधुना यदि त्वं लेखान् लेखिष्यसि तर्हि शास्त्राणामध्ययनं कदा करिष्यसि? शास्त्रज्ञानं साधोः रिक्थम्। अतस्त्वया लेखलिखनं त्यक्त्वाऽऽगमज्ञान-प्राप्त्यर्थं प्रयतनीयम्।' मुनिना गुर्वाज्ञा सहर्षं स्वीकृता, तेन स 'आगमप्रज्ञो'ऽभवत्।

(६) उज्झानगरे मुनिराजशेखरविजयेन (पश्चात् आचार्यविजयराजशेखरसूरिणा) भवभावना-ग्रन्थश्लोकानां भावानुवादः कृतः। पन्न्यासकान्ति-विजयेन तस्य प्रकाशनकृते स वीरशासन-मासिककार्यालये प्रेषितः। प्रेमसूरीश्वरैरेतज्ज्ञात्वा पन्न्यासकान्तिविजयस्योपरि पत्रे लिखितं, 'यदि मुनिराजशेखरविजयो बाह्यप्रवृत्तौ योजितस्तर्हि स तलस्पर्शिशास्त्राभ्यासं कर्त्तुं नैव



शक्ष्यति,'पन्न्यासकान्तिविजयेन स भावानुवादः प्रत्यानायि।

इत्थं प्रेमसूरीश्वराः शिष्याणां स्वाध्यायार्थमपि चिन्तनशीला प्रयत्नशीलश्चासन्।

**नम्रता - (१) गुणग्रामभृता अपि लघुभूता -** प्रेमसूरीश्वराः शिष्यपरिवारेण सहाऽहमदनगरे चातुर्मासं स्थिताः। चातुर्माससमाप्तेरनन्तरं कार्त्तिकशुक्लषष्ठ्यां पूज्यानां दीक्षातिथिरागता, तदा प्रवचने मुनिभिस्तेषां गुणानुवादः कृतः। मुनिभिरेतत्पूज्यानां न ज्ञापितम्। प्रवचनसमये उपाश्रये पूज्यैः साधवो न दृष्टाः, ततस्तैः समीपवर्त्तिसाधुः पृष्टः, 'मुनयः कुत्र गताः?' साधुना कथितं, 'अद्य भवतां दीक्षतिथिरस्ति, अतः प्रवचने मुनिभिर्भवतां गुणानुवादः क्रियते। तच्छ्रोतुं सर्वे मुनयो गताः।' एतच्छ्रुत्वा पूज्यानामानन्दो नाऽभवत्। ते उदासीना अभवन्। अपराह्णे वाचनायां तैर्मुनय उक्ताः,'दोषभरभृतस्य मे गुणानुवादं कृत्वा युष्माभिरनुचितं कृतम्, गुणानुवादस्तु हरिभद्रसूरि-हेमचन्द्रसूरि-हीरसूरि-महोपाध्याययशोविजयादीनां गुणग्रामभृतानां पूर्वपुरुषाणां कर्तव्यः।' अनेन प्रसङ्गेन तेषां नम्रता-लघुते ज्ञायेते।

गुणशिखरस्थिता अपि ते स्वं गुणरिक्तममन्यन्त इति तेषां लघुताऽऽसीत्। ते स्वज्ञान-शिष्यपरिवार-पद-प्रतिष्ठादीनां गर्वं न कृतवन्तः। सामान्यतो भारभृतं वस्तु गुरुभूतमस्ति। पूज्यास्तु गुणग्रामभृता अपि लघुभूता आसन्निति महदाश्चर्यमेतत्। यो नम्रो भवति स एव महानस्ति। यो गर्वाध्मातो भवति स तु क्षुद्रोऽस्ति। पूज्या महान्त आसन्। अत एव ते नम्रा आसन्। पूज्याः स्वप्रशंसां स्वयं न कृतवन्तः, परकृतां तां न श्रुतवन्तः, परे तां कुर्युरिति ते नाऽभिलषितवन्तश्च।

(२) अन्यदा प्रेमसूरीश्वराणां प्रशिष्या आचार्यविजययशोदेवसूरीश्वराः पूज्यान् वन्दित्वा स्वासनं प्रति गताः। तदा पृष्ठतः पूज्यैर्हस्तयोरञ्जलिः कृता, केनचित् साधुना पूज्याः पृष्टाः, 'गुरुदेवाः। भवद्भिः प्रशिष्याचार्यान् प्रति पृष्ठतोऽञ्जलिः किं कृतः?' तदा पूज्यैर्भाषितं, 'यशोदेवसूरेर्हृदये देव-गुरून् प्रत्यप्रतिमो बहुमानो विद्यते। यथा विंशतिस्थानकाराधनया तीर्थकरत्वमवाप्यते तथा मतान्तरेण देव-गुरून् प्रति तीव्रबहुमानेनाऽपि तीर्थकरत्वमवाप्यते। अतोऽहं मन्ये यशोदेवसूरिस्तीर्थकर-जीवोऽस्ति। ततो मया तत्पृष्ठतः कराञ्जलिः कृतः।'





अनेन प्रसङ्गेन ज्ञायते यत् पूज्याः स्वप्रशिष्यमपि स्वस्मादधिकगुणवन्तं मन्वाना आसन्। अनेन पूज्यानां हृदयस्थलघुता-गुणानुराग-प्रमोदभावना-गुणदृष्ट्यादि-गुणा व्यज्यन्ते।

**ग्लानसेवा** - (१) प्रेमसूरीश्वराणां जीवने स्वाध्याय-वैयावृत्त्ययोः सुभगः समन्वय आसीत्। वैयावृत्त्येन तीर्थकर-नामकर्म बध्यते, यदुक्तमुत्तराध्ययने सम्यक्त्वपराक्रमा-ध्ययनं २९ तमे सूत्रे, 'वेयावच्चेणं भंते! जीवे किं जणयइ? वेयावच्चेणं तित्थयरनामगोअं कम्मं निबंधइ।।४५।।'

वैयावृत्त्यमप्रतिपाती गुणः। यदुक्तं पुष्पमालायां -

वेयावच्चं नियय, करेह उत्तमगुणे धरंताणं।
सव्वं किर पडिवाई, वेयावच्चं अपडिवाई।।४२३।।

• मुनिना सततं वैयावृत्त्यं करणीयम्, द्वयोर्वैयावृत्त्यकार्ययोर्मध्ये समये प्राप्ते स्वाध्यायः कर्त्तव्यः। यदुक्तं पुष्पमालायां-

वेयावच्चे अब्भुज्जएण तो वायणाइ पंचविहो।
विच्चम्मि य सज्झाओ, कायव्वो परमपयहेऊ।।४२७।।

प्रेमसूरीश्वरा अपि स्वजीवने वैयावृत्त्यं प्रधानीकृतवन्तः। अत एव ते हार्दिकभावपुरस्सरं सोल्लासं वैयावृत्यं कृतवन्तः। ते ग्लानमुनीनां वैयावृत्त्ये विशेषेण तत्परा अभवन्। 'जो गिलाणं पडिसेवइ सो मं मन्नइ।' इति शास्त्रवचनं पठित्वा ते सदैव ग्लानसेवार्थमुद्यता अभवन्, लघुपर्यायेऽपि। ते स्वयं ग्लानमुनीनां वैयावृत्त्यं कृतवन्तः। वृद्धपर्याये ते शिष्यैर्ग्लानमुनीनां वैयावृत्त्यं कारितवन्तः, ते समुदाय-गच्छ-पक्षादिभेदं विना सर्वेषां ग्लानमुनीनां वैयावृत्ये धृतोत्साहाः समभवन्।

(२) ग्लानसेवार्थं ते कस्यचिन्निमन्त्रणं नाऽपेक्षितवन्तः। कञ्चिन्मुनिं ग्लानं श्रुत्वा ते स्वयं शीघ्रं तत्र प्राप्य ग्लानसेवालाभप्रदानार्थं विज्ञप्तिं कृतवन्तः। यदि वास्तव्याः साधव एवं कथयेयुः, 'वयं ग्लानसेवां करिष्यामः। अस्माकमन्यस्य कस्यचिदावश्यकता नास्ति।' तर्हि पूज्याः ग्लानस्य सुखसातं पृष्ट्वा स्वस्थानमागच्छन्ति स्म। यदि वास्तव्यसाधवो ग्लानसेवार्थमप्रत्यलाः स्युः, पूज्यकृतग्लानसेवालाभप्रदानविज्ञप्तिञ्च स्वीकुर्युस्तर्हि स्वीयानि सर्वकार्याणि गौणीकृत्य पूज्यास्तत्र स्थित्वा, ग्लानसेवया स्वस्य समयः सफलीभवतीति विचिन्त्य ते सानन्दं सोत्साहं ग्लानसेवां कृतवन्तः। ग्लानस्य सेवां कृत्वा तं च स्वस्थीकृत्यैव ते



निवृत्तवन्तः। ते न केवलं ग्लानस्य शारीरिकशुश्रूषां कृतवन्तः, परन्तु तस्य मनोऽपि प्रसन्नं कृतवन्तः। ते ग्लानस्याऽनुकूलीभूय तत्सेवां कृतवन्तः।

(३) यदा सूरिपदप्रदानार्थं गुरुभिस्ते पत्तनाद् राधनपुरमाहूतास्तदा पत्तने ते ग्लानमुनि-प्रतिजागरणार्थमेव स्थितवन्तः। सूरिपदप्रदानानन्तरमपि ते ग्लानसेवां न विस्मृतवन्तः। सूरिपदा-रोहणदिने सन्ध्यायामेव ते ग्लानसेवार्थं पत्तनं प्रति विहृतवन्तः। अनेन प्रसङ्गेन ज्ञायते यत्तेषां जीवने ग्लानसेवायाः प्रभूतं महत्वमासीत्।

(४) 'मिष्टान्नादिभोजनकारिणा पाचनकृतेऽवश्यमुद्यमः कर्त्तव्यः, अन्यथा तस्याऽजीर्णं स्यात्, एवं ज्ञानिनाऽपि ज्ञानपरिणमनकृतेऽवश्यं वैयावृत्त्यं कर्त्तव्यम्, अन्यथा तस्य ज्ञानं परिणतं न स्यात्, इति विचिन्त्य प्रकृष्टज्ञानिनोऽपि ते वैयावृत्त्ये सोद्यमा अभवन्, ते एवं न चिन्तितवन्तः,'अहं महाज्ञानी, अतो मया वैयावृत्त्यं न करणीयम्, वैयावृत्त्यं त्वल्पज्ञानिना कर्त्तव्यम्' इति।

ग्लानसेवया तेषां ज्ञानं परिणतम्, अत एव महाज्ञानेन सह ते उग्रसंयममपि धृतवन्तः। ज्ञानस्य ईषदप्युत्सेकस्तेषां जीवने नाऽऽसीत्।

**वचनसिद्धता** - तेषां मुखाद् यानि वचनानि निरगच्छन्, तानि तेषां ब्रह्मचर्यचारित्र-प्रभावेणावश्यं सफलान्यभवन्। तेऽमोघवचना आसन्।

(१) कस्मिंश्चिन्नगरे जिनदासाख्यो युवाऽवसत्। स प्रभूतोद्यमेनाऽपि नमस्कारमहामन्त्रं नाऽवधृतवान्, तस्य पितृभ्यां स पूज्यानां पार्श्वं समानीतः ताभ्यां तस्य परिस्थितिः कथिता। पूज्यैस्तस्य मस्तके वासनिक्षेपं कृत्वोक्तं, 'अद्यप्रभृति त्वयाऽत्रागत्य पठितव्यम्।' तेन तथाकृतम्। पूज्यानां वचनं फलितम्। द्विमासाभ्यां तेन पञ्चप्रतिक्रमणसूत्राणि कण्ठस्थीकृतानि। ततः स प्रव्रजितः।

(२) यथा कुशलः सुवर्णकारो दर्शनमात्रेण जात्यं सुवर्णं जानाति, तथा पूज्या अपि जनस्य दर्शनमात्रेण तस्य संयमग्रहणयोग्यतां जानन्ति। ततस्ते योग्यानेव संयमग्रहणार्थं प्रेरणां ददति स्म ते यान् संयमग्रहणार्थं प्रेरितवन्तस्तेऽवश्यं प्रव्रजितवन्तः। प्रेरणार्थमपि ते बहु न भाषितवन्तः। तेषां मुखान्निर्गतान्येकद्विप्रेरणावाक्यान्येव जनस्य हृदयं जीवनञ्च परिवर्त्तयन्ति।

हस्तेन क्षिप्ता गोलिका लक्ष्यं न विध्यति। यन्त्रसाहाय्येन क्षिप्ता गोलिका लक्ष्यं विध्यति। एवं चारित्रबलं विना प्रोक्तानां वचनानां कोऽपि प्रभावो न भवति। चारित्रबलपूर्वकं भाषितानि स्वल्पान्यपि वचनानि जनस्य जीवनं परिवर्त्तयन्ति। तेषां दृष्टिर्यस्मिन् स्थिराऽभवत् सोऽवश्यं

प्रव्रज्यामादत्ते एव।

(३) न केवलं तेषां वचनैः, परन्तु तेषां दर्शनमात्रेणाऽपि जनस्य जीवनं परिवर्त्तते पूज्यैर्निपाणीनगरे चातुर्मासं कृतम्। तत्र श्रीसङ्घकार्यालये एको जैनेतरो लिङ्गायतज्ञातिजनो व्यवस्थापक आसीत्। तस्य पुत्रस्तस्य धर्मे सन्न्यासं जिघृक्षुरासीत्। स स्वधर्मेऽतीवरागी परधर्मे च तीव्रद्वेष्यासीत्, पित्रा तस्मै कथितं, 'अस्माकं नगरे महान्तो जैनाचार्याः प्रेमसूरीश्वरा आगताः। त्वं तेषां दर्शनार्थं व्रज।' परन्तु स्वधर्मरागी स पितुर्वचनं न स्वीकृतवान्। पिता तं पुनः पुनः प्रेरितवान्। तथापि स स्वाग्रहं न त्यक्तवान्। चातुर्मासं समाप्तम्। पूज्यानां विहारो निर्णीतः। पिता पुत्राय कथितवान्, 'श्वो जैनाचार्याणां विहारोऽस्ति। ततो यद्यपि तुभ्यं न रोचते तथापि मम प्रीतिकृते त्वमद्य तेषां दर्शनार्थं व्रज' ततः सोऽनिच्छन्नपि पितृसन्तोषार्थं जैनोपाश्रयं गतः। जैनोपाश्रयद्वारस्थितेन तेन पट्टस्थाः पूज्या दृष्टाः। ब्रह्मचर्यतेजसा देदीप्यमानं पूज्यानां मुखारविन्दं दृष्ट्वा तेन मनसि निर्णीतं, 'अहमेषां समीपे एव प्रव्रजिष्यामि।' इत्थं यो जैनधर्मस्यातिविरोध्यासीत्, स पूज्यानां दर्शनमात्रेण जैनधर्मानुरागीभूय प्रव्रजितः। स मुनिगुणानन्दविजय इति नाम्ना प्रसिद्धो जातः। शास्त्राणां तलस्पर्शिज्ञानं प्राप्य सोऽग्रे सूरिपदं प्राप्याऽऽचार्यविजयगुणानन्दसूरिर्जातः।

इत्थं पूज्यानां दर्शनमपि जनानां जीवनं परिवर्त्तयति।

ते यान् शिष्यान् कथितवन्तो यत् 'त्वयाऽयं ग्रन्थः स्वयं पठितव्यः।' इति ते तं ग्रन्थं स्खलनां विना सुष्ठु पठितवन्तः। ते दुर्बोधस्थानान्यपि वचनपालनाप्तपूज्यकृपया सम्यग्ज्ञातवन्तः।

तेषां वचनपालनमहिम्ना मुनिजयघोषविजयः (सम्प्रति गच्छाधिपतिराचार्यविजयजयघोष सूरीश्वराः) संस्कृत-प्राकृतभाषे पठनं विना ज्ञातवान्।

एवं पूज्यानां वचनानां माहात्म्यम-चिन्त्यमासीत्।

**श्रमणसर्जनम्** - प्रेमसूरीश्वरैरुत्तमश्रमणानां सर्जनं कृतम्, इतः शतवर्षात् पूर्वं पूज्यदानसूरीश्वरसमुदाये चत्वारः साधव आसन्, प्रेमसूरीश्वरकृतश्रमण-सर्जनप्रभावेण समुदायो वृद्धिमासदत्। प्रेम-सूरीश्वरस्वर्गमनसमये समुदाये त्रिशताधिकसाधव आसन्, अधुना प्रेमसूरीश्वरसमुदाये सहस्राधिकश्रमणाः सन्ति। प्रवचनं विना प्रेमसूरीश्वरैः संयमप्रभावेण श्रमणाः सृष्टाः। इत्थं पूज्यानां पुण्यप्रभावेण समुदाये सहस्राधिकश्रमणा जाताः।





प्रेमसूरीश्वरा दीक्षादानादनन्तरमपि वाचना-शास्त्राभ्यासऽऽसेवनशिक्षादिभिः साधून् सुष्ठु निष्पादिवन्तः। ते साधून् सर्वगुणेषु कुशलान् निर्मितवन्तः। ते साधून् विशुद्धसंयमपालनार्थं पुनः पुनः प्रेरितवन्तः।

अन्यदा केनचित् पूज्या पृष्टाः, 'कलौ श्रीसङ्घस्योन्नतेः क उपायः?' पूज्यैः सप्ताक्षरैरुत्तरो दत्तः, पञ्चाचारपालनम्।' यथा यथा पञ्चाचारपालनं श्रीसङ्घे प्रवर्त्तिष्यते तथा तथा श्रीसङ्घस्योन्नतिर्भविष्यतीति ते पूज्याः दृढतयाऽमन्यन्त। ते स्वयं पञ्चाचारं सुष्ठु पालितवन्तः। ते परानपि पञ्चाचारपालनार्थं भृशं प्रेरितवन्तः।

इत्थमुत्तमसंयमिनिर्ग्रन्थसर्जनं कृत्वा तैर्जिनशासनस्याऽद्वितीया सेवा कृता।

**श्रुतसर्जनम्** - प्रेमसूरीश्वरैः सर्वशास्त्राण्यवगाहितानि। ततः शास्त्रपरिकर्मितमत्या तैर्नूतनशास्त्राणि रचितानि। तैर्निम्नोक्ताश्चत्वारो ग्रन्था रचिताः -

**१) कर्मसिद्धिः** - अस्मिन् ग्रन्थे तैः कालवादि-स्वभाववादिनियतिवादीश्वरवाद्युद्यमवादिमतानि निराकृत्य कर्मकृतविचित्रतां मन्वानः सिद्धान्तपक्षो दर्शितः।

**२) सङ्क्रमकरणं प्रथमो भागः** - अस्मिन् ग्रन्थे तैः प्रकृतिसङ्क्रमस्य विस्तारेण निरूपणं कृतम्।



**३) सङ्कमकरणं द्वितीयो भागः** - अस्मिन् ग्रन्थे तैः शेषप्रकृतिसङ्क्रमस्य स्थितिसङ्क्रम-रससङ्क्रम-प्रदेशसङ्कमाणाञ्च निरूपणं कृतम्।

**४) मार्गणाद्वारविवरणम्** - अस्मिन् ग्रन्थे तैश्चतुर्दशमूलमार्गणाद्वाषष्ट्युत्तरमार्गणानां विस्तरेण निरूपणं कृतम्।

तेषां प्रेरणा-मार्गदर्शन-संशोधनैः शिष्यप्रशिष्यादिभिः खवगसेढीबन्धविधान-उपशमनाकरणप्रथमभागो-उपशमनाकरणद्वितीयभागकर्मप्रकृतिगतोपशमनाकरण-द्रव्यप्रमाणप्रकरण-क्षेत्रस्पर्शनाप्रकरणदेशोपशमनाद्यनेकनूतनग्रन्था रचिताः।

इत्थं पूज्यानां प्रेरणया विपुलं कर्मसाहित्यं निर्मितम्।

पूज्यैर्निशीथचूर्णि-अनेकान्तजयपताका-कर्मप्रकृतिसङ्ग्रहणीपञ्चसङ्ग्रहादि-ग्रन्थाः संशोधिताः सम्पादिताश्च, ते ग्रन्था विविधसंस्थाभिः प्रकाशिताः।

पूज्यरचिताः ग्रन्थाः पूज्यप्रेरणारचितग्रन्थाश्च पूर्वाचार्यरचितग्रन्थतुल्या एव भासन्ते।

गुरु प्रेम



एवं पूज्यैरसाधारणं श्रुतसर्जनं कृत्वा जिन-शासनस्य श्रुतसम्पदधिकसमृद्धिमती कृता।

**जिनभक्तिः** - पूज्यानां जिनभक्तिरप्यप्रतिमाऽऽसीत्। स्वाध्यायलोभात् ते जिनभक्तिं गौणीं न कृतवन्तः। जिनालये ते परमात्मना सह तन्मयीभूय जिनभक्तिं कृतवन्तः। पर्वतिथिषु तेऽवश्यं चैत्यपरिपाटीं कृतवन्तः। खम्भातनगरे द्विसप्ततेरधिका जिनालयाः सन्ति। यदा पूज्याः खम्भातनगरे स्थितास्तदा पर्वतिथिषु ते प्रातः षड्वादने उपाश्रयाच्चैत्यपरिपाट्यर्थं निरगच्छन्। सर्वजिनालयेषु जिनवन्दनां कृत्वा ते मध्याह्ने द्वादशवादने उपाश्रयमागच्छन्, इत्थं श्रममगणयित्वा तेऽष्टौ मुहूर्तान् यावज्जिनिभक्तिं कृतवन्तः। नित्यवन्द्यमानजिनालयादतिरिक्ते एकस्मिन्नपि जिनालये जिनवन्दनया चैत्यपरिपाटिः कर्तुं शक्या, परन्तु पूज्यानां हृदयं जिनभक्तिभरनिर्भरमासीत्। अत एव पर्वतिथिषु ते सर्वजिनालयेषु जिनान् वन्दित्वा चैत्यपरिपाटिं कृतवन्तः।

**एकाग्रता** - ते पूज्या एकाग्रीभूय शास्त्राणि पठन्ति स्म। शास्त्रपठनसमये तेऽन्यचिन्तनमन्यध्यानं वा न कृतवन्तः, इतस्ततो न निरीक्षितवन्तः, केनचित् सह नाऽऽलपितवन्तः। शास्त्राभ्यासावसरे ते तल्लीना अभवन्। जनास्तान् वन्दित्वा गच्छन्ति तथापि शास्त्रपठने तच्चितास्ते तान् न ज्ञातवन्तः। शास्त्रपठनसमये तेऽन्यत् सर्वं विस्मृतवन्तः। अत एव सकृत् पठितं ते यावज्जीवं न विस्मृतवन्तः। ते रभसवृत्त्या शास्त्राणि न पठितवन्तः। ते

पूर्वापरानुसन्धानं कृत्वा रहस्यार्थं विचार्य शङ्का-समाधाने कृत्वा चिन्तन-मननपूर्वकं शास्त्राणि पठितवन्तः।

**भवभीरुता** - प्रेमसूरीश्वरैः सङ्क्रमकरणाख्यग्रन्थो रचितः। कर्मप्रकृतौ प्रथमगुणस्थानके सम्यक्त्वमोहनीय-मिश्रमोहनीययोर्बन्धाऽभावेऽपि यथाप्रवृत्तसङ्क्रम उक्तः, पूज्यैः सङ्क्रमकरणे तस्य खण्डनं कृतम्। अष्टमगुणस्थानके त्रिंशत्शुभप्रकृतीनां बन्धविच्छेदो भवति। अत पूज्यैर्बन्धविच्छेदात् पश्चात् तेषां विध्यातसङ्क्रम उक्तः। कर्मसाहित्यलिखनावसरे पूज्यैः कर्मप्रकृतिचूर्ण्या अप्रकाशिता हस्तलिखिता अवचूरी प्राप्ता, तदभ्यासेन पूज्यैर्ज्ञातं यदुपर्युक्तद्विस्थानर्योर्यथा-प्रवृत्तसङ्क्रम एव कथनीयः। ततः पूज्यैः सङ्क्रमकरणे जाता स्वक्षतिर्ज्ञाता। उत्सूत्रप्ररूपणया संसारवृद्धिर्भवतीति जानानैः पूज्यैर्वतमानपत्रेषु स्वक्षतेः क्षमायाचना निवेदिता। 'यद्यहं क्षमायाचनां न करिष्यामि तर्हि मम संसारभ्रमणं वर्त्स्यति।' इति विचिन्त्य भवभीरवः पूज्याः स्वनिवेदने न मिथ्यादृष्कृतं दत्तवन्तः। मुखेनोक्त्वाऽपि क्षतेः क्षमायाचना कर्तुं शक्या, तथापि वर्तमानपत्रेषु तैः क्षमायाचनानिवेदनं कृतमिति तेषां महत्ताऽऽसीत्। अनेन तेषां तीव्रसंविग्नता ज्ञायते। 'मत्समुदायवर्त्तिसाधुभिर्लिखितं रचितं सर्वसाहित्यं मया संशोधितं कर्तुमशक्यम्। अतस्तत्र काचिदपि क्षतिः स्यात्तर्हि 'न निषिद्धमनुमतम्' इतिन्यायेन तत्र ममाऽनुमतिर्भवेत्। ततस्तत्कृतेऽप्यहं मिथ्यादृष्कृतं ददामि, गच्छव्यवस्था-तिथि-दीक्षादिविषयक-प्रश्नेषूपस्थितेषु जानताऽजानता वा मया काचित् विपरीतप्ररूपणा कृता स्यात् तर्हि तत्कृतेऽप्यहं मिथ्यादुष्कृतं ददामि,' इत्यपि तैः स्वनिवेदने लिखितम्।

अनेन निवेदनेन पूज्यानां भवभीरुता ज्ञायते। स्वकृतक्षत्या स्वस्य संसारभ्रमणवृद्धि र्मा स्यादिति ते सदैव जागरूका आसन्। प्रकाण्डविद्वांसः सन्तोऽपि ते स्वक्षतेः क्षमायाचनां कृत्वा तैर्मानकषायो विजितः।



**शासनसेवा** - प्रेमसूरीश्वरैरुत्तमश्रमणसर्जनं कृत्वा जिनशासनस्याऽसाधारणा सेवा कृता। स्वकार्याणि गौणीकृत्याऽपि ते जिनशासनस्य विषमसमस्यानां समाधानार्थं भृशं प्रयतवन्तः। बालदीक्षाविरोधिनिर्णयपत्रस्य प्रतिकारार्थं तैः प्रभूत उद्यमः कृतः, ते सततं जिनशासनस्योन्नतिं चिन्तितवन्तः। ते सदा जिनशासनस्य समृद्ध्यर्थं चेष्टितवन्तः। श्रीसङ्घस्यैक्यार्थमपि ते सदा प्रयत्नशीला आसन्।

**शिष्यपालनम्** - (१) प्रेमसूरीश्वरा न केवलं मुमुक्षून् दीक्षितवन्तः, ते दीक्षितसाधून् संयमसर्वयोगेषु कुशलान् निर्मितवन्तः। ते शिष्यान् शास्त्राणि पाठयित्वा तेभ्यो ग्रहणशिक्षां दत्तवन्तः। ते स्वयं योगान् कृत्वा योगाः कथमाराधनीया इति साक्षात् शिष्येभ्यो दर्शितवन्तः। इत्थं ते शिष्येभ्य आसेवनशिक्षां दत्तवन्तः। चातुर्मासादिकार्येषु प्रहितानां दूरस्थानां शिष्याणामपि ते योगक्षेमौ सुष्ठु कृतवन्तः। शिष्यप्रतिसेवितदोषादनेकगुणो दोषो गुरोर्लगतीति शास्त्रवचनं स्मृत्वा ते शिष्याणां योगक्षेमकरणे कदापि प्रमादं न कृतवन्तः।

**अप्रमत्तत्वम्** - (१) प्रेमसूरीश्वरैः स्वजीवने प्रमादाय प्रवेशो न दत्तः। ते सदैवाऽप्रमत्ता आसन्। निद्रासमयेऽपि तेषामात्मा जागरूक आसीत्। अत एव निद्रायां पार्श्वपरिवर्तनसमये ते







रजोहरेणन प्रमृज्यैव पार्श्वं परिवर्तितवन्तः। ते दिवसे न सुप्तवन्तः, रात्रावपि तेऽल्पनिद्रामेव कृतवन्तः। मध्यरात्रे उत्थाय ते कर्मग्रन्थ-कर्मप्रकृतिपदार्थानां स्वाध्यायं कृतवन्तः, ते मध्यरात्रे साधूनुत्थाप्य कर्मग्रन्थकर्मप्रकृति-पदार्थान् पुस्तकं विनैव पाठितवन्तः।

(२) ते केनचिदपि सह वृथा वार्त्तालापं न कृतवन्तः, कार्ये आपतिते ते मितशब्दैर्वार्तालापं कृतवन्तः। ते सततं स्वाध्यायमग्ना अभवन्। ते क्षणमपि न व्यश्राम्यन्। वार्धक्येऽपि नूतनसृज्यमानकर्मसाहित्यस्य संशोधने ते मग्ना अभवन्। तैर्मुनिभ्यः कथितं, 'युष्माभिर्नूतनकर्मसाहित्यस्य पत्राणि लिखित्वा संशोधनकृते मह्यमर्पणीयानि।' मुनिभिर्दत्तेषु लिखितपत्रेषु संशोधितेषु पूज्या मुनिभ्यो नूतनानि लिखितपत्राणि पुनः पुनर्याचितवन्तः, 'अहं बुभुक्षुः (संशोधनोत्कः) अस्मि। मह्यमाहारं (लिखितपत्राणि) दत्त।' ते मनसि निरर्थकविकल्पान्न कृतवन्तः। ते मनसि शास्त्रगतगूढपदार्थाञ्चिन्तितवन्तः। इत्थं ते मनसाऽपि कदापि प्रमादं न कृतवन्तः।

**अन्तर्मुखत्वम्** - प्रेमसूरीश्वरा बाह्यभावेषु रक्ता नाऽऽसन्, ते सदाऽन्तर्मुखा आसन्, अत एव ते सदा सुखिन आसन्। परान् दृष्ट्वा ते मत्सरं न कृतवन्तः, ते स्वसाधनायां मग्ना अभवन्।

अन्तर्मुखत्वेनैव ते लाभेऽलाभे वा सुखे दुःखे वा सम्पदि विपदि वा मानेऽपमाने वा यशस्यपयशसि वा समा अभवन्।

● उपधानतपः – सङ्घयात्रा–ऽञ्जनशलाका–प्रतिष्ठादिशासनाप्रभावनाकार्याणि तेऽन्तः निर्लेपीभूय कारितवन्तः। ते जनरञ्जनार्थं न यतितवन्तः। ते साधनया स्वात्मानमेव रञ्जितवन्तः।

**तीर्थभूतत्वम्** – प्रेमसूरीश्वराणां जन्म तीर्थभूमावभवत्। तेषां जन्मभूमिर्नान्दियानगरे आसीत्। नान्दियानगरं जीवितमहावीरस्वामितीर्थम्।

प्रेमसूरीश्वराणां दीक्षाऽपि तीर्थभूमावभवत्। तेषां दीक्षा तीर्थाधिराजश्रीशत्रुञ्जय–महातीर्थोपत्यकायामभवत्।

प्रेमसूरीश्वराणां स्वर्गमनमपि तीर्थभूमावभवत्। तेषां स्वर्गमनं खम्भातनगरेऽभवत्। खम्भातनगरं तु स्थम्भन–पार्श्वनाथतीर्थम्।

इत्थं तेषां जन्म–दीक्षा–स्वर्गमनानि तीर्थेऽभवन्। ते स्वयं तीर्थभूता आसन्। अत एव तेषां जन्म–दीक्षा–स्वर्गमनानि तीर्थेऽभवन्।



यत् तारयति तत् तीर्थम्। पूज्यैरनेकमुमुक्षून् प्रव्राज्य भवोदधेस्तारिताः। ततस्तेऽपि तीर्थस्वरूपा एव।

**स्वर्गमनम्** – प्रेमसूरीश्वरैश्चरमश्चातुर्मासः खम्भातनगरे कृतः। तदा तेषां वयश्चतुरशीति–वर्षमासीत्। चातुर्मासात् पश्चात् तेषां स्वास्थ्यस्य हानिरभवत्। वैशाखकृष्णैकादश्यां तेषामासन–मुपाश्रयस्य बहिर्वर्त्तिखण्डात् पृष्ठवर्त्तिर्ज्ञानमन्दिरखण्डे सङ्क्रमितम्। सन्ध्या जाता, तैः प्रतिक्रमणं कृतम्, ततस्तैरुप–मितिभवप्रपञ्चाकथापदार्थानां पाठः कृतः। साधुभिस्तान् स्तवन–स्वाध्यायादयः श्राविताः। मुनिगुणरत्नविजयेनाऽवन्ति–सुकुमालस्वाध्यायः श्रावितः। ततः पूज्यैः सूरिमन्त्रजपार्थं वस्त्र–परिवर्त्तनं कृतम्, सञ्ज्ञाशङ्कायां जातायां पुनस्तैः वस्त्राणि परिवर्त्तितानि। सञ्ज्ञाव्युत्सृजनात् पट्टे उपविष्टाः। तेषां श्वासोच्छ्वासा वर्धिताः, तेषां वक्षसि पीडा जाता, एकतस्तेषां शरीरेऽसह्या पीडाऽऽसीत्, अन्यतस्तेषां मुखात् सर्वसाधून् प्रति शब्दा निःसृताः 'क्षाम्यामि' इति, ततस्तेषां मुखात् 'वीर! वीर!' इत्युद्गाराः प्रवृत्ताः। प्रान्ते तेषामात्महंसो देहपञ्जरादुड्डीनः। तेषामष्टषष्टिवर्षसंयम–पूतात्मा मुक्तिमार्गयात्रार्थमुत्पतितः।

**सद्भावः समभावः सहनभावश्च** – प्रेमसूरीश्वराणां जीवने सर्वजीवान् प्रति सद्भाव

आसीत्। ते कस्यचिदप्युपरि दुर्भावं न कृतवन्तः।

तेषां जीवने सर्वजडपदार्थान् प्रति समभाव आसीत्, ते कुत्रचिदपि राग-द्वेषौ न कृतवन्तः।

तेषां जीवने सर्वप्रतिकूलतासु सहनभाव आसीत्। ते प्रतिकूलताभ्यो नाऽबिभयुः। एवं सद्भाव-समभाव-सहनभावैस्तैः प्रकृष्टा साधना कृता।

**स्मरणाञ्जलिः** - मया प्रेमसूरीश्वराः साक्षान्न दृष्टाः, परन्तु गुरुवचनैस्तज्जीवनचरित्र-पुस्तकैश्च मया तेषां जीवनं ज्ञातम्। यथा ज्ञातं तथा मया स्वशक्तिमत्यनुरूपं लेशेन लिखितम्।

जातानां सर्वेषां मरणं भवति, परन्तु मरणादनन्तरं स्मरणं सर्वेषां न भवति, यैः साधनाया स्वजीवनं सफलीकृतं, यैः परोपकारः कृतः, येषाञ्च जीवनं गुणगणमण्डितं तेषामेव मरणादन्तरं स्मरणं भवति। प्रेमसूरीश्वराणां जीवनोद्यानं साधना-परोपकार-गुणपुष्पैः सुवासितमासीत्। अत एव ते मरणादनन्तरमद्यापि गुणसौरभंप्रसारयन्तः स्मर्यन्ते।

मनुष्यः स्वोक्तशब्दैश्चिरं न स्मर्यते, परन्तु स्वकृतकार्यैश्चिरं स्मर्यते। स्वोक्तशब्दैर्मनुष्यो दशवर्षान् यावत् स्मर्यते। स्वकृतकार्यैर्मनुष्यः वर्षशतानि यावत्। प्रेमसूरीश्वरैरनेकशासनप्र-भावककार्याणि कृतानि। अत एव ते वर्षशतानि यावत् स्मरिष्यन्ते।

प्रेमसूरीश्वरैरितिहासो न रचितः, परन्तु ते तथा जीवितवन्तो यथा तेषां जीवनेन स्वयमेवेतिहासः सृष्टः।

**वन्दना -**

**सहस्राधिक साधुकर्णधाराणां**

**लक्षाधिकजनाधारभूतानां**

**जिनशासनस्तम्भानां**

**महासंयमिनां**

**महापुरुषाणां**

सिद्धान्तमहोदधि-कर्मसाहित्यनिष्णात-सुविशुद्धब्रह्मधारि-श्रीमदचार्यदेव-प्रेमसूरीश्वराणां चरणयोरनन्तशो वन्दनाः।

**प्रार्थना** - स्वर्लोकस्थप्रेमसूरीश्वरान् प्रार्थये, 'गुरुदेवा! भवत्कृपया भवतां गुणानहं प्राप्नुयाम्।' इति।

* अमृतानुवादः *

सङ्ख्यातीता गुणाः प्रेम-सूरिवरेऽमिताः व्रते।
व्रताम्भोजेऽनीला[१] भृङ्गाश्चित्रं कर्षन्ति पद्मकान्[२]।।

---

१) व्रते तु अनीलत्वं श्वेतत्व साधूनां भृङ्गत्वं,

२) लघुपद्मानि इति पद्मकाः, व्रतेच्छवोसुमतोत्र व्यज्यते

# गुरुः





# श्रीप्रेमसूरिवरो गुणमूर्त्तिः

– *दर्शनरक्षितविजयो मुनिः

## १) गुणानुरागमूर्तिः

विक्रम–१९६९ तमे वर्षे सिनोरनगरे पूज्यपादवीरविजयमहाराजसान्निध्ये मुनिप्रेमविजयस्य त्रयोदशं चातुर्मासमभवत्। प्रतिदिनं श्रीवीरविजयमहाराजः प्रवचनं दत्तवान्। एकस्मिन् दिने श्रीवीरविजयगुरुदेवानां दन्तेषु व्याधिः सञ्जातः, ततः प्रवचनं दातुमक्षमा, अतो गुरुदेवैर्नूतन मुनिरामविजयाय प्रवचनदानार्थमाज्ञा दत्ता। पूज्यपादगुरुदेवानां कृपया नूतनमुनिरामविजयेन सम्यक्त्वविषये सुशोभनं प्रवचनं दत्तम्। गुरुभिर्मुक्तकण्ठेन प्रशंसा कृता।

तदा मुनिप्रेमविजयस्य मनसि स्वशिष्यस्येदृशीं प्रशंसां श्रुत्वासूयाभावः स्पर्धाभावो द्वेषभावो वापि न स्पृष्टः। किन्तु स्वशिष्यस्येदृशीं प्रवचनशक्तिं श्रुत्वा चित्तेऽतीवः प्रमोदः सञ्जातः। पूज्यपाद प्रेमविजयमहाराजेन शान्तसुधारसस्य इदं वचनं 'भवेत् प्रमोदो गुणपक्षपातः।' स्वजीवने स्वहृदये स्वात्मनि च चरितार्थं कृतम्।

## २) तपोमूर्तिः

मुनिप्रेमविजयेन दीक्षानन्तरं दशवैकालिकसूत्रमात्मसात् कृतम्। तदनुसारेण संयमजीवनं जीवितुं सदोद्यमवान् सञ्जातः। –

'अहो निच्चं तवोकम्मं सव्वबुद्धेहिं वण्णिअं।'
जा य लज्जासमावित्ती एगभत्तं च भोयणम्। (द.वै.६/२३)

इति दसवैककालिकसूत्रस्य गाथां पठित्वा, अर्थं च समधिगम्य मुनिप्रेमविजयेन सङ्कल्पः कृतः। अहं प्रतिदिनमेकाशनान्न्यूनं तपो न करिष्ये, एकाशनेऽपि द्वे एव आहारद्रव्ये उपयोगमानेष्य इति वृत्तिसङ्क्षेपं तप आचरितम्। ततः पश्चात् पञ्चाशदधिकवर्षं यावद् द्विद्रव्यैनैकाशनं तपः कृतवान्।

---

– * पू.आ.श्री रामचन्द्रसूरि समुदायः

### ३) वैयावृत्यमूर्तिः

विक्रम १९८८ तमे वर्षे पूज्यपादोपाध्यायश्रीप्रेमविजयस्य चातुर्मासं स्वगुरुदेवानां चरण-कमलच्छायायां सुरेन्द्रनगरे सम्पन्नम्, चातुर्मासानन्तरं गुरुदेवैः सह वाचकोत्तमप्रेमविजयः पाद-लिप्तपुर्यामागतः, तत्र पूज्यपादाचार्यदेवश्रीमद्विजयक्षमाभद्रसूरीश्वराणां शिष्यरत्नमुनिराजश्री-भक्तिविजयस्य स्वास्थ्यमसमीचीनमासीत्। एकदा रात्रौ मुनिवरस्य स्वास्थ्यमतीवगम्भीरं सञ्जातं तदोपाध्यायप्रेमविजयः सर्वरात्रं ग्लानमुनिसमीपे समुपस्थितवान्। मुनेरन्तिमावस्थां ज्ञात्वा स्वयं मन्दस्वरेण त्रिप्रहरं यावन्नमस्कारमहामन्त्रमश्रावयत्। प्रभाते सर्वे मुनय ईदृशं दृश्यं दृष्ट्वा कथितवन्तः ''भवान् तु स्वपितु'' तदा पूज्यपादेन कथितम्-

''जो गिलाणं पडिवज्जइ सो मां पडिवज्जइ''

### ४) संयममूर्तिः

विक्रम १९९० तमे वर्षे पूज्यपादप्रेमसूरीश्वरमहाराजः स्वसाधुसमुदायेन सह कर्णावतीनगरीतः केसरीयाजीमहातीर्थं प्रति विहृतवान्। तस्मिन् काले मुहरीपार्श्वनाथशोभितटींटोईतीर्थात् केस-रीयातीर्थमध्ये जैनश्रावकगृहाणि नासन्। तदा टींटोईवास्तव्या गुरुभक्तश्रावका गन्त्र्यां गोचरीं गृहीत्वागताः। निर्दोषभिक्षाचर्याप्रेमी प्रेमसूरीश्वरमहाराजः श्रावकैरअभ्याहृता भिक्षा न गृहीता। जैनेतरगृहेभ्य अन्तप्रान्तभिक्षां गृहीत्वा संयमदेहो निर्वाहितः।

पूज्यपादप्रेमसूरीश्वरमहाराजो विशुद्धसंयमपालने सततमुद्यतचित्तः सदोद्यमवानासीत्, विशुद्धसंयमपालने विशुद्धभिक्षाया ग्रहणमनिवार्यं भवति। 'यादृशी भिक्षा तादृशी मनोवृतिः' इत्येवं शास्त्रोक्तिः पूज्यपादेनात्मसात् कृता आसीत्।

### ५) ब्रह्ममूर्तिः

पूज्यपादानां समीपे एकदैका प्रौढसाध्वी स्वशिष्याभिः परिवृताऽऽगता, दूरतो वन्दनां कृत्वा सुखशाताञ्च पृष्ट्वा कर्मग्रन्थसम्बद्धानां कतिपयप्रश्नानामुत्तरं दातुं विज्ञप्तिः कृता।

पूज्यपादेन कथितं -'साध्वीर्न पाठयामि' इति मम प्रतिज्ञास्ति। अतोऽहं युष्माकं प्रश्नानामुत्तरं न दास्यामि। तदा तया साध्वीवर्यया कथितं भवद्भिर्विनान्यः कोऽप्यमीषां प्रश्नानामुत्तरं दातुं समर्थो भवेत्? अतो भवन्तः कृपां कृत्वा मम विज्ञप्तिं स्वीकुर्वन्तु। साध्वीवर्याया अत्यन्ताग्रहेण पूज्यपादेन स्वसमीपमेकः कर्मग्रन्थज्ञाता मुनिरुपावेशितः। साध्वीवर्यायाः प्रश्नोत्तराणि कर्मग्रन्थज्ञातृमुनि-वरमुखेन दापितानि। पूज्यपादेन साध्वीवर्यया सह वार्तालापो न कृतः।

## ६) आदर्शसंयममूर्तिः

वृद्धावस्थायां जङ्घाबले क्षीणे सति पूज्यपादेन यान्त्रिकवाहनस्य व्हीलचेरस्य वा विचारः स्वप्नेऽपि न कृतः। डोलिकायामपि विहारकरणस्येच्छा नासीत्। यद्यहं डोलिकायां विहारं करिष्यामि तदानागतकाले सर्वेऽपि साधवो ममानुकरणं करिष्यन्ति, सैव परम्परा वर्त्स्यति, तस्य पापभागहं न भवानीत्याशयेन डोलिकाया अपि निषेधः कृतः।

तदा गुरुभक्तियुताः शिष्याः पूज्यपादान् झंपानिकामध्ये उपावेश्य, झंपानिकां* च स्वस्कन्धमारोप्य विहृतवन्तः

## ७) योगक्षेममूर्तिः

विक्रम १९९१ तमे वर्षेऽणहिलपुरपत्तननगरे पूज्यपादाचार्यदेवश्रीमद्विजयकमलसूरीश्वराणां गुरुमूर्तिप्रतिष्ठार्थं प्रेमसूरीश्वरमहाराजा विशालश्रमणपरिवारेण सहागताः। तत्राष्टापददेवालय-समीपवर्तिधर्मशालायां स्थिता आसन्।

एकदा प्रातःकाले एकः शैक्षमुनिर्देवालये दर्शनं कृत्वोपाश्रयसन्मुखमागच्छन्नासीत्। तदान्तराले तन्मुनेस्सांसारिका माता मिलिता, तया च वन्दना कृता, सुखशाता पृष्टा, मात्रा सह मुनिरपि वार्तालापं कर्तुं लग्नः। तदा दूरतः पूज्यपादानां दृष्टिस्तस्य मुनेरुपरि पतिता।

यदा मुनिरुपाश्रयमागतस्तदा पूज्यपादेन वात्सल्यपूर्णहृदयेन कोमलवचनैश्च हितशिक्षा प्रदत्ता। इदानीं त्वं प्रभुदर्शनं कर्तुं गतवान्, किन्तु पश्चाद् वलन् मार्गे मात्रा सह वार्तालापं कृतवान्, तद् युष्मादृशाय गुणवते मुनये न समुचितं, तदा पूज्यपादानां शिक्षावचनं श्रुत्वा मुनिरवदत्, सा मम सांसारिका मातासीत्।

पूज्यपादेनोक्तं सा तव संसारावस्थाया मातास्ति, तत्तु त्वमेव जानासि, किन्त्वन्यो यो न जानाति स स्वमनसि त्वां प्रति दुष्टविकल्पं कुर्याद् यथा युवासाधुः स्त्रिया सह मार्गे वार्तालापं करोति इत्यतोस्माकमध्वनि स्त्रिया संवादो न सुशोभनः।

मुनिना नतमस्तकेन पूज्यपादानां हितशिक्षा स्वीकृता यावज्जीवं सा मर्यादा निष्ठापूर्वकं पालिता।

## ८) त्यागमूर्तिः

विक्रम १९९१ तमे वर्षे पूज्यपादानां चातुर्मासमणहिलपुरपत्तने निर्णीतम्। चातुर्मासप्रवे-शानन्तरमाषाढशुक्लचतुर्दशीदिने पूज्यपादेनैकाशने भोज्यद्रव्यद्वयस्य नियमः स्वीकृतः, रोटिका सूपश्च, अभक्ततपसः पारणे दुग्धञ्च।

---

* भाषायां स्टेचरः इति।



तदा पूज्यपादेन सह द्वाविंशतिर्महात्मानश्चातुर्मासे स्थिता आसन्, परं तु केनचित् महात्मना पूज्यपादानामभिग्रहो न ज्ञातः। यदा पूज्यपादानामभक्तस्य पारणमागतं तदा सर्वैर्मुनिवरैर्ज्ञातं, पूज्यपादेनेदृशः कठोरोऽभिग्रहो गृहीतः। तदानेकै महात्मभिः पूज्यपादानां समीपे गत्वा कथितम्, भवन्तो बृहत्समुदायस्य पालकाः सन्ति, सर्वेषां योगक्षेमस्य कर्तारस्सन्ति, सर्वेषाञ्च स्थिरतादायकाः सन्ति, इत्येतद् भवत्कृते महत् तपोऽस्ति, तथापि भवद्भिरीदृशः कठोरोऽभिग्रहः कथं गृहीतः।

पूज्यपादेन कथितं यूयं सर्वे मम भक्तिं कृत्वा पुण्यभाजो भविष्यथ, किंतु मया स्वात्मचिन्ता कर्तव्या। ईदृशानि वाक्यानि श्रुत्वा सर्वे शिष्याः पूज्यपादानां तपस्-त्यागयोरनुमोदनां कर्तुं लग्नाः। अहो गच्छभारवाही! अहो तपोभारवाही!

### ९) ज्ञानोपार्जकमूर्तिः

विक्रम १९९५ तमे वर्षे पतननगरे पूज्यपादा अनेकश्रमणान् कर्मप्रकृतिग्रन्थस्याभ्यासमकारयत्। अभ्यासेन सार्धं द्विषष्ठिमार्गणासु गूढचिन्तनं कृत्वा ''मार्गणाविवरण'' इति नाम्ना ग्रन्थमप्यसृजत्। कर्मसाहित्यक्षेत्रे प्रभूतं सर्जनं कृत्वापि संतोषो न जातः। तदा पूज्यपादेन संकल्पः कृतः, यावदहं सटीककर्मप्रकृति पदार्थान् कण्ठस्थान् न करोमि तावदहं मिष्टान्नं त्यजामि।

ततः पश्चात् पूज्यपादेन लघुबालवत् कर्मप्रकृतिपदार्थाः कण्ठस्थीकर्तुमारभ्यत, निशायां यदा सर्वे साधवस्स्वपन्ति, तदा मध्यरात्रे द्वादशवादने पूज्यपादो जागरित्वा दिने कण्ठस्थीकृतानां सर्वेषां पदार्थानां परावर्तनं करोति स्म, दिने दिने त्वेकप्रहरं द्विप्रहरञ्च यावत् परावर्तनं करोत्येव, एवं शास्त्राणां गहनाभ्यासेन पूज्यपादाः कर्मसाहित्यनिष्णाताः सञ्जाताः।



## १०) अपूर्वत्यागमूर्तिः

विक्रम २००८ तमे वर्षे पूज्यपादानां निश्रायां मुम्बापुर्यामन्धेरीनामोपनगरे उपधानतपसो भव्यमायोजनमभवत्। एकस्मिन् दिने पूज्यपादानां समीपेऽनेके मुनिवराः शास्त्राभ्यासं कर्तुमुपविष्टाः। तदा पूज्यपादेन सहसा मुनिवराणां नामपूर्वकं कथितं, एते एते मुनिवरा पञ्चचत्वारिंशदागमानां सम्पूर्णमध्ययनं न कुर्युः तावदहं मिष्टान्नं त्यजामि।

पूज्यपादानां मिष्टान्नत्यागाभिग्रहं शीघ्रं पूरयितुं कतिपया मुनिवराः सप्ताष्टवर्षमध्ये पञ्चचत्वारिंशदागमान् पठितवन्तः, तदा तैर्मुनिप्रवरैः पूज्यपादानां चरणयो र्विज्ञप्तिः कृता, अथ भवन्तो मिष्टान्नत्यागनियमं परिहरन्तु तदा पूज्यपादेन कथितं सर्वेषां मुनिवराणामागमाभ्यासो न सञ्जातः।

द्वादशवर्षानन्तरं सर्वेषां मुनिवराणामागमाभ्यासः सम्पूर्णः सञ्जातः। तदा सवै र्मुनिवरैर्मिष्टान्नार्थं पूज्यपादान् प्रार्थितवन्तः, तदा पूज्यपादेन कथितं, ईयद्वर्षं यावद् मिष्टान्नं न भुक्तमधुना भुक्तेन को लाभो भविष्यति।

## ११) सरलतामूर्तिः

पूज्यपादेन स्वसंयमजीवने कर्मसाहित्यविषये गहनमध्ययनं चिन्तनमवगाहनञ्च कृतम्। पूज्यपादः तत्पश्चात् कर्मसाहित्यविषये सङ्क्रमणकरण-कर्मसिद्धि-मार्गणाद्वारादिग्रन्थानसृजत्। सर्जनानन्तरं स्वरचितग्रन्थेषु द्विस्थाने क्षतिर्दृष्टा। तदा पूज्यपादेन मानं त्यक्त्वा सन्देशसमाचारपत्रे स्वक्षतेः क्षमापना याचिता। स्वायुषोऽन्तिमसमये सकलसङ्घस्य पुरस्तात् क्षमापना याचिता, यथा 'मम प्रव्रज्याकालं यावद् गच्छव्यवस्था-तिथिचर्चा-शिष्ययोगक्षेमकार्येषु चान्येष्वपि समुदायकार्येषु परमात्मानामाज्ञाविरुद्धं किञ्चिदपि जल्पितमाचरितञ्च भवेत्यथा कस्यचिदपि मनसि मम जानतोऽजान्नतो वा दुःखं भूतं, तत् सर्वं मे दुष्कृतं सकलसङ्घसमक्षं मिथ्या भवतु।

## १२) लघुतामूर्तिः

कविकुलकिरीटः पूज्याचार्यदेवश्रीमद्विजयलब्धिसूरीश्वरमहाराजः पूज्यपादतो दीक्षापर्याये लघुः किन्तु सूरिपदपर्याये ज्येष्ठ आसीत्। एकदा पूज्यपादाः शास्त्रीयपदार्थानां परामर्शं कर्तुं स्तम्भनपुरं विशालपरिवारेण समेताः समागताः। जैनशाला' इत्यभिधाख्याते उपाश्रये तदा लब्धिसूरिमहाराजाः प्रवचनपाटे विराजमाना आसन्। उपाश्रये प्रवेशानन्तरं ''मस्तकेन वन्दे'' इति संबोधनं कृत्वा पूज्यपादाः प्राविशन्। तदा पूज्यपादानां शब्दं श्रुत्वा लब्धिसूरिमहाराजाः पाटोपरिष्टादुत्थिताः। पूज्यपादेभ्यः पाटोपरिष्टादुपवेष्टुं विज्ञप्तिः कृता। तदा पूज्यपादाः पाटोपर्युपविष्टाः। लब्धिसूरीश्वरेभ्यो भावेन वन्दनां कृत्वा गुणानुवादः कृतः। प्रोक्तञ्च-

भवान् तु पदेन पूज्योऽस्ति
भवान् तु कमलसूरीश्वराणां पाटे विराजमानोऽस्ति
भवान् तु प्रखरप्रवचनकारोऽस्ति
अतः शास्त्रानुसारेण भवद्भ्योऽहं वन्दनाधिकारी अस्मि।

## १३) समतामूर्तिः

विक्रमस्य २०१९ तमे वर्षे मरुधरदेशे पूज्यपादानां रोहिडाग्रामात् सरुपगञ्जपुरं प्रति विहारयात्रा चलन्त्यासीत्। तदा द्विक्रोशानन्तरं सहसा पूज्यपादानां हृदयमध्यभागे भयङ्करा वेदना समुद्भूता, पूज्यपादेन चिन्तितं वायुना हृदयव्याधिः समुद्भूतः, शनैः शनै मन्दो भविष्यति। किन्तु व्याधिरेकघटिकायां मन्दो न जातः, वेदना त्वसह्या जाता, तदा पूज्यपादा मार्गे वृक्षस्याधस्तादुपविष्टाः। सहस्थितेन- मुनिवरेण चिकित्सां कर्तुं कोथलिका निष्कासिता। उष्णजलमाप्तुं गृहस्थस्य प्रतीक्षां कर्तुं लग्नः। तदा पूज्यपादेन कथितं, कं प्रतीक्षसे? उष्णजलं, तस्य सेकेन भवतां व्याधिर्नङ्क्ष्यति अत उष्णजलमानेतुं कमपि जनं प्रतीक्षे, तदा पूज्यपादानां मुखात् शब्दो निर्गतः।

जलमुष्णं कारयितुं कतिपयजीवानां विराधना भवेत्, स्वकृतकर्मणां फलं स्वस्यैव भोक्तव्यं, ईदृश्यां भयङ्करवेदनायां पूज्यपादा द्रव्यचिकित्सां त्यक्त्वा भावचिकित्सायामरमन्त।

## १४) विशिष्टत्यागमूर्तिः

पूज्यपादप्रेमसूरीश्वरमहाराजा नूतनमुनिवराणां ज्ञानोपासनां कारयितुं मधुरशब्देन वात्सल्यपूर्णहृदयेन च प्रेरणामकुर्वन्।

''रे मणिप्रभ! अद्य प्रभृति त्वं संस्कृतद्विपुस्तकस्याभ्यासं यावन्न करिष्यसि, तावदहं दुग्धविकृतिं त्यक्ष्यामि।'' पूज्यपादानामीदृशीं घोरप्रतिज्ञां श्रुत्वा नूतनमुनिवरेणाल्पकाले संस्कृतस्य द्विपुस्तकं पठितम्।

''रे वीररत्न! बृहत्संग्रहणीग्रन्थस्य पाठो कण्ठस्थी कृतो न वा? यदि त्वं श्वः सायङ्कालं यावद् बृहत्संग्रहणीग्रन्थं कण्ठस्थं न करिष्यसि तर्ह्यहं पयः त्यक्ष्यामि।'' पूज्यपादानामीदृश्या दृढप्रतिज्ञया बालमुनिवरेण सूर्यास्तपूर्वं बृहत्संग्रहणी ग्रन्थः विना क्षतिं कण्ठस्थः कृतः, गुरुं श्रावितश्च।

## १५) आत्मजागरुकतामूर्तिः

एकदा पंन्यासरविविजयेन पूज्यपादेभ्यः पृष्टम्-भवन्तः सर्वरात्रं जाग्रतः सन्ति? पूज्यपादेनोक्तं ओम्, प्रायः कृत्वा।

पंन्यासेनोक्तं-कथम्?

पूज्यपादेनोक्तं-मया शास्त्रेषु पठितं यद्युपाश्रये वसतिपालकरूपेणैकोऽपि साधुर्न जागर्ति, तर्हि सर्वोपधिरुपहृता भवेत्। ततो मया निश्चयः कृतः, यदा सर्वे साधवः स्वप्स्यन्ति, तदाहं जागरिष्यामि। प्रातः काले यदा सर्वे साधवो जागरिष्यन्ति, तदाऽहं स्वप्स्यास्मि। अनेन मम निद्रापि स्वल्पा जाता, परमात्मनामाज्ञापालनं च कर्तुमवसरो मिलितः।

## १६) परिषहविजेतृमूर्तिः

पूज्यपादप्रेमसूरीश्वरमहाराजः, एकाशनं कृत्वा मध्याह्ने द्वादशवादने सार्धैकवादने द्विवादने वा स्थण्डिलार्थं बहिर्भूमौ गच्छन्नासीत्।



पुण्यपत्तने केम्पशाखायां पूज्यपादानां चातुर्मासमभवत्। तदा ज्येष्ठमासे पूज्यपादैः सह बहिर्भूमौ मुनिरविविजयोऽगच्छत्। सर्वमार्गोऽपि रविकिरणैरतितप्तः, मार्गस्य डामरोऽपि गलितुं लग्नः। ईदृशे मार्गेऽपि पूज्यपादा ईर्यासमितियुताः शनैः शनैर्गच्छन्त आसन्, तदा सहस्थितो मुनिर्धावित्वाग्रे वृक्षस्याधस्तात् छायायां स्थित आसीत्। पूज्यपादानां मुखमण्डलमुष्णताया लेशोऽपि न स्पृष्टः। गजराजवत् शनैः शनैर्गच्छन्त आसन्, शनैः शनैरागच्छन्त आसन्।

## १७) आत्मजागृर्तिमूर्तिः

वृद्धावस्थायां पूज्यपादानां शरीरमतिनिर्बलं सञ्जातं, तदा भक्तजनैश्चिकित्सकाश्चिकित्सां कर्तुमानीताः। चिकित्सकैः पूज्यपादेभ्यो ग्लुकोझस्य इंजेक्शनं दातुं कथितम्।

पूज्यपादेन कथितं मम देहे शक्तिं भर्तुं भवतामिच्छास्ति किन्तु ममात्मनि यूयं शक्तिं बिभृत। पूज्यपादानां शारीरिकास्वस्थता–यामपि स्वात्मजागृर्त्यद्भुतासीत्।

## १८) अल्पकषायमूर्तिः

पूज्यपादानां किञ्चिन्निमित्तं प्राप्य यदापि क्रोध उत्पन्नः स्यात्। घटिकायां तु क्रोध उपशान्तो जायते। तत्पश्चात् पूज्यपादानां स्वक्षतिस्स्मृतिपथमायाति, तदन्यदिनयुपवासं करोति स्म।

## १९) ज्ञानाराधकमूर्तिः

एकस्मिन् दिने पूज्यपादाः स्वस्थापनाचार्यस्य सन्मुखं पञ्चाङ्गप्रणिपातं कर्तुं लग्नाः। तदा केनचित् मुनिवरेण पृष्टं – पूज्यपाद! अद्य पञ्चमी तिथिर्नास्ति, भवन्तस्तु केन कारणेन पञ्चाङ्–गप्रणिपातं दत्थ। पूज्यपादेन कथितं अद्य मया गोचरीसमये क्षतेः कारणातदुच्छिष्टमुखेनोक्तं, तत्शिक्षारूपेण पञ्चाङ्गप्रणिपातं ददे।

## २०) यतनामूर्तिः

पूज्यपादा राणकपुरतीर्थे विराजमाना आसन्। तीर्थस्य पुरस्ताद् भागे जीर्णगृहे स्थण्डि–भूमिर्निर्दोषा आसीत्, सा भूमिर्बहुधूलियुता, तस्मिन् जीर्णगृहे भूमौ पिहितौ द्वारावुद्धाटयितुं पूज्यपादेन नवीनरजोहरणेन प्रमार्जनं कृतं, तदा शिष्येणोक्तं पूज्यपाद! रजोहरणो मलिनो जातः, तदा पूज्यपादेन प्रत्युत्तरो दत्तः।

'मम रजोहरणो मलिनो न जातः, किन्तु संयमजीवनं विमलं सञ्जातम्।'

## २१) ज्ञानमग्नतामूर्तिः

एकदा पूज्यपादाः शास्त्रवाञ्चने मग्ना आसन्, तदा जैनशासनस्याग्रणीसुश्रावकः कस्तूरभाईमहाभागः पूज्यपादेभ्यो वन्दनार्थं विशेषकार्यार्थश्च मिलितुमागतः। शास्त्रपठने मग्नान् पूज्यपादान् दृष्ट्वा तूष्णीक एकत्रस्थानमुपविष्टः। त्रिघटिकां यावत् पूज्यपादेन इतस्ततो दृष्टिर्न प्रसारिता, तदा कस्तूरभाई स्वस्यापरकार्यार्थं बहिर्निर्गतः, तदैकमहात्मना रुद्ध्वा कथितं, पूज्यपादेन सह वार्तालापः सञ्जातो न वा? न, तेन महात्मना कथितमहं पूज्यपादेन सह वार्तालापं कारयिष्यामि, तदा कस्तूरभाईमहाभागोवदत्– ईदृशं दृश्यमस्मिन्काले दुर्लभमस्ति। मम कार्यं सामान्यमस्ति, पूज्यपादानां ज्ञानमग्नता मम कार्याग्रेऽसामान्यास्ति।

## २२) उपयोगमूर्तिः

पूज्यपादाः शिहोरग्रामाद् विहृत्य, वल्लभीपुरग्रामे क्षेमकुशलमागताः। ग्रामे प्रवेशसमये मुखवस्त्रिका न दृष्टा, तदा पूज्यपादा मुखवस्त्रिकां गवेषयितुं पश्चाद् वलिताः। वलन्तं पूज्यपादं दृष्ट्वैकबालमुनिना कथितं, भवानत्रैव तिष्ठतु, अहं मुखवस्त्रिकां गवेषियतुं गच्छामि।

बालमुनिना द्विकोशं यावत् पश्चाद् गत्वा दृष्टं, किन्तु मुखवस्त्रिका न मिलिता, तदा पूज्यपादा मुखवस्त्रिकाया न मिलने मनस्यतीव व्यथिता जाताः। मुखात् शब्दो निर्गतः, मम संयमजीवने सकृदपि मुखवस्त्रिका न पतिता, अद्य पतिता ततः किंचिदचिन्तनीयमनिष्टं भविष्यति।

तस्मिन् दिने सायङ्काले मुनिराट् श्री न्यायविजयो दिवंगतः।

## २३) क्रियानिष्ठमूर्तिः

मरुधरदेशे पिण्डवाडानगरतः सिरोहीनगरस्यान्तरं विंशतिमाइलमस्ति। सिरोहीनगरे प्रभुप्रतिष्ठायाः पुण्यावसर आसीत्, तत्र गमनमावश्यकमासीत्। अतः पूज्यपादा एकस्मिनन्नैव दिने विहृत्य तत्र गताः। सायङ्काले सर्वे साधवः प्रतिक्रमणार्थमुपस्थिताः। अष्टसप्ततिवर्षवयसः पूज्यपादा अप्रमत्तभावेन सप्तदशसन्दशकैः शरीरावयवान् प्रमार्ज्य ऊर्ध्वं स्थित्वा प्रतिक्रमणं कृतम्। तद् दृष्ट्वा सर्वे मुनयः पूज्यपादानां क्रियाप्रेम प्रेक्ष्य प्रमुदिताः।

## २४) अनासक्तमूर्तिः

पूज्यपादानां समीपे केचन सुश्रावकाः सङ्घस्य किञ्चित् कार्यार्थमागताः। सङ्घकार्यं मध्याह्नं यावच्चलितं, मध्याह्ने मुनिवरा भिक्षां गृहीत्वागताः। पूज्यपादेभ्यो आहारार्थं विज्ञप्तिः कृता। पूज्यपादेन श्रावकेभ्यः कथितमहं पञ्च-सप्तमिनीटमध्ये किञ्चित् कार्यं कृत्वागच्छामि, पञ्च-सप्तमिनीटं पश्चात् पूज्यपादाः श्रावकैः सह शास्त्रचर्चायां लग्नाः। तदा मुख्यश्रावकेण कथितं-
पूज्यपादा! भवन्तो गोचरीं भोक्तुं गच्छथ, वयमपि भोजनं कर्तुं गच्छामः,
पूज्यपादेन कथितं, मया तु भिक्षा भुक्ता, श्रावकैः पृष्टं, कदा?
पूज्यपादैरुक्तं यदा शास्त्रचर्चामध्येऽहमुत्थितस्तदा, श्रावका आश्चर्येन वक्तुं लग्नाः भवद्भिः पञ्च-सप्तमिनीटमध्ये कथमेकाशनं कृतम्?

## २५) निर्दोषभिक्षावृत्तिमूर्तिः

पूज्यपादाः शिष्यवृन्दैः सह विहृत्यैकस्मिन् लघुग्राममागताः। तत्र जैनश्रावकाणां गृहाणि न सन्ति। निर्दोषभिक्षाचर्याजीविनः साधवो जैनेतरगृहेषु भिक्षार्थं गताः। भिक्षायां निर्दोषे द्वे उपहारद्रव्ये मिलिते मिष्टान्नं सूपश्च, पूज्यपादानां मिष्टान्न-त्यागस्य नियम आसीत्, तदा पूज्यपादेन केवलेन सूपेनैकाशनं कृतम्।

## २६) पापभीरुतामूर्तिः

कर्णावतीवास्तव्यचीनुभाईश्रावकः पूज्यपादानां वन्दनार्थं रमणलालस्य गृहमागतः। वन्दनं कृत्वा चीनुभाईमहाभागेन कथितम्, भवतां देहे प्रोस्टेटव्याधिरस्ति मम देहेऽपि स व्याधिः पुरातनोऽस्ति। तद्व्याधिप्रशमनार्थमहं वनस्पतिरसमौषधरूपेण पिबामि। वनस्पतिरससेवनेन व्याधिवेदना मन्दा जाता, अतो भवानपि वनस्पतिरसं गृह्णातु।

तत् श्रुत्वा पूज्यपादेन कथितं–रे चीनुभाई। पूर्वकृतपापकर्मणामुदयेनेहभवे व्याधिरुत्पद्यते, इहभवे यदि वनस्पतिविराधनां कृत्वा देहं पालयिष्यामि, तर्हि परभवे ततोऽधिकं दुःखभाग् भविष्यामि।

## २७) उपशममूर्तिः

शिष्येन कथितं – गुरुदेव ! प्रत्याख्यानं पारयतु, वेला संजाता।

पूज्यपादाः – अद्य ममैकाशनं नास्ति, उपोषितोऽस्ति।

शिष्यः – गुरुदेव! अद्य पर्वतिथि र्नास्ति।

पूज्यपादाः – आलोचनाया उपोषितः कृतः।

शिष्यः – कस्यालोचनायाः ?

पूज्यपादाः – हयेकस्मिन् साद्यौ मया कषायकृतःस्तद्दण्डरुपेण मयोपोषितः कृतोऽस्ति।

शिष्यः – पूज्यपादाः! शिष्येषु भवतां कषायो निग्रहकृपास्वरुपोऽस्ति,

पूज्यपादाः – कषायः संयमजीवने कलंकरुपोऽस्ति स्वल्पमपि कलङ्कं कदा महद् भवेत् तन्न कथ्यते, ततो मम स्वल्पोऽपि कषायो महन्न भवेत् तेन मया दण्डरुपेणोपोषितः कृतः।

## २८) परमश्रद्धेयमूर्तिः

आमोदग्रामे पूज्यपादानां भक्तश्रावक उदयचन्द इत्यभिधोवसत्। पूज्यपादा विहृत्यामोदग्रामे समागताः। उदयचन्दश्रावकस्य मनसि बहुकालादेका चिन्ता समुत्पन्ना आसीत्, चिन्तया तस्य मानसिकशान्तिर्नष्टा, एतच्चवृतान्तं पूज्यपादेभ्यो ज्ञापितम्।

पूज्यपादा! अष्टमासतो मम श्राविका मानसिकरोगेनाकुलास्ति, अतः कस्मिश्चिद् धर्माराधने मे मनो न लगति, बहुभिश्चिकित्सकैः चिकित्साः कृताः, किन्तु सर्वा निष्फला जाताः। अतो भवन्तः कृपां कृत्वा गृहमागम्य तस्याः शिरसि वासक्षेपं कुरुथ, मम च मनश्चिन्तया रहितं कुरुथ। पूज्यपादाः सार्धैक-वादने श्रावकसहायास्तस्य गृहं गत्वा श्राविकायाः शिरसि वासनिक्षेपः कृतवन्तः। उदयचंदश्रावको गृहमागम्य पश्यति श्राविकाया व्याधिर्मूलतो विलीनः।



## २९) मर्यादामूर्तिः

यदा पूज्यपादानां वयोऽशीतिवर्षमभवत्, तदैकया श्रमणीवर्यया

पूज्यपादनां समीपमागम्यं कथितम्। हे पूज्यपादा! कृपां कृत्वा मह्यं प्रायश्चित्तं ददतु। पूज्यपादेन समन्ताद् दृष्टिः प्रसारिता, सर्वे शिष्याः सपद्येव ततः स्थानादुत्थाय अन्यत्र गताः। स्वसमीपे परिपक्वमेकं महात्मानमाहूयोपावेशयत्। श्रमणीवर्यया स्वदोषा आलोचिताः, पूज्यपादेनालोचना दत्ता। किन्तु दोषालोचनावसरे, पूज्यपादेन श्रमणीवर्यायाः सन्मुखं दृष्टिर्न प्रसारिता।

तद् दृष्ट्वा समीपमुपविष्टपरिपक्ववृद्धमहात्मा पूज्यपादानामपूर्वमर्यादां दृष्ट्वा हृदि सन्तुष्टो जातः।

## ३०) निःस्पृहतामूर्तिः

विक्रमस्य २०२२ तमे वर्षे कर्णावतीनगरे पालडीनामोपनगरे दशापोरवाडसोसायटीमध्ये पूज्यपादानां चातुर्मासमभवत्। चातुर्मासानन्तरं पूज्यपादाः श्रेष्ठिवर्यरमणभाईगृहाङ्गणमुषिताः। कार्तिककृष्णषष्ठीदिने पूज्यपादानां दीक्षादिनमासीत्, तदुपलक्ष्य रमणभाईश्रावकेण गुणानुवाद-पूजाद्यनुष्ठानं पूज्यपादाननापृच्छ्य निर्णीतम्। यदेदं वृतान्तं पूज्यपादै र्ज्ञातं तदा रमणभाई श्रावक-माहूय कथितम्। यदि भवता मम गुणानुवादसभायोजनं कृतं, तर्ह्यहं विहृत्यान्यत्र गमिष्यामि।

रमणभाईश्रावकेण कथितं-भगवन्तः! भवतां गुणानुवादकरणेन सर्वेषां बालजीवानां हृदये संयमधर्मस्य स्थापना भविष्यति। पूज्यपादेन कथितं-यदि भवतो गुणानुवादकरण-स्येच्छा वर्तते तर्हि पूर्वकालीनमहापुरुषाणां गुणानुवादं कुरुथ, मम जीवने प्राचीनमहर्षितुलनायां गुणस्य लेशोऽपि न वर्तते।

## ३१) योग्यतामूर्तिः

विक्रमस्य १९९१ तमे वर्षे राधनपुरे चैत्रमासे शाश्वत्योलिकायां नवपदाराधनं प्रार्वतत, पूज्यगुरुदेव श्रीदानसूरीश्वरमहाराजै र्ज्योतिश्शास्त्रेण ज्ञातं, अस्मिन् वर्षे चैत्रशुक्लचतुर्दशीदिने-ऽतीव श्रेष्ठमुहूर्तमस्ति। अतोऽस्मिन् श्रेष्ठतमदिने यद्युपाध्यायप्रेमविजयस्तृतीयपदमारुढः क्रियते, तर्हि जैनशासने तस्य पुण्यप्रभावप्रसारो भावी।

ततो दानसूरिगुरुवरैच्छलेन पत्तनपुरात् प्रेमविजयमाहूय पदग्रहणायाज्ञा दत्ता। तदा प्रेमविजयः पदग्रहणस्य वार्तां श्रुत्वा पदग्रहणायानिच्छा गुर्वग्रे प्रदर्शिता। नयनजलेन गुरुचरणे प्रक्षाल्य भावपूर्णहृदयेन विज्ञप्तिः कृता।

भगवन्तः! पदग्रहणे मे योग्यता नास्ति, अतो भवद्भिः कृपां कृत्वा पदभारो मम शिरसि न क्षेपणीयः। किंतु पूज्यपाद-दानसूरीश्वरमहाराजैश्चैत्रशुक्लचतुर्दशीदिने प्रेमविजयाय तृतीयपदं, प्रेमविजयस्य पट्टधररामविजयाय च वाचकपदं प्रदत्तम्।



## ३२) गुणानुवादमूर्तिः

कर्णावतीपुर्यां पूज्यपादानां पट्टधररत्नव्याख्यानवाचस्पतिविजयरामचन्द्रसूरीश्वराणां प्रवचनं श्रुत्वा कस्यचित् श्रावकस्य शङ्का समुत्पन्ना। द्वितीयदिने पूज्यपादेभ्यः शङ्का प्रदर्शिता, पूज्य-पादेन कथितं मम शिष्यरामविजयस्य प्रवचने शास्त्रविरुद्ध एकोऽपि शब्दो नागच्छति। तथा श्रावकस्य शास्त्रोक्तिं दर्शयित्वा शङ्का निवारिता। कथितञ्च मम शिष्यस्य रामविजयस्य प्रवच-नानि यदि संस्कृतभाषायां परिवर्तितानि क्रियन्ते तर्हि भाविप्रजाभ्यः शास्त्रतुल्यानि भविष्यन्ति।

स्वशिष्यस्यापि विद्यमानगुणानुवादकरणे पूज्यपादास्तत्परा अभवन्।

## ३३) विनयमूर्तिः

अणहिलपुरपत्तननगरे पूज्यपादानां चातुर्मासमभवत्। चातुर्मासे पूज्यपादेन स्याद्वादरत्नाकरग्रन्थः पठितुमारब्धः। अतिकठिनं तं ग्रन्थं महान्तो विद्वांसोऽपि पठितुमसमर्था अभवन्। तद्ग्रन्थपठनसमये पूज्यपादानाम् कासु पङ्क्तिषु शङ्का जाता, स्पष्टार्थं ज्ञातुं न पार्यते तदा तस्याः शङ्काया निवारणार्थं वाराणसीपण्डितवर्यसमीपे पूज्यपादाः पाटोपरिष्टादुत्तीर्य, भूमावासनोपर्युपविश्य अपृच्छन्

तदा पण्डितेन कथितं, भवन्तो महान्त आचार्याः सन्ति, अनेकशिष्याणां गुरवः सन्ति, यदा कस्याञ्चित् पङ्क्तौ शङ्का भवेत् तदा भवता पाटोपर्युपविविष्टेनैव प्रष्टव्यं। पूज्यपादेन कथितं, विद्या विनयेन शोभते, विनयेनैव गृहीता विद्या सद्यः सफला भवेत्।

## ३४) प्रभावमूर्तिः

महाराष्ट्रदेशे कोल्हापुरनगरयुपधानतपस आराधना प्रवर्त्तमानासीत् मालारोपणप्रसङ्गे पूज्यपादा विहारं कृत्वा समागताः। मालारोपणप्रङ्गस्य भव्यमहोत्सवः प्रारब्धः। सुश्रावकहुकमीचन्देन तृतीयामालारोपणस्य लाभः लब्धः। मालारोपणस्य पूर्वरात्रं हुकमीचन्दस्योदरे महती वेदना सञ्जाता, प्रातं यावदुदरपीडा शान्ता न जाता, किन्तु प्रतिसमयं वर्धमानासीत्। मालारोपणप्रसङ्गे स्थातुमपि स श्रावकोऽसमर्थः सञ्जातः।



पूज्यपादा ईदृशं वृतान्तं ज्ञात्वा सुश्रावकस्य समीपे गताः, सुश्रावकः पूज्यपादानां पुरस्तात् रटितुं लग्नः। मम मालारोपणस्य भावनां भवन्तः पूर्णां कुर्वन्तु, आशीर्वादं च ददतु, पूज्यपादेन वासक्षेपं गृहीत्वा सुश्रावकस्य मस्तके क्षिप्तः। शनैः शनैः सुश्रावकस्य वेदना प्रशान्ता जाता, पूज्यपादानाञ्च करकमलैर्मालारोपणं कारितम्।



## ३५) प्रेममूर्तिः

जावालनगरे पूज्यपादानां द्विपञ्चाशता मुनिभिः सह चातुर्मासमभवत्। उपाश्रयस्य समीपे ठक्कुरस्य गृहमासीत्। अश्विनमासे ठक्कुरेण श्रावकेभ्यः पृष्टम्। अस्मिन्नुपाश्रये कस्य चातुर्मासमस्ति? श्रावकैः कथितमाचार्यप्रेम-सूरीश्वराणां, तैः सह कतिपया मुनिवराः सन्ति, श्रावकैः कथितं द्विपञ्चाशत्, साश्चर्यमनसा ठक्कुरेण कथितं, एकस्मिन्नुपाश्रये द्विपञ्चाशतो मुनिवराः कथं वसन्ति, पूर्वस्मिन् वर्षे चातुर्मासे तु त्रय एव मुनिवरा आसन्, तथापि मयोच्चस्वरेण कोलाहलः श्रुतः। अस्मिन् वर्षे एकोऽप्यक्षरो न श्रुतः। ठक्कुर उपाश्रयमागम्य पूज्यपादानां वन्दनां कृत्वाशीर्वादञ्च गृहीत्वा स्वन्धन्यमन्यो पुनर्गृहे गतः।

## ३६) समाधिमूर्तिः

विक्रमस्यः २०२४ तमे वर्षे स्तम्भनतीर्थे पूज्यपादप्रेमसूरीश्वरमहाराजाः, तदा तत्र तेषां वपट्टप्रभावकयुगप्रभावकाचार्यदेवरामचन्द्रसूरीश्वरमहाराजादिमुनयो विराजमाना आसन्। वैशाख-कृष्णैकादशीदिन आगतः, पूज्यपादा अद्य शरीरेणास्वस्थाः किन्तु मनसा सुप्रसन्ना आसन्, यथा विध्याते दीपे तेजोऽधिकं वर्धते, तथा तस्मिन् दिने पूज्यपादेन स्वपट्टधररत्नदीक्षायुगप्रवर्तक-रामचन्द्रसूरीश्वराणां प्रवचने स्वसानिध्यं दत्तम्। स्वशिष्येभ्यो वाचना हितशिक्षा च प्रदत्ता, साय-ङ्काले पञ्चवादनयुपाश्रयस्थितश्रीपार्श्वप्रभूणां दर्शनं कृतम्। सूर्यास्तानन्तरमावश्यकक्रियां जागर्यापूर्णचित्तेन कृता।

रात्रौ नववादने स्वशिष्यैः समाधिप्रदस्तोत्राणि श्रावितानि। सार्धवशवादने हृदयेऽसह्यवेदना जाता, शिष्यैः पूज्यपादाः पाटोपरि शायिताः। मुनिगुणरत्नविजयेन मधुरस्वरेण गुर्जरभाषायां स्वाध्यायाः श्राविताः। पूज्यपादानामन्तिमकालं ज्ञात्वा स्वप्रथमपट्टधरविजयरामचन्द्रसूरीश्वरेण नमस्कारमहामन्त्रस्य श्रवणं कारितम्, स्वविनयिशिष्यमुखेन नमस्कारमहामन्त्रश्रवणं कृत्वा पूज्यपादानामात्मा स्वर्गगामी जातः।

* अमृतानुवादः *

परगुणान् गुणा यस्य प्रेक्ष्य प्रमोदमाप्नुवन्।
[1]गुणाः स्तुविन्त तं प्रेम-सूरीशं गुणवत्सलम्[2] ।।

---

१) जनाः गुणिनः स्तुवन्ति इति सामान्यम्, गुणिनः गुणान् स्तवन्ति-इत्यतो गुणिषु मात्सर्याभावः, किन्तु गुणा यदि कमपि स्तुवन्ति-तत्तु गुणिनस्तस्याद्भुततरं चरितमिति भावोऽत्र व्यज्यते।

दशाङ्गधूपवच्चारित्रसद्गन्धमनोभिराम!
पूज्यपादाचार्यप्रवर!
श्रीप्रेमसूरीश्वर! भवतः सदाङ्गेश्वरसाम्राज्यं
जयते... विजयते... विजयतेतराम्!!!!!

# चतुर्थो

## विभागः



शास्त्रचिन्तनवह्निप्रज्वलितदोषदुर्गन्धानां

सद्भावगन्धं प्रकटयन्तः भव्यात्महितकरप्रभावानां

गुणप्रकरपूज्यपादाचार्यप्रवराणां

प्रेमसूरीश्वराणां प्रेमपारायणाभिधे श्रीनिःश्रेयसे

प्रेमदशाङ्गधूपाख्यचतुर्थो विभागः

- प्रेमदशाङ्गधूपं नवोदितरीत्या स्वीकरोमि।
- प्रेमदशाङ्गधूपः विना वह्निं प्रज्वलति।
- प्रेमदशाङ्गाधूपस्य स्मरणमपि दोषदुर्गन्धं हरति।
- प्रेमदशाङ्गधूपगुणधूम्ररेखा जनमनसि सद्भावगन्धं वितनोति।
- प्रेमदशाङ्गधूपोऽविद्यमानोऽपि सदैव हृदयसदने विद्यमान इव भव्यात्महितं विरचयति।





# सूरिश्रीप्रेमस्तुत्यनुवादः

- गूर्जरभाषायां- आचार्यश्रीविजयमुक्तिप्रभ सूरिः
- *अनुवादको ज्ञानभूषणविजयो मुनिः

शोभितावात्मकमलौ, तपागच्छनभोऽङ्गणे।
तत्पट्टे राजते दानसूरीश्वरो महामतिः।।१।।

तत्पट्टे प्रेमसूरीशः सच्चारित्री सुदीप्यते।
वन्दे तं प्रेमसूरीशमाशिषं देहि मे सदा।।२।। (युग्मम्)

सम्मुल्लसति वात्सल्यवारिधि र्यस्य जीवने।
वहन्ति करुणाधाराः सततं यस्य जीवने।।३।।

सद्भावनिर्मलज्योति दीप्यते यस्य नेत्रयोः।
वन्दे तं प्रेमसूरीशमाशिष देहि मे सदा।।४।। (युग्मम्)

व्रतमादाय सद्ज्ञानयज्ञमारब्धवान् रहः।
येन शास्त्रं पठित्वाहो ज्ञानविस्तरणं कृतम्।।५।।

गुरुं हृदि प्रतिष्ठाप्य यो गुरोर् हृदितिष्ठति।
वन्दे तं प्रेमसूरीशमाशिषं देहि मे सदा।।६।। (युग्मम्)

क्रमाद् यो गणि-पंन्यास-पाठको गुरुणा कृतः।
श्रुत्वा सूरिपदं स्वस्मै यः साश्रुलोचनोऽभवत्।।७।।

दत्तं सूरिपदं यस्मै गुरुणाज्ञाबलात् स्वयम्।
वन्दे तं प्रेमसूरीशमाशिषं देहि मे सदा।।८।। (युग्मम्)

दशशिष्या गुरो र्न स्युस्तावन्न स्यामहं गुरुः।
इत्थं कृतप्रतिज्ञो यः शिष्यनिस्पृहतां भजन्।।९।।

---

* पू.आ. श्री विजय रामचन्द्रसूरिसमुदायः

आदर्शसर्जकश्चासीदितिहासे महामुनिः।
वन्दे तं प्रेमसूरीशमाशिषं देहि मे सदा।।१०।। (युग्मम्)

दीक्षां स्वीकृत्य नित्यं यः करोत्येकासनं तपः।
मध्याह्ने तप्तभूमौ यः स्थंडिलार्थं च गच्छति।।११।।

पूर्वर्षीणां स्मृति र्यस्य दर्शनेन भवत्यहो।
वन्दे तं प्रेमसूरीशमाशिषं देहि मे सदा।।१२।। (युग्मम्)

त्रिशताधिकशिष्याणां य आसीद् गच्छनायकः।
अगाधकर्मशास्त्राणां य आसीद् ग्रन्थसर्जकः।।१३।।

प्रभावकसुशिष्याणां य आसीद् गुरुताभृतः।
वन्दे तं प्रेमसूरीशमाशिषं देहि मे सदा।।१४।। (युग्मम्)

जन्म प्राप्तं मरौ देशे मोहिता येन गूर्जराः।
समाधिः स्थम्भने प्राप्तो मृत्युर्महोत्सवः कृतः।।१५।।

मन्त्रवद् यस्य नाम्ना हि कामो नश्यति सत्वरम्।
वन्दे तं प्रेमसूरीशमाशिषं देहि मे सदा।।१६।। (युग्मम्)

अगण्यगुणपुञ्जोऽसि गायामि त्वद् गुणान् कथम्?।
स्वर्गगामिन्! गुरो! देहि मेऽञ्जलिमात्रसद्गुणान्।।१७।।

ततो मुक्त्यंशुसद्ज्ञानज्योतिः प्रादुर्भवेन्मम।
वन्दे तं प्रेमसूरीशमाशिषं देहि मे सदा।।१८।। (युग्मम्)

* अमृतानुवादः *

संसारान्धौ महाध्वान्ते देहिनां मोहचक्षुषाम्।
प्रेमाचार्यो निरस्तोऽर्को मुक्त्यंशवे मुदोदितः[1]।।

१) निर्गतः अस्तः यस्मात् सः निरस्तः - अस्तरहितः



# अहो वचनसिद्धिः

–*प्रशमरक्षितविजयो मुनिः

परमाराध्यपादगुरुदेवश्रीमद्विजयमुक्तिप्रभसूरीश्वराणां मम या संप्राप्तिरभवत्, तस्याप्तौ कर्मसाहित्यनिष्णातपूज्याचार्यदेवश्रीमद्विजयप्रेमसूरीश्वरा एव प्रधानं कारणम्।

श्लाघ्यतरा वचनसिद्धता तेषाम्, योग्यजनेष्वेव पतति गङ्गावाहिनीप्रवाहः।

तैः कथिते कृतः प्रयत्नो याति सफलतामवश्यमेव।

प्रसङ्गतो ज्ञेयं, तच्चेदम्।

नाशिक्यपुरे जयचन्दनामापि श्रावकः, तस्य बाबु इति उपनाम्ना प्रसिद्धिर्जातः।

माता दिवालीबेनः, पत्नी च नाम्ना शान्ता शान्तशीला।

पूज्य मुनिप्रवर श्री मुक्तिविजयानां सम्पर्कतः प्रवचनतश्च सञ्जातं तस्य मनो वैराग्यवासितम्।

एकदा संयमोत्सुकमना जयचन्दः पूज्यप्रेमसूरीणां समीपे गतवान् संयमग्रहणायाशीर्वादहेतोः।

तदा ज्ञापितं यद्।

जयचन्दः – भगवन्तः! नाशिक्यवासी जयचन्दनाम्नाहमस्मि।

पूज्यवराः – कथमागतोऽसि त्वम्।

जयचन्दः – पूज्य मुक्तिविजयानां समीपे संयमग्रहणाय भवदाशीर्वादहेतोः समुपस्थि–तोस्मि।

पूज्यवराः – तव परिवारे कोऽप्यस्ति न वा?

जयचन्दः – मम परिवारे माता पत्नी पुत्र्यौ पुत्रौ च सन्ति।

पूज्यवराः – प्राप्तौ किं वयः पुत्रौ?

जयचन्दः – तयोः ज्येष्ठः प्रकाशनामा पञ्चवर्षीयः, कनिष्ठश्च महेन्द्रनामा त्रिवर्षीयः।

पूज्यवराः – दीक्षां ग्रहीष्यसि यदि त्वमेकाकी एव, किं भावि पुत्रयोः?

जयचन्दः – भगवन्तः! वर्तेते लघुतरौ तौ पुत्रौ।

पूज्यवराः – मा कुरु चिन्तां, पुत्रौ संयमोत्सुकमनसौ भवतः, तावत् प्रतिक्षस्व मा त्वरस्व।

जयचन्दः – तथेति, भवता यदुक्तं शोभनतरं, भवतां मुखान्निर्गतं गृहीतं मया, एवं दातव्यो हितोपदेशः सदा। भगवन्तः! ददातु नियमं कृपां कृत्वा, न गृह्णीयां यावद्दीक्षां, तावत् भवतु सकलविकृतिपरित्यागः।

पूज्यवराः – गृहाण, शिवास्ते पन्थानः, नियमं गृहीत्वा ततो जयचंदो द्वौ पुत्रौ तथैव सज्जीकृतवान् ''तथा कर्त्तव्यं यथा वदेत् पिता'', नियमं यथावत् परिपाल्य स सपुत्रो गृहीतवान् दीक्षां, तेषु–

– * पू.आ.श्री विजय रामचन्द्रसूरि समुदायः

जयचन्दो मुनिश्रीजयकुञ्जरविजयो जातः,
प्रकाशो मुनिश्रीपूर्णचन्द्रविजयो जातः,
महेन्द्रो मुनिश्रीमुक्तिप्रभविजयो जातः।

एतेषु त्रयेषु मह्यमभवद् सद्गुरूणां पूज्य मुक्तिप्रभसूरीणां सम्प्राप्तिः, तस्यां कारणं पूज्यवराप्रेमसूरीश्वरा एव।

* अमृतानुवादः *

वचनं यस्य सिद्धं यत्–मनोभीप्साऽऽप्यते ध्रुवम्
मधुव्रतं मुक्तिपद्मेऽलिहन् भव्या मधुव्रताः।।

(अनुष्टुप्[१])

१) रविपुला छन्दः



# “नमो प्रेमसूरीश्वरं”



–*[१]देवाङ्गरत्नविजयो मुनिः

आनन्दमङ्गलपरमकमला–
केलिमञ्जुलमन्दिरम्।
मुनिराजसंस्तुतचरणपङ्कज!
नमो प्रेमसूरीश्वरम् ।।१।।

[२]व्योम–कषाय–नन्द–शशि–
फाल्गुनशुक्ल चर्तुर्दशी।
श्रीभगवानदासकङ्कुदेवीसुत!
नमो प्रेमसूरीश्वरम्।।२।।

नान्दियाग्रामजातपिण्ड–
वाटकसुरतव्यारावासम्।
सुकृतिकान्त! भुवननायक!
नमो प्रेमसूरीश्वरम्।।३।।

सप्तदशवर्षप्रव्रज्यादान
दानप्राप्तसिद्धगिरिवरम्।
मृगशीर्षमासकृष्णषष्ठीदिने...
नमो प्रेमसूरीश्वरम् ।।४।।

निष्परिग्रहितापारिजातपुष्ट
गुर्वाज्ञाप्राणमन्त्रवरम्।
मैत्रीप्रमोदकरुणामाध्यस्थ वरं
नमो प्रेमसूरीश्वरम्।।५।।



---

– * पू.आ.श्री भुवनभानुसूरि समुदायः
१) संस्कृत–गूर्जर मिश्रगिरायं लेखो,
‘विमलकेवल...इत्याद्यनुसारी, प्रशस्यः प्रयासः,
गेयतानुसरणं क्वचित् खण्डितं,
यदि पादान्तानुप्रासः स्यात् तर्हि शोभनम्– अमृतः

दानसूरिवरचरणसेवक
प्रवरगुणगण मंदिरम्।
भवकोटिसञ्चितपापनाश
नमो प्रेमसूरीश्वरम्।।६।।

त्याग-तितिक्षा-स्वाध्याय-सेवा
कर्मशास्त्रनिपुणमतिम्।
निःस्पृहतानिधानलीन!
नमो प्रेमसूरीश्वरम्।।७।।

सिद्धान्तमहोदधिर्विरलपदवी
समर्पिता या गुरूवरैः।
द्युतिरतिमतिबुद्धिधारक!
नमो प्रेमसूरीश्वरम्।।८।।

नमस्कारमहामन्त्राक्षर-
समवर्षप्रव्रज्यापर्यायकम्।
परमशान्त सर्वसुखदायक!
नमो प्रेमसूरीश्वरम्।।९।।

चतुरशीतिवर्षायुर्मानम्,
सूरिप्रेमदर्शनसुखकरम्।
दुरितवारकभव्यतारक!
नमो प्रेमसूरीश्वरम्।।१०।।

प्राप्तयोगिरूपविशुद्धब्रह्म
मूर्तिधीरवीरमनोहरम्।
सूरिराजसेवाकरणतत्पर
देवाङ्गरत्न सुहितकरम्।।११।।

- आसो सुद १, गुरु २०७३,
दि. २१/९/२०१७ पिण्डवाडा

※ अमृतानुवादः ※
प्रेमसूरीश्वरं नौमि मैत्रीमानसमन्दिरम्
दानसूरेर्वरं पट्टं योऽद्योतयद् व्रतांशुभिः।।



## सततं स्मरामि
# प्रेमसूरीश्वरम्...

# प्रेमषोडशकः

– दिव्यदर्शनविजयो मुनिः

परमतत्त्वप्रकाशन भास्करो–
निखिलमोहतमोभरनाशनः।
गहनतत्त्वविवेचन सुज्ञधीर्–
विजयते 'गुरु प्रेम' गुणाम्बुधिः ।।१।।

भुवन भ्रान्ति निशाचरराघवो
मम मनःसरसि प्रशमाम्बुजम्।
शरणदः शिवदोऽभयशर्मदः।
विजयमे 'गुरु प्रेम' गुणाम्बुधिः ।।२।।

सकलकर्मविनाशमहाबलस्–
तव बलात् परमद्‌र्धिरिलातले।
यतिपते! भवतात् सततं जने
विजयमे 'गुरु प्रेम' गुणाम्बुधिः ।।३।।

परमब्रह्मविभाविलसन्मुखश्–
चरणदेवसरिद् वृषवाहनः।
चरणदोषनिशा दिवसेश्वरः
विजयमे 'गुरु प्रेम' गुणाम्बुधिः ।।४।।

कुरुत हे गुरुराजः प्रदानतस्–
तव गुणा मयि चित्तप्रसन्नताम्।
प्रतिभवं गुणसागर ! देहि मां,
चिरतरं तव दर्शनमङ्गलम् ।।५।।

नहि रति र्मम चेतसि कर्मभिर्–
व्यरतिनक्रभरे भवसागरे।
तव गुरोश्चरणं शरणं सदा।
वितर प्रेमसुधाकर पावनम् ।।६।।

दिशतु तेऽङ्ह्रिकजं सदनं परं
प्रवर संवर संवरणं यतः
चरणराजसुगुप्तिसुरक्षितं
गुणगुरो! तनुताद् गुणसेवधिम् ।।७।।

गुरु[1] कदा भविता तव दर्शनं
प्रतिभवं भवतात् तव सेवनम्।
नय रयेण शिवं तव सेवकं
फलतु दिव्यतराऽमृतभावना ।।८।।

सकलकर्मसुशास्त्रविशारदो
विविधभङ्गिसुभङ्गिविवेचकः
नयप्रमाणविधानबृहस्पतिः
स जयतात् गुरु प्रेम पयोनिधिः।।९।।

परमतत्वप्रकाशदिवाकरः
स्वपरदोषगुणेक्षणलालसः
प्रवरशिष्यसुसर्जनतत्परः
स जयतात् गुरु प्रेम पयोनिधिः।।१०।।

---

१) 'दर्शनं' पदस्य विशेषणत्वेन विवक्षितम्

चरणहेतिविनष्टमनोभवः
भुवनभव्यजनाश्रयदायकः
बहुपवित्रपदार्थसुचिन्तकः
स जयतात् गुरु प्रेम पयोनिधिः।।११।।

सहजशक्तिविवेकविनम्रता
सुभगतासमतासमचित्तता
इति गुणोत्तरविष्ठरसंस्थितः
स जयतात् गुरु प्रेम पयोनिधिः।।१२।।

निखिलशास्त्रसुधाऽशनदायको
निपुणधर्मसुमर्मविधायकः
गहनतत्वविवेचनसुज्ञधीः
स जयतात् गुरु प्रेम पयोनिधिः।।१३।।

विकटसंकटवृन्दविनायकः
चरणदः वरदो भवशर्मदः
भवकुरोग महार्त्तिभिषग्वरः
स जयतात् गुरु प्रेम पयोनिधिः।।१४।।

चिकि[१]लगुण्डितचेतनवारिदो
जलधिवत् बहुगम्भीरमानसः
शिव विता[२]नकुषां[३]कुकुषोपमः
स जयतात् गुरु प्रेम पयोनिधिः।।१५।।

समयभागिरथीवृषवाहन[४]
स्त्वमसिदोषखटाकु[५]भुजङ्गमः
प्रम[६]यतिक्तरसोत्कटपायसः
स जयतात् गुरु प्रेम पयोनिधिः।।१६।।

✻ अमृतानुवादः ✻
दिव्यं ते दर्शनं प्रेम सूरे! भूरि गुणोज्ज्वलम्।
भक्तानां जीवितं वर्यं तव संवर सेवनात्।।

१) कादवं २) यज्ञ ३) अग्नि ४) शंकर ५) उंदर ६) हिंसा



# निष्परिग्रहः प्रेमविजयः

– *आचार्यश्रीविजयरत्नसञ्चयसूरिशिशुः

हे प्रेमविजय! त्वममुमेकमेव चोलपट्टकमरक्षः ? तर्हि कदाचिदकाण्डमेतद् दरिष्यति, तदा किं करिष्यसि? ततो दानसूरिः स्नेहेनासूचयत्, एकं 'चोलपट्टकम्' अधिकं रक्ष ? प्रेमविजयो गुरुमपृच्छत् – हे गुरुदेव! भवतः स्नेहो योग्यः, किन्तु द्वयोः चोलपट्टकयो रक्षणे परिग्रहो न वर्धेत ?

दानसूरिः प्रत्युत्तरयद्–यदापत्काले आवश्यकता स्यादपि, दानसूरिः संविग्नगीतार्थ एवासीत्, अपि तु शिष्याणां द्रव्यभावानां योगक्षेमस्य करणं, तद् गुरोः कर्तव्यम्, इति भावेन द्वितीयचोलपट्टसूचनं कृतम्, मध्यकाले प्रतिलेखनस्य विधौ बृहद्वन्दनं यच्छतः प्रेमविजयस्य विशीर्णश्चोलपट्टकः, तद् चोलपट्टकं दृष्ट्वा अवदत्, ''अहम् अकथयत् पुरा एव यदि चोलपट्टं दरिष्यति तर्हि ? वद! अधुना किं करणीयम् ?'' यावत् प्रेमविजयः किञ्चित् वदेत् तावत् एव कश्चित् श्रावक उपाश्रयस्य सोपानान्यारुह्य समीपमागत्यानमत्, अभणच्च हे साधो! मम गृहे इदं वस्त्रमनुपयोगि एव आसीत्, मया चिन्तितमधुनाहं वन्दनाय एव गच्छामि, तर्हि एतद् वस्त्रमपि सह नयामि यतो भवतामुपयोगि स्यादिति विचिन्त्य वस्त्रमिदं गृहीत्वागतः। यदि भवतो योग्यमिदं वस्त्रं तर्हि पश्यतु। प्रेमविजयस्तद् वस्त्रमपश्यत् यादृशं स्थूलं प्रमाणोपेतमपेक्षितं तादृशं हि तद् वस्त्रमभवत्। ततो याचित्वा तद् वस्त्रं स्वीकृतं परिधापितं च।

निष्परिग्रहतायाः प्रभावोऽसौ इति ज्ञात्वा दानसूरिरपि प्रसन्नो जातः। अयं निष्परिग्रहगुणो मयि अपि भवतु इति एवं प्रेमसूरिवराणां देहत्यागसंवत्सर-संस्मरणावसरे निष्परिग्रहि प्रेमविजयं प्रार्थयामि.....।



✻ अमृतानुवादः ✻

परिग्रहो महाग्राहः संयतजीविताम्बुधौ।
गृह्णाति यो यतेः सत्त्वं सत्वरं मज्जयेद् भवे।।

– ✻ श्री बुद्धि-तिलक शान्तिचन्द्रसूरिसमुदायः

# प्रेमसूरीश्वरं स्तुवे

–* देवाङ्गरत्नविजयो मुनिः

भगवानदासजी कङ्कुदेवीचरणसेविन्!।
पिण्डवाटक वासिन्! प्रेमसूरीश्वरं स्तुवे ॥१॥

सुरतव्यारानगरे विरलधर्ममानसम्
चन्द्रकान्तिप्रेमकारिन्! प्रेमसूरीश्वरं स्तुवे ॥२॥

दीक्षाभीक्षायाभिलाषिन्नत्युग्रविहारचारिन्!।
गुरूगिरिपादसेविन्! प्रेमसूरीश्वरं स्तुवे ॥३॥

विषये वैरागिन्! वैराग्येऽनुरागिन्! सदाचारिन्!।
भानु-पद्म-जयकारिन्! प्रेमसूरीश्वरं स्तुवे ॥४॥

संयमारामे विश्रामिन्! वीरशासनानुरागिन्!।
स्वाध्यायसेवाभिरामिन्! प्रेमसूरीश्वरं स्तुवे ॥५॥

कर्मशास्त्रविधौ स्रष्टः मोहभयदुःखभ्रष्ट!।
सदा भवभयात् त्रस्यन्! प्रेमसूरीश्वरं स्तुवे ॥६॥

शिबिरात् श्रमणशिल्पिन् ! निःस्पृहिन् ! निष्परिग्रहिन्!।
स्वभावाद् विस्मयकारिन् ! प्रेमसूरीश्वरं स्तुवे ॥७॥

नित्यं सेवते देवस्त्वां मित्रानन्द! हेमरत्नम्!
सानन्दकल्याणकारिन् प्रेमसूरीश्वरं स्तुवे ॥८॥

दशहरा, २०७३



* अमृतानुवादः *
श्राद्धभगवानावासे प्रेमधर्मावतारतः।
त्यागकुङ्कुमकान्तिश्रीः प्रास्तसरद् व्रतौकसि॥

– * पू.आ.श्री भुवनभानुसूरि समुदायः

# ।। सूरिप्रेमगुणगेयम्।।

(तर्ज: 'जय जय सीयाराम बोलो, जय जय सीयाराम' इति रामायण चोपाई)

- * रैवतभूषणविजयो मुनिः

प्रेमसूरीश्वरचरणकमले
भ्रमरत्वं भजेऽहम्...

आराधय प्रेमसूरिवरचरणं
विमलीकुरु निजमानवाचरणं।
तारकमभिवन्दस्व गुरुमेकं
सरलहृदयं सहजविवेकम् ।।१।।
जय जय सूरिप्रेम ! वद, जय जय सूरिप्रेम !

गुरुरस्ति सकलागमवेदी-
दानसूरिरतिशयगुणधारी।
तच्छिष्यप्रेमसूरिरतिनामी
यस्य त्रिलोको गुणमारटति।।२।।
जय जय सूरिप्रेम ! वद, जय जय सूरिप्रेम !

आगमपरिणतमतिनैपुण्यात्
स्वपुरुषार्थेन, गुरुप्रसादात्।
निर्ग्रन्थेन ग्रन्थद्विकं रचितं
क्षपकश्रेणीं च सङ्क्रमकरणम्।।३।।
जय जय सूरिप्रेम ! वद, जय जय सूरिप्रेम !

श्रीवीरप्ररुपितकर्मसिद्धान्तं
सरलीकृतम् निजधिया नितान्तम्।
ततो दत्ता गुरुणा पदवी।
सिद्धान्तमहोदधिरितिगुर्वी ।।४।।
जय जय सूरिप्रेम ! वद, जय जय सूरिप्रेम !



---

- * पू.आ.श्री रामचन्द्रसूरि समुदायः



उज्ज्वल चारित्रशोभितशरीरं
श्रुतताम्बुलसुवासितवदनम्।
यस्य तपःसुरभिपूतचित्तं।
तं चारित्रचूडामणिं वन्दे ।।५।।
जय जय सूरिप्रेम ! वद, जय जय सूरिप्रेम !

जनमनहृत् प्रतिबोधकवचनैः
प्रतिबोधयति यो भविजीवान्।
वैराग्यरङ्गेन रञ्जयति जीवान्
स्थापयति संयमे बहुभव्यान् ।।६।।
जय जय सूरिप्रेम ! वद, जय जय सूरिप्रेम !

दश शिष्या मम गुरोर्न भवन्ति
तावच्छिष्यमहं न करोमि।
इति दृढप्रतिज्ञः प्रेमसूरीशो
भवति शतत्रयमुनिगणाधीशः ।।७।।
जय जय सूरिप्रेम ! वद, जय जय सूरिप्रेम !

द्रव्यद्वयेन सकृदेवभोजी
कर्मापनयने कर्मठयोगी ।
विना पादत्राणं स्थंडिलभूमिं
व्रजति मध्याह्नेऽर्कतप्तभूमौ।।८।।
जय जय सूरिप्रेम ! वद, जय जय सूरिप्रेम !

कषायजितारिः समताविहारी
अन्तरङ्गारिषड्वर्गविदारी,
**रैवता**द्रिवत् स्थिरसमाधिं,
प्राप्य गुरुः सञ्चरति सुगतिम्।।९।।
जय जय सूरिप्रेम ! वद, जय जय सूरिप्रेम !

* अमृतानुवादः *
जय प्रेमपदाम्भोज! जीविते व्रतसौरभम्।
यद्ब्रह्म स्मारयेन्नेमिं गुणरैवतपर्वते।।

# नमो पेमसूरिवराणं
(प्राकृतः)

- * क्षेमरत्नविजयो मुनिः

नमुत्थुणं दसविहजइधम्मजुत्ताणं, बावीसपरिसहपारगाणं उवसमभावसरोवराणं, निम्मल-जलचित्ताणं पहुआणासमप्पियाणं सयलजणसलाहणिज्जाणं परमसंवेगजुत्ताणं देहऽन्नभावधारा-परिवुड्ढियाणं दिक्खाधम्मपरिसेवियाणं सयलगुणरयणायराणं कम्मसत्थजलहिपारयाणं अनि-च्चाइभावणापरिभावियचित्ताणं सहजसमाहिउवलद्धाणं अन्नसाहुजणाइसमाहिदयाणं समिइ-गुत्तिसाहयाणं अगाह- संजमाणंदाहिगयाणं समुचियसामन्नभावपत्ताणं वेरग्गचक्खुदेक्खयाणं तड-विरहियवच्छलसायराणं अगमनिगमसंकेयमुणियाणं परमविवेइयाणं जिणधम्मआराहयाणं नमो पेमसूरिवराणं।।१।।

नमोत्थुणं भगवंताणं ववहारकुसलाणं अज्झप्पहिययाणं आसियसमणगणहियचिंतयाणं पंचिदियसंवराणं नवबंभचेरगुत्तिजुत्ताणं चउविहकसायमुक्काणं पंचमहव्वयपत्ताणं पंचविहायार-पालणसमत्थाणं तवोरुईणं मुक्खमग्गदड्ढपहियाणं जोगमग्गसत्थवाहाणं संसारजलहिपोयाणं अनाहुयसहायाणं अकारणवच्छलाणं अणब्भत्थिअसाहूणं असंबंधबंधवाणं अनासत्तजोइणं सरलंतकरणाणं अन्नोवरि भावदयाचिंतियाणं समभावसिहराणं नाणपयासाणं विनयावयाराणं परमसद्धामंदिराणं दव्वगुणपज्जायपरिमुणियाणं ''तित्थयरो समो'' इइ अत्थसमत्थाणं, नमो पेमसूरिवराणं।।२।।

नमुत्थुणं समणाणं समणभावपत्ताणं भावसमणत्ताणं अप्पडियवियाराणं समणधम्मसंजुत्ताणं समणगुणमयाणं अउव्वसग्गसोहाणं चउविहसंघसमणतित्थाणं पइयपावयाणं कम्मसेणापरिभवाणं, विसयग्गिसामयाणं कसायविसपरममंताणं रागरोसनिक्कासियाणं मुत्तिवहूहिययहाराणं मोहग्गिह-पवुत्ताणं संजमलीणमाणसाणं दोसपेक्खणनिमीलियनयणाणं परदोसभासणमूकाणं चउविहसंघ-चउरंगसेणापरिवयाणं आयरिअयअपच्छिमाणं तेलुक्कागुरूणं, पर दोससवणबहिराणं नमो पेम-सूरिवराणं।।३।।

नमोत्थुणं समणगुणभावियाणं समत्तरयणायरवुड्ढणससीणं समणत्तकप्पतरूणं समण-कियाउज्जोयकराणं परमगुणानुराईणं जइधम्मथिरकारयाणं मोहतिमिरनासदिणयराणं तिलोग-

- * पू.आ.श्री विजय रामचन्द्रसूरि समुदायः

उज्जोअकरदीवाणं जिणसासणसम्मत्थसमत्थधारयाणं जिणसासणरिसहखंधाणं नमो पेमसूरि-वराणं।।४।।

नमुत्थुणं सव्वजीवहियचिंतयाणं सव्वसमाहिट्ठाणाणं अहिनवदिणयराणं सिंहसत्तसालीणं धम्मनायगाणं सव्वलोउव्वयारीणं सव्वलोयपज्जोअगराणं पुरिसुत्तमाणं पुरिसवरसरोयाणं नाणचक्खुदयाणं पुरिसवरकेसरिणं सव्वुत्तमाणं लोगनायगाणं धम्ममग्गदयाणं सव्वलोयहियाणं सव्वलोयपइवाणं मोहरायाभयदयाणं धम्मवरदेसियाणं धम्मायरियाणं धम्मगुरूणं धम्मवरबोहीदयाणं धम्मवरसारहिणं अप्पडियपंचायारपत्ताणं निम्मलनाणदंसणधराणं धम्मवरवायराणं सिद्धंतामग्गपक्काणं सुहुमपरिणइपक्कलाणं वरपवयणपहावयाणं वरधम्मकहीणं वरवाइणं वरनेमिइयाणं वरतवस्सीणं परमंताणं वरंजणाणं वरकईणं वरजईणं नमो सूरिवराणं, जिअभयाणं -

जे अ अइया सूरिवरा, जे अ भविस्संति अणागए काले,
संपइ य वट्टमाणा सव्वे तिविहेण वंदामि।।५।।

✻ अमृतानुवादः ✻

सम्मं संजमपूयस्स जुयस्स सव्वज्जद्धणि
निरवज्जजईसस्स णमो पेमगुरुस्स णं।





# गुणनिधीनां गुणस्मरणम्

- अक्षयरत्नविजयो मुनिः

मुम्बापुरीसदृशेषु महानगरेषु यातायातनियमनार्थ प्रतिस्थलं दृश्यते यातायातसङ्केतः, य आङ्ग्लभाषायां Traffic Signal इति कथ्यते। प्रत्येकयातायातसङ्केतस्तम्भे सङ्केतत्रयी दृश्यते - १) रक्तसङ्केतः - सङ्केतोऽयं यानानि प्रतिषिध्यति। अध्वनि शीघ्रं धावद् यानमपीमं सङ्केतमवलोक्य गतिरोधं विदधाति। २) पीतसङ्केतः - इमं सङ्केतं विलोक्य यानचालका जागरूका भवन्ति, स्वयानगतिं शिथिलीकुर्वन्ति, पुनश्चावरुद्ध-यानचालकाः सङ्केतमिमं दृष्ट्वा गमनार्थं सज्जीभवन्ति। ३) हरित्सङ्केतः - रुद्धगतिकानां यानानां गमनार्थं सम्मतिसूचकोऽयं सङ्केतः। इमं सङ्केतं निरीक्ष्य यानैः स्वस्थानं प्रति गमनमारभ्यते। अनेन सङ्केतप्रबन्धेन प्रशासनेन दुर्घटना निवार्यते।

पूज्यपाद-पुण्यनामधेय-सिद्धान्तमहोदधि-श्रीमदाचार्यप्रवर-प्रेमसूरीश्वराणां गुणैः संयममौक्तिकै राजमाने जीवनेऽपि मयैदृशी सङ्केतत्रयी दृष्टा। तद्दर्शनार्थमागम्यताम्, तेषां महापुरुषाणां त्रीन् जीवनप्रसङ्गान् संस्मर्य, तेषां जीवनांशं परिचिनुमो वयम्।

१) रक्तसङ्केतः - अवरोधसूचकोऽयं सङ्केतः। पूज्यप्रवराणां कश्चिच्छिष्यो गुर्वाज्ञया प्रथममेव पृथक् चतुर्मासार्थमन्यस्मिन् ग्रामे गतः। आचतुर्मासं प्रभावकप्रवचनादीनि सञ्जातानि। सर्वे जना धर्मरुचयः सञ्जाताः परिवर्तनं चाप्तवन्तः। चतुर्मासपूर्णतावसरे तु मुनिवरोऽयमस्माकमेवेति प्रतीतं ग्रामजनैः। मुनिवरप्रस्थानप्रसङ्गे सर्वे साश्रुलोचनाः सञ्जाताः।

अनुचतुर्मासं विहृत्य मुनिवरेण पूज्यप्रवराणां प्रेमसूरीश्वराणां सान्निध्यं प्राप्तम्। मुनिवरागमनात् प्रागेव तत्कीर्तिः प्रेमसूरीश्वरानासादयत्। एवं प्रथमं चतुर्मासमेव भव्यं समाप्य कोऽपि विनेयः पुनरागच्छेत् तदा सामान्यतो गुरवः प्रशंसेयुस्तम्। परं, पूज्यवरैः पृथक् प्रतिस्पन्दः प्रदत्तः। आशीर्वादाय नतशीर्षं शिष्यमुक्तवन्तस्ते यद् - ''भोः! चातुर्मासं तु शोभनं कृतं त्वया। किन्तु, त्वद्राग-द्वेषौ बहुप्रशंसाः श्रुत्वा वृद्धिं गतौ न्यूनीभूतौ वा?''

श्रमणोपासकाः काममतिप्रशंसेयुस्त्वां, अतो गर्विष्ठो मा भवेति रक्तसङ्केतोऽवरोधसूचको विहित आश्रितश्रमणगणहितकाङ्क्षिभिः पूज्यवरैः।

२) पीतसङ्केतः - जागरुकतासूचकोऽयं सङ्केतः। जीवनं निरामयं भवेदित्यर्थं संसारिजनैर्यथा जागरुकताचर्यते, तथा संयमिभिः संयमजीवनं निर्दोषं भवेदित्यर्थं प्रमादराहित्यमाचारितव्यम्। पूज्यवराणामपि दृढं मन्तव्यमेतत्।

जीवनान्तिमावस्थायां वैद्येन कथितास्ते - ''औषधेन सह नित्यं मर्मरालाः सेव्याः।'' इति।

पूज्यवरैः सकृन्मर्मरालाः सेविताः। परमपरस्मिन् दिने तु मर्मराला निषिद्धाः। श्रमणा विज्ञप्तिं कृतवन्तः - ''भवद्भिर्मर्मराला निषिद्धाः, किन्त्वनुपानार्थमावश्यकं तत्सेवनम्।''

आत्मार्थिनो जागरुका गुरवः प्रत्युक्तवन्तः - ''अद्यप्रभृति मया मर्मरालास्त्यक्ता इत्येव ज्ञातव्यम्। यतोऽनुपानादपि दोषेभ्य आत्मरक्षणं बहुमूल्यम्। ह्यो मर्मरालरसविषय आसक्तोऽभवमहम्। अतस्तत्खादनमतःपरं दोषायैव। अत एतदर्थं प्रतिषिद्धं मया नितराम्।''

१) पू.आ.श्री विजयधर्मसूरिसमुदायः

पदार्थत्यागावलम्बनेन जीवनं दोषविमुक्तं कर्तव्यमिति जागर्यादर्शकः पीतसङ्केतो दर्शितः पूज्यवरैः।

३) हरित्सङ्केतः – प्रसन्नतासूचकोऽयं सङ्केतः। श्रामण्ये कदाचित् सेवावसरः प्राप्येत, कदाचित् कष्टसहनावसर आप्येत। कदाचित् सहायावसरो लभ्येत, कदाचिदध्ययनावसरोऽपि प्राप्येत। आप्तवाचा ज्ञायते यदेतत् सर्वावसरानुत्सवतुल्यान् विज्ञाय श्रमणैः सानन्दैर्भवितव्यम्। सर्वदा निरीहैर्भव्यं, परन्तु कदापि निरुत्साहैर्नहि भव्यम्। पूज्यप्रेमसूरीश्वराणामेकमन्तःस्पृग् जीवनवृत्तं स्मर्यतेऽनुसन्धानेऽत्र।

एकदा सन्निवेशस्यैकस्मिन्नपि खण्डे शासनाग्रणीकस्तूरभाईवर्येण सह तेषां गोष्ठी प्रवर्तते स्म। तस्मिन्नेव खण्डे कश्चिद् बालमुनिरपि सुप्तवान् गोष्ठीप्रारम्भात् प्रागेव। कतिपयक्षणान्तरे लघुशङ्कानिवारणार्थं त्यक्तनिद्रो बालमुनिरुत्थितः। पूज्यवरैर्दृष्टः सः। ते स्वयं स्वस्थानादुत्थितवन्तः, बालमुनिसमीपं च गताः। लघुशङ्कानिवारणार्थं बालमुनये पिठरमपि दत्तवन्तः। बालश्रमणेन लघुशङ्का न्यवार्यत। पश्चात् खडान्तःस्थितेनान्तर्द्वारेण भूमितलं गत्वा पूज्यवराः स्वयं तत्प्रस्रावस्य पारिष्ठापनिकां कृतवन्तः।

बालमुनिं पुनः शाययित्वा प्रसन्नमनसस्ते पुनः स्वासनमागताः, तदा वृत्तमशेषं दृष्ट्वा कस्तूरभाईवर्यः पृष्टवांस्तान् – ''गुरवः! कथं पारिष्ठापनिकाकष्टं गृहीतं भवद्भिः स्वयम्? भवन्तस्तु महान्त आचार्याः। नेदं वः कर्तव्यम्। इतो बहिःखण्डे नैके साधवः सन्ति, भक्तिपरा अभ्यासरताश्च। कथं नाहूत एकोऽपि साधुर्भवद्भिः ?

सेवाकार्येण प्राप्तानन्दाः पूज्यप्रवराः प्रत्युक्तवन्तः – ''भो! एतस्मिन् लघुकार्ये न हि क्लेमः कोऽपि। यतो विनेयसेवालाभो बहुमूल्यः प्राप्यतेऽतिकष्टेन।''

तत्त्वतो यत् – 'वेयावच्चेण भंते! जीवे किं जणयइ? वेयावच्चेण तित्थयरनामगुत्तं जणयइ।' इति प्रभुवचनं, तत् तेषां हृदि प्रभुरिव प्रत्यतिष्ठत्। अत एव तेऽतिप्रसन्नमनसा बालश्रमणस्येदृशमपि सेवाकार्यं कृतवन्तः। अनेन तेषां जीवने तृतीयो हरित्सङ्केतो दृश्यते लघोरपि मुनेः सेवाकार्यं प्रसन्नचेतसा स्वीकर्तव्यमिति।

यातायातसङ्केतस्य त्रयोऽपि वर्णा एवंविधे तेषां जीवने दृश्यते। अतो मन्ये तेषां जीवनमपि यातायातसङ्केततुल्यमेव। तत्पूज्यानां स्वर्गारोहणसुवर्णवर्षे गुणस्मरणावसरे 'तद्गुणान् वयमनुपद्यामहे, एभिः स्वजीवनमपि गुणाढ्यं निर्मिमीमहे, अनेन विधेन च तेभ्यो भावाञ्जलिं दद्महे' इति बद्धप्रतिज्ञा भवेम। **गुणज्ञा हि गुणिनां गुणं पश्यन्ति गुणं वर्धयन्ति, गुणं साकारं कुर्वन्ति** इत्यनया प्रथया प्रस्तुतं गुणस्तवनम्।

* अमृतानुवादः *

श्रामण्याध्वनि दोषज्ञाः दोषे लेशे पराङ्मुखाः।
वैयावृत्यफलज्ञाः श्री-गुणाढ्याः प्रेमसूरयः।।



# विरलतमा महापुरुषाः

– प्रियङ्करप्रभविजयो मुनिः

परमतारकाणां परमात्मनां श्रीमहावीरदेवानां शासने अनेके महापुरुषा अभवन्। श्रीजिनशासने अनेके श्रुतधराः लब्धिधराश्चासन्। युगप्रधाना अस्मिन् जिनशासने महतीं शासनप्रभावनां कुर्वन्तः स्वजीवनं ऊर्ध्वीकृत्य विकासं साधयित्वा भव्यजीवान् सन्मार्गं दर्शयित्वा मोक्षमार्ग प्राप्तुं साधनामसाध्नुवन्। परिणामेनाद्यापि एतच्छासनं सुष्ठु प्रवर्त्तते। भविष्यत्काले चाष्टादश–सहस्त्रवर्षपर्यतं सुखेन प्रभुवीरस्य शासनं प्रवर्त्स्यति।

अद्य पूज्याचार्यश्रीप्रेमसूरीश्वराणां कथां कथयित्वा तेषां महापुरुषाणां गुणसंस्पर्शना मया क्रियते। यतो महापुरुषाणां गुणा अस्मभ्यं नूतनां दिशां यच्छन्ति। मया ते महापुरुषा नाऽदृश्यन्त न च समस्पृश्यन्त न चावन्द्यन्त। तथापि प्रयत्नं कृत्वा मया तेषां महापुरुषाणां गुणानां स्तुतिव्याखेन ते महापुरुषाः स्पृश्यन्ते वन्द्यन्ते च।

भारतवर्षेषु विविधाः धर्माः विद्यन्ते। तेन कारणेन अखिलविश्वमध्ये तेषां गणना आर्यदेशेषु भवति। आर्यदेशेषु अपि भारत–वर्षं प्रथमश्रेण्यां गण्यते। तत्र भारतवर्षेऽनेकानि राज्यानि सन्ति। अपि तु राजपूतानां भारतवर्षे सर्वश्रेष्ठं राज्यं गण्यते। कर्मवीर–शूरवीर–धर्मवीरसुजनानां च भूमि र्विद्यते। राजपूतानामृत्तिकासु एषा शक्ति वर्तते, यदत्रोत्पन्ना जना अपि महापुरुषाः भवन्ति।

भारतवर्षस्य पुरातनकाले राजपूतानामण्डलस्य योगदानमत्यंतं महत्त्वपूर्णमासीत्। जिनशासनस्य परम्परायां १४४४ ग्रन्थनां प्रणेतॄणां सूरिपूरंदरयाकिनीमहत्तरासूनुपूज्याचार्यश्रीहरिभद्रसूरीश्वराणां जन्म–प्रदानस्य सौभाग्यं राजस्थानप्रान्तेन प्राप्तम्। कलासौदर्यानां नगरस्य राणकपुरस्य जिनालयः राजस्थानप्रान्तस्य भव्यभूमौ सुप्रतिष्ठितं वर्तते। अखिलभारतवर्षे सम्राजमकबरं प्रति योद्धा महाराणाप्रताप अस्मिन् राजपुतानाप्रान्ते मेवाडमण्डलेऽभवत्।

एषु राजपुतानामण्डलेषु पिंडवाडानामके ग्रामे वर्तमाने षट्शत

---

१) पू.आ.श्री विजयहेमप्रभसूरिसमुदायः

गृहाणि सन्ति। प्रतिवर्ष पंचाचारपवित्राणां मुनीनां चातुर्मासस्य भाग्यं प्राप्य ग्रामजनानां धर्मभावना सुन्दरा भवति। विक्रमस्य चर्तुदश्यां शताब्दयां ''पिंडरवाटक'' नामकस्य ग्रामस्य स्थापना अभवत्। अस्मिन् नगरे पूज्याचार्यश्रीप्रेमसूरीश्वराः संवत् १९३१ वर्षे बालक, प्रेमचंद्ररुपेण जन्मागृह्णात्।

आचार्यपदं प्राप्य पूज्यपादाः श्रीमद्विजयप्रेमसूरीश्वराः प्रथम चातुर्मासं गूर्जरराज्ये पत्तननगरे आषाढशुक्लचतुर्दश्यां अकरोत्, अद्य चातुर्मासिकचतुदर्शश्यभवन्।

पूज्यपादा एकमभिग्रहमगृह्णात्। अस्मिन् चातुर्मासे आहारं पानीयं च द्वे द्रव्ये एकदैव गृह्णामि। मामुपवासस्य पारणके दुग्धस्य स्वतन्त्रता।

पूज्यपादेन सह ये महात्मानोऽभवन्। अपितु कोऽपि पूज्यस्य अभिग्रहं न जानाति। यदा पारणकस्य अवसर आगतः, तदा सर्वे महात्मानः पूज्यपादान् पुरो विनयेन अकथयन् ''पूज्य गुरुदेवा! भवन्तस्तु विशालगच्छं पालयथ, सर्वान् महात्मनः संयमसाधनायां लीनयथ, दूरं भवतः महत्तपोऽस्ति। अपि तु भवताऽयं कठोराभिग्रह केन कारणेन गृहीतः।

तदा पूज्यपादा मधुरायां गिरायां अकथयत् ''भो! वत्साः! यूयं सर्वे तु मम भक्तिं कृत्वा पुण्यं प्राप्नुथ किन्तु मयाऽपि ममात्मनः साधना कथं न कर्तव्याः।

इदमुत्तरं श्रुत्वा सर्वे शिष्याः पूज्यपादस्यास्यापूर्वेत्यागस्य हृदयेनानुमोदनां कुर्वन्ति।

धन्यास्ते पूज्यपादाः त्यागमूर्त्तयः श्री प्रेमसूरीश्वराः!

* अमृतानुवादः *

गुणगाथा कथा येषाम् गुणस्पर्शस्तथा स्तुतिः।
सत्त्व प्रियङ्कराः प्रेमाचार्या जैनाध्वभूषणाः।।



# श्रीप्रेमसूरीश्वरमहाराजपञ्चाशिका

– आगमरक्षितविजयो[1] मुनिः





गुरुकार्येऽग्रगामी यो गुरुभक्तौ विचक्षणः।
गुरुपादाम्बुजे भृङ्गः प्रेमसूरिं नमामि तम् ॥१॥

सिद्धिर्याति निजे कार्ये गुरुक्रमप्रसेवनात्।
मत्त्वेति गुरुसंसेवी, प्रेमसूरिं नमामि तम् ॥२॥

याति फलं स्वभाग्याऽगो गुरोः स्मरणमात्रतः।
सद्गुरुवृन्दमूर्धन्यः प्रेमसूरिं नमामि तम् ॥३॥

तीर्थस्य स्पर्शनाद् यान्ति, पावित्र्यं परमं जनाः।
तथैव यद्गुरोः स्पर्शात्, प्रेमसूरिं नमामि तम् ॥४॥

गुर्वादेशे न सन्देहं स्वल्पमात्रं करोति यः।
सूरिपदर्द्धिसम्प्राप्तं प्रेमसूरिं नमामि तम् ॥५॥

मोदन्ते पण्डिता वीक्ष्य यद्गुरोर्वदनोत्पलम्।
पण्डितौघमूर्धन्यं प्रेमसूरिं नमामि तम् ॥६॥

सद्भिर्यः सेव्यमानोऽपि स्वकार्यं कुरुते स्वयम्।
लघुतागुणसम्पन्नं प्रेमसूरिं नमामि तम् ॥७॥

लभन्ते भाग्यतो यस्य गुरोः सेवाक्षणं जनाः।
संसेव्यः सुमनोभिर्यः प्रेमसूरिं नमामि तम् ॥८॥

मनसा चिन्तितं कार्यं ब्रह्मचर्याद् द्रुतं फलेत्।
ब्रह्मतेजोमयं दिव्यं प्रेमसूरिं नमामि तं ॥९॥

१) पू.आ.श्री रामचन्द्रसूरि समुदायः

गुर्वाज्ञापालनात् तूर्णं प्राप्नोत्यात्मा परं पदम्।
गुर्वाज्ञादत्तचेतस्कं प्रेमसूरिं नमामि तम् ॥१०॥

यस्येन्द्रियाणि वश्यानि सेवन्ते नाकिनोऽपि तम्।
वशीकृतेन्द्रियग्रामं प्रेमसूरिं नमामि तम् ॥११॥

इन्द्रियाणि सुगुप्तानि जिह्वाप्यस्य नियन्त्रिता।
ज्ञानार्जनेऽपि निर्गर्वं प्रेमसूरिं नमामि तम् ॥१२॥

यं सात्विकाग्रणीं मत्वा सेवन्ते सर्वसाधवः।
सात्विकतालतामेघं प्रेमसूरिं नमामि तम् ॥१३॥

महिता मृदुता मह्यां कीर्तिर्यस्य दिवं गता।
त्यागो यस्य नभोव्याप्तः प्रेमसूरिं नमामि तम् ॥१४॥

यस्यान्तिकं समागत्य निश्चिन्ताः साधवो मुदा।
साधूपासकश्रद्धेयं प्रेमसूरिं नमामि तम् ॥१५॥

दानशीलगुणौघस्य क्षमारत्नमहाम्बुधेः।
गुणिनो यस्य दासोऽहं प्रेमसूरिं नमामि तम् ॥१६॥

सूरिपदं समारूढो गुरुणामाज्ञया सुधीः।
आचार्याणां गुणैः पूर्णं प्रेमसूरिं नमामि तम् ॥१७॥

यस्य गुणैर्वशीभूता देवताः सन्निधिं सदा।
भजन्ति सर्वकार्येषु प्रेमसूरिं नमामि तम् ॥१८॥

यो जिह्वया गुरुंस्तौति प्राप्नोति स गुरोर्गुणान्।
सम्यग् गुरुगुणाकीर्णं प्रेमसूरिं नमामि तम् ॥१९॥

यः पापाचरणं त्यक्त्वा धर्मं ध्यायति शुद्धिमान्।
मुक्त्यै ध्येयप्रदीपो यः प्रेमसूरिं नमामि तम् ॥२०॥

रक्षितं ब्रह्मचर्येण ब्रह्ममूर्तिस्तु यो गुरुः।
महाव्रतधनं यस्य प्रेमसूरिं नमामि तम् ॥२१॥



शास्त्राण्यधीत्य सद्गुरोर्योऽभूत् शास्त्रविशारदः।
शास्त्रविशारदैः सेव्यं प्रेमसूरिं नमामि तम् ॥२२॥

भाग्यहीनैर्नरै यस्य दर्शनं लभ्यते न हि
नाप्यो निष्पुण्यकै र्देवद्रुः प्रेमसूरिं नमामि तम् ॥२३॥

यस्य प्रभावतो देवा वशीभवन्ति हेलया
सिद्धिः शीलसंसिद्धः प्रेमसूरिं नमामि तम् ॥२४॥

यस्य चित्तं दयासिक्तं जगत्यां सर्वजन्तुषु
चित्ते यस्य गुणामोदः प्रेमसूरिं नमामि तम् आमोदः हर्षः ॥२५॥

देवत्वं प्राप्नुते लोको गुरुभक्तिप्रभावतः
गुरुभक्तेर्महापात्रं[१] प्रेमसूरिं नमामि तम् ॥२६॥

दुरितप्रेतभूताद्या नश्यन्ति यस्य नामतः
नाम यस्य महामन्त्रं प्रेमसूरिं नमामि तम् ॥२७॥

यः प्रातः सर्वतीर्थानि स्मारं स्मारं नमो युतम्
भावायात्रां व्यधान्नित्यं प्रेमसूरिं नमामि तम् ॥२८॥

स्वचित्तं सद्गुरोर्यस्य स्फटिकादतिनिर्मलम्
सुशीलं सुभगं सौम्यं प्रेमसूरिं नमामि तम् ॥२९॥

वैराग्यवासिते स्वान्ते त्यागभावो विवर्धते
वैराग्यसिन्धुपर्वेन्दुं प्रेमसूरिं नमामि तम् ॥३०॥

मोहाद्यैर्मोहितो जीवो न जानाति हिताहितम्।
हतमोहमहासैन्यं प्रेमसूरिं नमामि तम् ॥३१॥

तारणे भववार्धेर्यः सुगुरुस्तरणेः समः।
सुधास्वादु- गुणाम्भोधिं प्रेमसूरिं नमामि तं ॥३२॥

सर्वदोषपरित्याग-सर्वगुणसमन्वितम्।
सर्वसत्त्वस्य सन्मित्रं प्रेमसूरिं नमामि तम् ॥३३॥

---

१) गुर्वी चासौ भक्तिः इति गुरु भक्तिः तस्याः-
गुरुभक्तेः इत्यपि समासः विगृह्यः - अमृतः

गुणान् वर्णयितुं यस्य नालं कदापि मानवाः।
अनन्यगुणसंभारं प्रेमसूरिं नमामि तम् ॥३४॥

यस्य ज्ञानकथां श्रुत्वा विकथादोषवर्जिताम्।
भव्यचित्तं भवेन्मत्तं प्रेमसूरिं नमामि तं ॥३५॥

दूरीकृतदुराचारं साध्वाचारविशारदम्।
सदाचारमहादर्शं प्रेमसूरिं नमामि तम् ॥३६॥

यस्य पादपयोजातं सूरिजातैः समर्चितम्।
योऽर्चनात् पूर्णसर्वेष्टः, प्रेमसूरिं नमामि तम् ॥३७॥

मोक्षमार्गस्य प्रत्यर्थी प्रमादः सर्वदा सताम्।
प्रमादजलधेर्मन्था प्रेमसूरिं नमामि तं ॥३८॥

समितिगुप्तिसंयुक्तं विशुद्धविधिपालकम्।
भावव्रतैः शिवोन्मुखः प्रेमसूरिं नमामि तम् ॥३९॥

यस्यावग्रहमालम्ब्यासंयमी संयमी भवेत्।
शुद्धसंयममार्गज्ञं प्रेमसूरिं नमामि तम् ॥४०॥

शिष्टाचारसम्पन्नो यः शिष्टाचारप्रचारकः।
शिष्टविशिष्टनेतायः प्रेमसूरिं नमामि तम् ॥४१॥

रामचन्द्रमुनीशोऽपि यस्याङ्घ्रिभक्तिमिच्छति।
शिष्य-प्रशिष्यसंसेव्यं प्रेमसूरिं नमामि तम् ॥४२॥

अतीवदुष्करं कार्यं यस्याख्यया महीतले।
याति सिद्धिं क्षणेनैव प्रेमसूरिं नमामि तम् ॥४३॥

कृपया यस्य मूर्खोऽपि मनीषिशेखरो भवेत्।
शारदा वरदा यस्य प्रेमसूरिं नमामि तम् ॥४४॥

गुणान् वर्णयितुं यस्य न क्षमोऽस्ति बृहस्पतिः।
श्रमणैः सेव्यपादाब्जं प्रेमसूरिं नमामि तम् ॥४५॥

श्रुतप्रदानमग्नस्य यस्यानने सरस्वती।
खेलति स्म सदानन्दं प्रेमसूरिं नमामि तम् ॥४६॥



छेदग्रन्थस्य यो वेत्ता गीतार्थ उच्यते हि सः।
गीतार्थमुनिमूर्धन्यं प्रेमसूरिं नमामि तम् ॥४७॥

श्रीरामचन्द्रसूरीन्द्रः प्रवचनप्रभावकः।
शिष्येषु प्रथमो यस्य प्रेमसूरिं नमामि तम् ॥४८॥

स्वाद्यशिष्यस्य वक्त्रेण लब्धसमाधिशेवधिम्।
स्तम्भनाख्ये महातीर्थे प्रेमसूरिं नमामि तम् ॥४९॥

समाध्यर्धशताब्दौ हि प्रेमसूरीशसद्गुरोः।
आगमरक्षितः साधुः प्रेमसूरिं नमाम्यहं ॥५०॥

* अमृतानुवादः *
गुर्वायत्तं मनो यस्य, मनोजं योऽजयल्लघु।
संयतरक्षितात्मौधं तारं[१] प्रेम गुरुं नुवे॥

---

१) ता श्रीः, तस्यै आरः गति र्येन सः तारः,
तम्- मुक्तिलक्ष्म्यर्थं गतिप्रेरकम्,
''ता श्रियाम्' सुधाकलशप्रणीतैक्षरनाममाला
२३ पद्यानुसारेण।

# ज्ञानगर्भितवैराग्यवान्

– निसर्गप्रभविजयो मुनिः

सच्चारित्रचूडामणिरितितख्यातिप्राप्तानां श्रीविजयप्रेमसूरीश्वराणामविशङ्कं सम्भवत्येव ज्ञानगर्भं वैराग्यम्। तच्च महामहोपाध्यायप्रवरनिर्दिष्टात् तल्लक्षणात् महात्मन्येव गोचरीभवेत्। तल्लक्षणान्तर्गतेन सूक्ष्मेक्षिकाऽऽख्यगुणेन पूज्यप्रवराणां तद् वैराग्यं स्फुटमेव दृष्टिविषयतां प्राप्नोति। गुणनामाभ्यन्तरत्वेन तत्संसङ्लग्नबाह्यप्रसङ्गानां तेषामभिव्यञ्जनत्वादवलोक्यतामयं प्रसङ्गः, तथाहिः–

पूज्यप्रवरः क्वचित्प्रतिश्रये स्वाध्यायमग्नात्माऽऽसते स्म। प्राप्तं तैः स्वोद्देशेणागतमेकं पत्रं। उन्मील्य पठितम् तत्। तद्गतकार्यज्ञानपुरस्सरं दृष्टः प्रेषज्ञनामप्रदेशो 'जयलक्ष्म्यहं वन्दे' इत्याद्यक्षराङ्कितः। असम्भावनीयमिदमीक्षित्वा विचारयितुं प्रवृत्ता यथा ''नैव सङ्गतिमङ्गतीदम् पत्रव्यवहारेण पुरुषसम्बन्धोऽपि मम दुर्घटः, स्त्रीसम्बन्धस्य तु का कथा ?'' इति प्रशस्तचिन्तापि–शाचिकाग्रस्तीभूतं तेषां चित्तम्।

समयान्तरेण ज्ञातं तैः पत्रं स्वाज्ञावर्तिजयविजयलक्ष्मीविजयादिमुनिजनप्रेषितम्। सूक्ष्मेक्षि–काऽनुभावात् तैः सूचितौ तौ यथा ''नैवोचितमतत्कौतुहलपरत्वं प्रोज्झिताशेषसंसारकौतुक–योर्युवयोः। अनया रीत्या प्रेषितं तु सर्वथैवासमञ्जसम्, अमुक्तहस्तगतस्यैतादृशनामचिह्नित–पत्रस्य स्वस्मिन्नाचारशैथिल्याशङ्काऽऽपादकत्वात्। तस्मायुक्ताचारत्वेन भवितव्यं सर्वत्र।''

प्रतनुप्रमाणादप्येतत्प्रसङ्गात्प्रतीयते पूज्यप्रवराणां महानिर्जराफलं ज्ञानगर्भं वैराग्यम्। सूक्ष्मेक्षिका पुनरत्र पूज्यप्रवराणां स्वपरहितविषयतया वैराग्यलक्षणत्वेनोक्ता, सामन्यौचित्यगोचरा पुनः साऽपि पूज्यप्रवराणां हस्तगतैवेत्यनुक्ताऽपि विभावनीया सुधीभिः।

* अमृतानुवादः *

नैसर्गिकी प्रभा यस्य सद्वैराग्यप्रदीपके।
चित्ते ज्ञानघृतं पूर्णं, प्रेम ब्रह्मप्रभं स्तुवे।।

– पू.आ.श्री रामचन्द्रसूरिसमुदायः

श्री प्रेमसूरिं शिवदं नमामि...



# श्रीप्रेमसूरेः संयममन्दिरम्

– पुण्यश्रमणविजयो गणी

यो वज्रवद्दुर्भेदं कारागृहं भिनत्ति स एव इमं मन्दिरं प्रविशति।

दृश्यतेऽत्रसाक्षात्ब्रह्मचर्यनिर्मिता विविधगुणरत्न-निकरधारिका विलसत्कर्मग्रन्थपदार्थप्रकाशिता मूलना-यकस्थाने विराजमाना सुन्दराकारा जीवन्मूर्त्तिः।

सा प्रभूतप्रलीनकर्मक्लेशराशितया, निर्मलचिन्तनरततया, सर्वसत्वहि-तानुकूलवचनतया, सकलजीवराशिकल्याणकारितया परमार्थेन 'प्रेम' नामिका अस्ति।

सा संयमसूक्ष्मोपदेशदायितयाऽक्षेपेण चित्तप्रसन्नताप्रापणहितवचनप्रणेतृतया स्वभावेनैव वात्सल्योदधिहृदया। अद्यापि सा प्रसिद्धिं प्राप्ता वर्तते, तामनुयायिश्रमणश्रमणीकृतप्रवचनोक्त-सुविहितक्रियाकलापैः।

विराजन्तेऽत्र प्रेममन्दिरे विविधप्रज्ञासंपन्नाः, प्रवचनप्रभावकाः, स्वपरशास्त्रविशारदाः, स्वप-रककल्याणैकरता मुनिवरसङ्घाः। विश्वसुजनहृदयाक्षेपकतपरशालिन्य आर्यासङ्घाः। मोक्षैक-लक्षीधर्मकरणतत्पराः श्रावकसङ्घाः। शीलसौरभधारिकाः श्राविकासङ्घाः।

एकदा मया मन्दिरसमीपभूभागं दृष्टं, तत्र केऽपि जना रुदन्ति स्म। यूयं किमर्थं रुदन्ति? मया पृष्टम्। ऊचुस्ते–यत अस्माकं शत्रोः प्रेमसूरेः पञ्चाशदन्यान्परमपि विश्वजनाः पूजां प्रशंसां च कुर्वन्ति तेन वयं रुदिमः।

सभयं पुनः पृष्टं मया के यूयं स्थ? किमर्थमत्रागताः? एकोऽवदत् महामोहराजस्य किंकरा वयम्, राजधान्यां रत्नप्रभायां संख्यापूर्त्यर्थमत्रागताः। परमनेनारिणा प्रेमसूरिणा विश्वस्य

– पू.आ.श्री रामचन्द्रसूरि समुदायवर्तिः

पायितमौषधं किमपि तेन नास्माकमिच्छा सफलीभवति।

निर्गतोऽहं झटिति ततः। अन्यदा प्रयोजनवशाद् गतोऽहं मोहमन्दिरसमीपदेशं, तदा ते सर्वे प्रसन्ना आसन्। रहसि मिलितानां तेषां वार्तालापं मया श्रुतं, यदुत ये प्रेमसूरे र्नाम्नः जापं कुर्वन्ति, तन्मन्दिरं च वसन्ति, तेषां मध्येऽपि केचन जना अस्माकमादेशं पालयन्ति। ततः कुर्वन्ति कलहं, दधति निष्कारणमुपकरणं, विदधति संक्लिष्टचित्तं, न ध्यायन्ति परिग्रहव्रतं, लङ्घयन्ति प्रेमसूरे-रेवादेशं, नियोजयन्ति सावद्येष्वात्मानं, न निर्वहन्ति श्रुतस्वाध्यायं, न निवारयन्ति कापथप्रस्थितं श्रावकजनं, न चावतारयन्ति सन्मार्गे, किं बहुनोक्तेन? ते हि सर्वज्ञशासनं विमुच्य भौतिकसुखमेव पश्यन्ति, नान्यत्किञ्चित् श्रद्दधते, न रोचयन्ति, नानुपालयन्ति, किन्तर्हि? ''तदेव सकलकल्याणकारकं मन्यन्ते'' इति ततः शीघ्रतिशीघ्रं वयं सफलीभविष्यामः।

महामोहराजस्य किङ्कराणां गुप्तचर्चां श्रुत्वा भीतोस्म्यहं, वर्तितव्यं स्याद् बलादप्य ज्ञानादपि। कदाचिदपि मोहोदये कार्ये, वयं सर्वे सावधाना भवामः। अन्यथा राजधानीरत्नप्रभाया आतिथ्यं स्वीकरणे सज्जा भवामः।

* अमृतानुवादः *

श्री प्रेममन्दिरं विश्वमोहराजरणाङ्गणम्।
तच्छ्रितेभ्यो बुधैः प्रोक्तम् ते पुण्यश्रीफलं गताः।।

स एष प्रेमगुरु र्मे
हृदयसिंहासने
नित्यं तिष्ठतु।





# चारित्रमहोदधि–श्रीप्रेमसूरीश्वराः

– आत्मदर्शनविजयो मुनिः

अत्र श्रीजिनशासने तृतीयपदस्थिताः पूज्यभावाचार्यभगवन्तः, षट्त्रिंशत्प्रकारैः षट्त्रिंशद्-गुणयुक्ता भवन्ति। तेषां संपूर्णगुणवर्णनं विशेषज्ञानिनो विना न कैरपि कर्तुं पार्यते। तथापि बालो भूत्वा हस्तप्रसारिकया इव तेषां महोदधिरिव चारित्रगुणस्य विशालता स्वल्पमतिना मया निर्दिश्यते।

ते पुण्यपुरुषाः स्तंभननगरे वैक्रमीय २०२४ तमे वर्षे वैशाखमासस्य कृष्ण ११ तिथौ, स्वपट्टविभूषक–दीक्षायुगप्रवर्तक–व्याख्यानवाचस्पति–पूज्यपादाचार्यदेव–श्रीमद्विजयरामचन्द्र–सूरीश्वराणां श्रीमुखेन श्रीनमस्कारमन्त्रमाकर्णयन्तः समाधिमृत्युं प्राप्नुवन्ति स्म।

तेषां विरहस्य पञ्चाशत् वर्षाणि जातानि, तथापि भक्तजनहृदयानि तत्क्षणमद्यापि स्मृतिपथमानीय तान्न विस्मरन्ति। चारित्रमहोदधिरूपे श्रीप्रेमसूरीश्वरे विशिष्टाचार–नियमरत्नानि निर्मलचारित्रवत् शिष्य–गणरूपनदीनां प्रवेशा दृढसमिति–गुप्ति–ब्रह्मचर्यपालनशुद्धिमर्यादाश्च प्राप्यन्ते।

### १) विशिष्टाचारनियमरत्नानिः-

रात्रौ ते केवलमेकप्रहरमेव निद्रामतनोत्। शेषरात्रिं स्वचारित्रमहारत्नं शुद्धभावनाभि र्विशोधयन्ति स्म। तैरद्यपर्यन्तं यानि तीर्थानि चक्षुना निरूपितानि, तानि भावेन स्मृत्वा यात्रां कुर्वन्ति। तदनन्तरं च कर्मग्रन्थप्रमुखप्रकरणग्ररत्नान् सार्थान् परावर्तयन्ति।

प्रतिक्रमण–प्रतिलेखन–कृतिकर्मप्रमुखावश्यकक्रियासु रजोहरणस्योपयोगं तथाकरोत्, यथा निद्राकालेऽपि पादाकुञ्चनादौ तदुपयोगः स्वाभाविको जातः।

ते नित्यमेकासनं प्रत्याख्यानमेवा करोत्। तदपि द्विद्रव्याभ्यामेवार्धघटिकासमयमात्रेण, फलविकृतिकृत्–पुष्टद्रव्य–मिष्टान्नरहितएव तेषामाहार आसीत्। तथाविधाहारस्य कारणे च पृष्टे आचार्यवर्यो वक्ति, ''मम शरीरं जीर्णमस्ति।।''

एकासनानन्तरं मध्याह्नकाले बहिर्भूमौ तरुणतरणिकिरणगणताप्तेमार्गेऽपि गच्छन् चारित्रमहारत्नप्राप्तिसुखमग्नो न कदापि सन्तपते।

### २) निर्मल चारित्रवच्छिष्यगणनदीप्रवाहधारणम्:-

स्वशिष्य–प्रशिष्यानां रसलोलुपतानिवारणाय गोचरीमण्डल्यां कर्मसाहित्यगतगूढप्रश्नानि कृत्वा तच्चिन्तने व्यापारयन्ति।

समुदायगतानेकबालमुनिवराणां स्थिरीकरणार्थं नव–नवयुक्तिभिः शतसङ्ख्यानि श्लोकान्यपि कण्ठगतानि कारयन्ति।

वैक्रमीय २०१५ तमे वर्षे पूज्यपादानां निश्रायां श्रीसिद्धगिरिराजस्य 'छ'री पालित सङ्घ आसीत्। क्रमेण च सङ्घः सुरेन्द्रनगरे समागच्छत्। तस्मिन् दिने सकलश्रीसङ्घस्य

– पू.आ.श्री रामचन्द्रसूरि समुदायवर्तिः

साधर्मिकवात्सल्यमासीत्।

परमश्रावक-श्रीयुत्कान्तिलालचुनिलालेन श्रीप्रेमसूरीश्वरा विज्ञप्ता, ''भगवन्तः! महात्मानः प्रतिलाभार्थं प्रेषयत।'' अपि तु श्रीप्रेमसूरिभिर्महात्मानो जैनेतरगृहेभ्य एव गोचरीमानयनार्थं सूचना दत्तासीत् महात्मभिरपि तथैव कृतम्।

यदा च द्विर्वेलां यावद् गृहेषु पर्यट्यापि पर्याप्तगोचरी न प्राप्ता, तदा मुनिप्रवरः श्रीजयध्वजविजयः श्री सङ्घमहानसात् शेषं पूर्णीकृतम्। तदज्ञापने च सूरिभिः स महात्मोपालम्भितः। मुनिनापि सर्वं शान्तचित्तेनाङ्गीकृतम्।

विचित्रकर्मपरिणतिवशाद् यदि महात्मनां परस्परं कदाचित् कषायः प्रादुर्भवति, तदा तदुपशमनार्थं तेषामेकं वाक्यं भवति'' कालियः कस्माद् गवाक्षादागतः?'' तत् श्रवणात् शिष्याः तत्क्षणमेव द्वेषक्लेशमुक्ता भवन्ति।

## ३) दृढसमिति-गुप्ति-ब्रह्मचर्यपालन-शुद्धिमर्यादाः-

निःस्पृहशिरोमणयस्ते पूज्याः परिमितमेवोपधिं धारयन्ति स्म। एकदा स्वगुरुदेवाःश्रीदानसूरीश्वराः पूज्यान् सूचितवन्तः,'' त्वं कथमेकमेव चोलपट्टकं धारयसि? यदि तज्जीर्णं भविष्यति तर्हि किं करिष्यसि?''

मुनिश्रीप्रेमविजयेनोक्तं ''संयमप्रभावेन नवीनमागमिष्यति। न कापि चिन्ता।''

एकदा चैवमेवाभवत्, यदुत तेषां चोलपट्टकं जीर्णं दीर्णं जातम्। तद्दिवसे चैव कोऽपि श्रावक आगत्य चोलपट्टकं प्रत्यलाभयत्।

एकस्मिन्नवसरे विहारमार्गे पतितां निजमुखवस्त्रिकामप्यानयनार्थं तेऽर्द्धयोजनं पश्चाद् गत्वा स्वसंयमोपकरणरक्षामकरोत्।

विजातीयसंसर्गमपि ते गुरुवरा दूरत एव निवारयन्ति स्म। तेषामाज्ञया न कोऽपि महात्मा साध्वीभिः सह वार्तामपि कुरुते। ते पूज्यास्तु स्वदृष्टिपातमपि साध्वीषूपरि न कुर्वन्ति। तेनैव ते सच्चारित्रचूडामणयः कथ्यन्ते।

अल्पेऽहि चारित्रमहारत्नस्य मालिन्ये प्राप्ते तत्शुद्ध्यर्थं ते सर्वदाप्रमत्ता एवासन्। श्रूयते च, गोचरीमण्डल्यां यदि तैः किमपि अशुद्धमुखेनोक्तं, तर्हि तत्कालमेव पञ्चविंशतिःक्षमाश्रमणानि (खमासमणानि) विधिपूर्वकं ददति स्म।

एतैस्त्रिभिर्लक्षणैः श्रीप्रेमसूरीश्वराः परमार्थेन रत्नाकरः सरित्पतिः समुद्र इति सञ्ज्ञानि प्राप्नुवन्ति। तथा च ते वास्तविकाः चारित्रमहोदधयः सन्ति।

समाधिमरणस्य सुवर्णवर्षे तेषां चारित्रगुणवर्णनेन वयं साधवोऽपि चारित्रमहोदधयो भवेयुरिति आशास्महे।



* अमृतानुवादः *

पवित्रं चारित्रगोत्रं योऽरक्षन्नववृत्तिभिः।
चित्रं प्रेम गुरोरेवं तास्वात्मनस्तु दर्शनम्।।



# पञ्चमो विभागः

संयमदीपकज्योतिषा-

मिथ्यात्वतिमिरहराणां

पूज्यपादाचार्यप्रवरप्रेमसूरीश्वराणां

चरणवरारविन्देऽहं

चञ्चरीकतां सदैव सेवे.....

निर्गतरागस्नेहद्वेषधूमवपूरागवर्त्ति प्रवरपरमात्मभक्तिप्रकाश-
विहतमिथ्यात्वान्धकाराणां, प्रव्रज्याप्रद्योतकराणां

## पूज्यपादाचार्याणां प्रेमसूरीश्वराणां प्रेमपारायणाभिधे श्रीनिःश्रेयसे प्रकृष्टप्रदीपाख्यपञ्चमो विभागः

- प्रेमप्रदीपो विना तैलं प्रदीपयति।
- प्रेमप्रदीपो वर्तिविरहितो वर्तते।
- प्रेमप्रदीपो विना धूमं प्रज्वलति।
- प्रेमप्रदीपः सर्वत्र प्रकाशते।
- प्रेमप्रदीपः सर्वत्र मिथ्यातिमिरं हरति।
- प्रेमप्रदीपः स्वं परं च प्रद्योतयति।



# षट्कारकैः प्रेमसूरिस्तवना

– *साध्वीश्रीविरागदर्शनाश्रीः

कस्यापि वस्तुनो व्यक्तेर्वा नियतप्रकारस्य प्रक्रिया नाम व्याकरणग्रन्थनिर्दिष्टं कारकप्रकरणं, तेन कारकः वस्तुनो व्यक्तेर्वा क्रियया सह योगः, अर्थात् स ज्ञायते। यथा कोऽपि जनः (कर्ता), कमपि...(कर्म), केनापि...(करणं), कस्मैचिदपि...(सम्प्रदानं), कस्मादपि....(अपादानं), कस्मिन्नपि... (अधिकरणं) अकृत। अत्र 'अकृत' क्रियया सह युक्तः प्रत्येकव्यक्तिः कारक उच्यते। किन्त्वत्र कारकरूपे स्थितः प्रत्येकव्यकि र्भिन्नोस्ति। व्यवहारेऽपि कस्मिन्नेव- व्यक्तौ एकस्मिन्नेव समये षट्कारका न मिलन्ति। तदपि परमात्मतत्त्वस्य वैशिष्ट्यमस्ति, अतिशयोऽस्ति, यतः सर्वेऽपि कारकाः परमात्मनि घटामञ्चति।

तथैव परमतारकाणां पूज्यप्रेमसूरीश्वराणामप्यनुपमातिशयोऽस्ति, यतः सर्वेऽपि कारकास्तेष्वपि सम्भवन्ति।

## १) कर्तारूपः परमतारकः प्रेमसूरीश्वरः।

ज्ञानगर्वस्य परिहारः...निर्दम्भरीत्या च क्षतेः स्वीकारः...

परमतारकः प्रेमसूरीश्वरः प्रतिष्ठादिप्रसङ्गेषु स्वयममलिप्त एव तिष्ठन्नासीत्।

परमतारकः पूज्यश्रीः कर्मसाहित्यग्रन्थानां सूक्ष्मतमबोधं प्राप्तवान्। तथा पञ्चलक्षश्लोकप्रमाण-नव्यकर्मसाहित्यग्रन्थानां सर्जनं शिष्यैः कारितवान्। स्वयमपि परमतारको ग्रन्थमूर्धन्यं सङ्क्रमण-करणग्रन्थं व्यवरचयत। पूर्वमप्राप्यो ग्रन्थः प्रकटितवान्। तस्मिन्नपि ग्रन्थेऽनुपयोगेन क्षतिर्भूता, तर्हि यदा क्षतिर्ज्ञाता तदैव 'मिथ्यादुष्कृतं' सर्वसमक्षं याचितवान्, अत एव परमतारक प्रेमसूरीश्वरः 'कर्मसाहित्य-निष्णातो' विशेषणाङ्कितो बभूव।

ईदृगासीत् परमतारकस्य प्रेमसूरीश्वरस्य कर्तृकारकरूपे व्यक्तो निर्दम्भतावैभवः।



## २) कर्मकारकरूपः परमतारकः प्रेमसूरीश्वरः।

परमतारकं प्रेमसूरिं बुधाः संश्रिताः सर्वगुणाधारत्वात्।

परमतारकः सर्वगुणसमन्वयरूप आसीत्। ततः सर्वे गुणाः परमतारकमाश्रिता आसन्

---

– पू.आ.श्री रामचन्द्रसूरिसमुदायः



यथा सुवर्णाय सूक्तिरस्ति, – ''सर्वे गुणाः काञ्चनमाश्रयन्ते।'' तथा सुवर्णस्येयं सूक्तिः परमतारकमपि सङ्घटते। ''सर्वे गुणाः प्रेमसूरिमाश्रयन्ते।'' परमतारकगुणाः स्वयमेव परमतारकं प्रत्यागच्छन्ति, अत एव परमतारकं प्रेमसूरीश्वरं निःसङ्गता-गुणोऽवृणोत्।

ईदृगासीत् परमतारकाः प्रेमसूरीश्वराः, कर्मरुपेणाभिव्यक्तो **निःसङ्गता वैभवः।**

## ३) करणकारकरूपः परमातरकः प्रेमसूरीश्वरः।

परमतारकेण प्रेमसूरीश्वरेण विशालः समुदायो विशाल-वटवृक्ष इव व्यरचि। परमतारकेण योग्या जीवाः प्रतिबोध्य अन्यान्यमहात्मनां शिष्या अकारि, किन्तु विशालसमुदायस्य स्वामिनस्तस्य परमतारकस्य साक्षात् शिष्या सप्तदशैवासन्, परमतारकेण बहुवाग्रहेणाप्याचार्यापदवीं ग्रहीतुं सम्मति र्न दर्शिता । गुरुदेवेन छद्मनाकार्यचार्यपदं ग्रहीतुमाज्ञां चक्रे, ततः परमतारकेणोदश्रुणाज्ञापार-तन्त्र्येणाचार्यपदवी गृहीता। एवमनेकरीत्या परमतारकेण प्रेमसूरीश्वरेण निस्पृहता प्राप्तासीत्।

ईदृगासीत् परमातरकेण प्रेमसूरिवरेण करणकारकरूपेण व्यक्तो **निस्पृहता वैभवः।**

## ४) सम्प्रदानकारकरूपः परमातारकः प्रेमसूरीश्वरः।

परमतारकाय प्रेमसूरीश्वराय समर्पिताः साधवः स्वस्य सर्वस्वं गौणमकुर्वन्। विहारमार्गेऽपि साधवः परमतारकं स्वस्कन्धमारोह्य विहृताः। तदपि परमतारको न प्राप्तोत्सेकम्। परमतारकाय यदा गुणानुवादसभा योजिता तदापि परमतारको निरीहतया स्तम्भितवान्। जीवने अनासक्त-भावमात्मसाच् चकार। जीवनसन्ध्यायां समाधिं प्राप्तुं शान्तसुधारसग्रन्थस्य 'अन्यत्वभावनाया', ज्ञानसारग्रन्थस्य विवेकाष्टकस्य पुनः पुनः चिन्तनं कृत्वा निरीहता दृढीकृता।

अत एव परमतारकाय प्रेमसूरीश्वराय संप्रदानकारकरूपेण **निरीहतातीवारोचतेति** ज्ञायते।

## ५) अपादानकारकरूपः परमतारकः प्रेमसूरीश्वरः।

परमतारकात् प्रेमसूरीश्वरात् प्रकटीभूतो गुणवैभवः समस्तगुणाधारशिलासमोऽस्ति। तथापि तेषु गुणेषु निर्मलतागुणोऽपूर्व आसीत्। पूर्वमुनिभिः उक्तं यद् – परमतारकस्य वस्त्रेभ्योऽपि सुगन्धः प्रासरत्, तद् निर्मलब्रह्मचयं विना न शक्यम्। तेषां नेत्रयोः निर्मलताया निर्विकारिताया अद्भुतः प्रभावः प्रादुर्भूतः। यद् मन्दचारित्रमोहनीयकर्माऽपि जीवः तेषां नयनदर्शने संसारादुद्विग्नोभवति। एवं तेषां निरुपमब्रह्मचर्यप्रभावेण यावज्जीवं परमतारकात् प्रेमसूरीश्वरात् निर्मलता कदापि निर्गता नासीत्।



ईदृगासीत् परमतारकात् प्रेमसूरीश्वरात् अपदानकारक-रूपेण व्यक्तो **निर्मलतावैभवः।**

## ६) अधिकरणकारकरूपः परमतारकः प्रेमसूरीश्वरः।

परमतारके प्रेमसूरीश्वरे आहारनीरसता सहजासीत्। पञ्चाचारपालनं प्रियङ्करमासीत्, न तु आहारपदार्थाः। पञ्चाचाराणां रुचिः पदार्थानामरुचिः तेषां जीव-नमन्त्रोऽभूत्। विचारप्रचारौ तेषामाचारेण द्योतितवन्तौ।

परमतारको नित्यं मात्र द्वाभ्यां द्रव्याभ्यामेकाशनं तपः कृतवानासीत्। तेषां भोजनक्रियासमयो मात्र सप्तमिनिटपर्यन्तमासीत्। एकदा परमतारकेण बालमुनिरुक्तो यदि त्वया शतप्रमाणाः श्लोकाः कण्ठस्थाः क्रियते, तदा मह्यं त्वं यद् भोजनाय यच्छसि तदहं गृह्णामि। बालमुनिनापि तल्लाभलोभेन श्लोकाः कण्ठस्थाः कृताः। परमतारकोऽपि बालमुनेरपूर्वस्वाध्यायं पश्यन्नस्वीकारं कर्तुं न क्षमः, तदा परमतारकः पराभूतः। बालमुनिना मधुरगोलिका परमतारकस्य पात्रे मुक्ता। किन्तु परमतारकेण सा गोलिका जिह्वया नास्वाद्यमानेनौषधवदगिल्यत।

'परमतारकस्य जीवने श्रमणजीवनबाधकदोषाः प्रवेशं न लभेरन्, ततस्तान् दूरीकर्तुं सदा जागरुकोऽभूत्। अत एव परमतारके प्रेमसूरिवरे रसनानीरसता जाज्वल्यमाना दृश्यासीत्।

ईदृगासीत् परमतारक प्रेमसूरीश्वरस्य अधिकरणकारकरूपे व्यक्तो **निरसतावैभवः।**

अन्ते.....

कर्ताकारकरूपेण व्यक्तो निर्दम्भतावैभवः।
कर्मकारकरूपेण व्यक्तो निःसङगतावैभवः।
करणकारकरूपेण व्यक्तो निःस्पृहतावैभवः।
संप्रदानकारकरूपेण व्यक्तो निरीहतावैभवः।
अपादानकारकरूपेण व्यक्तो निर्मलतावैभवः।
अधिकरणकारकरूपेण व्यक्तो नीरसतावैभवः।

- मम जीवनेऽप्यागच्छन्तु प्रेमगुरुगता गुणा इत्येकैवाभ्यर्थना.....

* अमृतानुवादः *

संस्तुतः कारकैः षड्भिरष्टकर्मविदारणे।
प्रेमसूरिरहो चित्-रस्-तपोगच्छनभोर्यमाः।।

१) चित्त ज्ञानं, तेन राजते यः इति 'चित्त्-रः' विग्रहः-कार्यः - अमृतः।

# प्रेमपीयुषोद्गारः

– साध्वीश्रीविरागदर्शनाश्रीः

१) आत्मगुणविकासाय स्वात्मा सदैव पृच्छ्यते।
कोऽहं कुत्रास्म्यहं स्थाने कीदृग् गुरुक्रमे स्थितः।।१।।

२) दुर्जया रसना सर्वेन्द्रियेषु देहदुःखदा।
जरायामप्यसाध्या हि कुपथ्यकारिका स्मृता।।२।।

३) परात्मनो यथा पीडा स्वाल्पापि नानुभूयते।
किं भवेद् देहजा पीडा स्वात्मान्यत्वात् तनोरपि।।३।।

४) भ्रामिता वयमाकालात् कषायविषयैस्ततः।
प्राप्तुं वरमृतिं स्वस्थे देहे कुर्यां सुसंयमम्।।४।।

५) दौषमुक्तान् श्रितान् कर्तुं दोषमुक्तो भवेत् स्वयम्।
वात्सल्यं सर्वदा देयं न तु दोषप्रकाशनम्।। ५।।

६) विश्वस्यान्माऽस्थिरं देहं, पोषे–तोषेऽपि वञ्चकम्।
तत् सहस्रांशिका भक्तिः प्रभो र्दत्ते परं पदम्।। ६।।

७) कृत्वा चित्तसमाधानं कषायविषयोदये।
निमित्तं निष्फलं कुर्यात् क्लिष्टकर्मान्यथा भवेत्।।७।।

८) उत्सर्गस्य सुरक्षार्थमपवादस्य सेवनम्।
दोषनिःशूकतायां ह्युत्सर्गः कथं भवेत् खलु।।८।।



अहो !
प्रेमसूरीश्वरस्य
चरणं, अनुपमं,
अतुलं,
अमापमासीत्।

※ अमृतानुवादः ※
आत्मगुणोन्नते र्जीयाज्जिह्वादीन्द्रियसञ्चयम्
जितेऽक्षे हि जितं कर्मे त्युद्गारात् प्रेम गौरवम्।।



– पू.आ.श्री रामचन्द्रसूरिसमुदायः



# सङ्क्रमकरणग्रन्थांशः

– साध्वीश्रीविरागदर्शनाश्रीः

सिद्धान्तमहोदधिभिः कर्मसाहित्यनिपुणमतिभिः सच्चारित्रचूडामणिभिः पारमेश्वर-प्रवचनपीयूषपानपीनैः श्रीमत्प्रेमसूरीश्वरैः संस्कृत-प्राकृत-व्याकरण-न्याय-षड्दर्श-न-प्रकरण-कर्मग्रन्थ-कर्मप्रकृति-गणितादिविषयानामागम-सूत्राणां च विशेषेण छेद-सूत्राणां तलस्पर्श्यद्भुतं ज्ञानं प्राप्तम्।

कर्मसाहित्ये तु पूज्या निष्णाताः सञ्जाताः। प्रायशः कर्मसाहित्यविषयका-नामुपलब्धसर्वग्रन्थानां तैः परिशीलनं कृतम्। कर्मसिद्धिमार्गणाद्वारविवरणं सङ्क्रम-करणद्विभागौ च पूज्यैरेव निर्मिताः।

कर्मप्रकृति ग्रन्थो जैनवाङ्मयेऽतिकठीनः सूक्ष्ममतिग्राह्यश्चासीत्। अन्तिमक-तिपयवर्षे गुरुगमाभावेनास्य ग्रन्थस्याध्ययनं विरराम। पूज्यैः प्रचण्डपुरुषार्थं कृत्वा कर्म-प्रकृतेः पदार्थार्थाः प्रकटीकृताः। अस्मिन् कर्मप्रकृतिग्रन्थे बन्धनकरणम्, सङ्क्रम-करणम्, उद्वर्तनाकरणम्, अपवर्तनाकरणम्, उपशमनाकरणम्, निधत्तिकरणम्, निकाचनाकरणम्, उदयः, सत्ता चेति दशप्रकरणानि दर्शितानि।

तत्र करणशब्देन जीवस्य वीर्यविशेष उच्यते।

- येन वीर्यविशेषेणाष्टप्रकारकं कर्म जीवेन बध्यते तत् **बन्धनकरणं** प्रथमम्।
- येन वीर्यविशेषयोगेनान्यप्रकृत्यादिचतुष्कमन्यप्रकृत्यादिचतुष्करूपतया परिणमति, तत् **संक्रमकरणम्।**
- यद्वीर्यविशेषपरिणत्या कर्मणां स्थितिरेसौ वर्धेते **तदुद्वर्तनाकरणम्।**
- येन वीर्यविशेषपरिणतितः कर्मस्थितिरसावल्पीक्रियेते **तदपवर्तनाकरणम्।**
- यद्वीर्यविशेषबलेनोदयकालमप्राप्तकर्मदलिका उदयावलिकायां निक्षिप्य भुज्यन्ते **तदुदीरणाकरणम्।**

---

– पू.आ.श्री रामचन्द्रसूरिसमुदायः

• यद्वीर्यविशेषपरिणत्या कर्माण्युउदयोदीरणानिधत्तिनिकाचनाकरणायोग्यानि विधीयन्ते **तदुपशमनाकरणम्।**

• येन वीर्यविशेषयोगेनोद्वर्तनापवर्तनाकरणे विरहय्य जीवेन कर्माण्यन्यषट्करणायोग्यानि विधीयन्ते **तन्निधत्तिकरणम्।**

• येन वीर्यविशेषपरिणतिबलेन जीवेन कर्मावश्यभोग्यं विधीयते **तन्निकाचनाकरणं** कथ्यते।

• स्वस्वबन्धयोग्यस्थितिसंयुक्तबद्धकर्मपुद्गलानामबाधाकालक्षयात् वाऽपवर्तनादि-करणविशेषात् वोदयसमयप्राप्ते सति जीवस्य योऽनुभवः स उदयः।

• जीवसम्बद्धाः कर्मवर्गणा यावज्जीवात् पृथग् न भवति तावन्ज्जीवे तस्याः सत्ता प्रोच्यते।

कर्मप्रकृतिकरणान्तरवर्तिद्वितीयसङ्क्रमकरणाख्यो ग्रन्थः प्रवचनप्रवीणैः पूज्यपादै र्विस्तारेण गीर्वाणभाषायां ग्रथितः। अयं ग्रन्थश्च विभागद्वये विभक्तो वर्तते। अस्मिन् ग्रन्थे प्रकृति-स्थिति-रस-प्रदेशसङ्क्रमणानि निरूपितानि सन्ति। तत्रापि आद्यभागे प्रकृतिसङ्क्रम एव विचारितस्तदपि च परिपूर्णं विचारयितुमशक्यो बभूव, अतः किञ्चि-न्न्यून एव निरूपितः। प्रत्येकमपि सङ्क्रमं सामान्य-विशेषलक्षणविध्यपवाद-नियम-विकल्प-साद्यादिप्ररूपणा-स्वामित्व-प्ररूपणात्मकषड्भिर्द्वारै र्विचारितमस्ति। मत-मन्तव्यान्तरप्रयुक्ता अस्यावान्तरै-तावदुपयुक्तविषयाश्चर्चिता येन न केवलमेते प्रणेतृ-पादानां तात्त्विकविषयिकापूर्वविद्वत्तापरिचायकाः, किन्तु वाचकवृन्दायानेकप्रकरण-पठनपरिश्रमादृते सौष्ठव-सारल्याभ्यां चारुतरं बोधं समर्पयितुमपि समीशाः।

• प्रकृतिसङ्क्रमेऽष्टकर्म पतद्ग्रहस्थानानि, सङ्क्रमस्थानानि, तेषां संवेधहेतवः पूज्यैः शोभनरीत्या निरूपिताः।

• स्वामित्वप्ररुपणाधिकारे गुणस्थानकाधिकारो वर्णितः, तत्र चतुर्दशगुणस्थान-कानां विस्तृतं स्वरूपं प्रकाशितम्। तत्रादौ गुणस्थानकस्य वर्णने मिथ्यात्वस्य पञ्चभेदसहितं स्वरुपं कथयित्वा पूज्यश्रीर्ज्ञापयति यद् भव्यजीवानां पञ्च-मिथ्यात्वसम्भवोऽस्ति, किन्त्वभव्यजीवानामाभिग्राहिकोऽनाभोगिकश्च मिथ्यात्वं सम्भवति। शब्दानां व्युत्पतिकुर्वद्भिः पूज्यै र्व्याकरणसूत्राणाण्युल्लिखितानि तत् तेषां व्याकरणनिपुणतां



सूचयति। तुर्यगुणस्थानके सम्यक्त्वस्य सप्तषष्ठिभेदानां वर्णनं कृतम्। द्वादशगुणस्थानकस्य वर्णनं कृत्वा उपशमश्रेणिक्षपकश्रेणिद्वयस्वरूपं विस्तारेण कृतम्। तत्राप्यनन्तानुबन्ध्युपशमना, अनन्तानुबन्धि विसंयोजना, दर्शनत्रिकोपशमना, चारित्रमोहनीयोपशमना, प्रतिपातस्तथा क्षपकश्रेण्यन्तर्गतदर्शनत्रिकक्षपणा, स्थितिघाताद्यपूर्वकरणाधिकारः, लोभकिट्टीकरणाधिकारः, सर्वेषामाश्चर्यकारीणि दृष्टमात्रेण गीर्वाणभाषाल्पपरिचयवतामपि स्पष्टावबोधकानि कलामयाकर्षकयन्त्राणि, गुणस्थानकेषु जीवस्थानकेषु च तथैव सङ्क्रमसंवेधादयोऽनेकतलस्पर्शिविषया अतीवस्पष्टतया विवरिता वर्तन्ते।

पूज्यैः सोपयोगित्वेनाप्रस्तुतमपि साक्षेपपरिहारपूर्वकं जिननामविषये निरूपितम् तथाहिननु तिर्यक्षु जिननाम्नः सत्ताभावो शास्त्रे निर्दिष्टः, जिननाम्न उत्कृष्टः स्थितिबन्धोऽन्तः सागरोपमकोटा-कोटीप्रमाणः, एतावत्कालं तिर्यग्भवभ्रमणमन्तरेण पूरयितुमशक्यत्वात् तथा जिननामसत्ताकस्यैव तिर्यक्षु गमननिषेध इति चेत्-सुनिकाचितजिननामसत्ताकस्यैव तिर्यक्षु गमननिषेधात्, या चान्तःकोटिकोटिप्रमाणा स्थितिरुक्ता सा निकाचिदपेक्षया ज्ञातव्या।

ननु सुनिकाचितं कस्माद् भागादारभ्य? कः? कदा? कियत् प्रमाणं करोति? सुनिकाचिते चोच्यमानेऽन्यदपि किमल्पनिकाचितमनिकाचितं वा विद्यते? अत्रोच्यते जिननाम्नोऽअन्तःसागरोपमकोटाकोटीप्रमाणायाः स्थितेः सङ्ख्येयभागादारभ्य सङ्ख्येयवर्षायुष्केण नरेण निकाचयितुमारभ्यते, तस्यैव सकलसामग्रीसद्भावात्। तीर्थङ्करभवादर्वाक् तृतीये भवे च निकाचितं करोति। तत्राप्यन्तःसागरोपमकोटाकोटयाः सङ्ख्येयतमो भागोऽल्पनिकाचितं भवति, किञ्चिन्न्यूनपूर्वकोटिद्वयाभ्यधिकानि त्रयस्त्रिंशत्सागरोपमा सुनिकाचितं भवति, शेषं सर्वमनिकाचितं भवति।

ननु वैमानिकनैरयिकाभ्यां एव तीर्थङ्करा भवन्ति, न भवनपत्यादिभ्य इति कथमुच्यत इति चेत्? युक्तिवशाज्जिनवचनाच्च, तथाहि-अविराधितगुणाः सम्यग्दृष्टयो मनुष्या वैमानिकदेवसत्कमेवायुष्कं बध्नन्ति न शेषायुष्कं। इत्यतो भवनपत्यादिषु न गच्छन्ति।

नन्वविराधितगुणाः सम्यग्दृष्टयो भुवनपत्याद्यायुष्कं न बध्नन्ति, तर्हि उदायिनृपतिर्बद्धजिननामा कुत्र गतः? न च नरकगतौ सम्भाव्यते, पौषधव्रते पञ्चत्वप्राप्तेः, नापि तिर्यङ्मनुष्यगत्योः, ततो निर्गत्य तीर्थकरानुपपत्तेः, नापि वैमानिकेषु गतः सम्भवति, यतो वैमानिकेषु जघन्यतोऽपि पल्योपमप्रमाणमायुष्कं तृतीयजिनभवे तु साधिकाष्टषष्टिसहस्त्राधिकलक्षवर्षप्रमाणमन्तरमस्तीति तत्र गमने तृतीयजिनः कथं भवति? भवनपत्यादिषु गमने 'त्वविराधितगुणा भवनपत्याद्यायुष्कं न बध्नन्तीति', विरोधत्रयं सम्भवतीति चेत्? सत्यम्, सम्यक्त्वप्राप्तेरर्वाग् भवनपत्यायुष्कं बद्धः सम्भा-

व्यते, तत्र गमने च जिननामकर्मबन्धेऽपि न क्षतिः, नापि वैमानिकेभ्य एव जिना भवन्तीत्यपि विरोधः, भवनपत्यादिभ्योऽपि केचन जिना भवन्ति, तथापि कदाचित्कत्वेन न विवक्षा कृतेति सम्भाव्यते।

एवं चरमतीर्थपतेः पितृव्यो द्वितीयजिनः सुपार्श्वोऽपि वक्तव्य इति।

ननु विषयतृष्णातरलितचेतसां क्रोधवतां श्रेणिककृष्णादीनां सापराधे निरपराधे च परस्मिन् कथं शमः? तदभावे च कथं सम्यक्त्वसंभव इति चेत्? मैवम्, सम्यक्त्वे सति लिङ्गैरवश्यं भाव्यमिति न नियमः, लिङ्गाभावेऽपि लिङ्गिनस्तप्तायोगोलके दर्शनात्, तदुक्तम्- ''लिङ्गे लिङ्गी भवत्येव लिङ्गिन्येवेतरत्पुनः। नियमस्य विपर्यासे सम्बन्धो लिङ्गलिङ्गिनोः।।१।।'' इति,

यद्वा सञ्ज्वलनकषायोदयात् श्रेणिककृष्णादीनां क्रोधकण्डूविषयतृष्णे, सञ्ज्वलनकषायाणामपि तीव्रचतुःस्थानिकरसस्पर्धकोदयत्वेनानन्तानुबन्धिसदृशविपाको भवति। इत्याद्यनेकशङ्कासमाधानानि विधाय ग्रन्थोऽतीव रसप्रदः पूज्यै रचितः।

अस्य सङ्क्रमकरणस्य द्वितीयविभागे प्रत्येकमार्गणायां सङ्क्रमपतद्ग्रहा भङ्गाश्चान्यावशिष्टानागतोपयोगिमननीयविषयाश्च तत्तद्विषयकयन्त्राः प्रतिपादिताः।

यै र्ग्रन्थग्रन्थितृपादैः प्रायः स्वकीयाखिलजीवनश्रीः कर्मसाहित्यप्रभृतिसूक्ष्मार्थसार्थाधीनीकृता, तेषामयं ग्रन्थः कीदृश इत्याकांक्षापि नोत्तिष्ठते। स्याच्चेत्तर्हि बुभुक्षुजनाः स्थालीपुलाकन्यायेन ग्रन्थावलोकनेनैव साक्षात्कुर्वन्तु, यतो यथायोग्यविवर्णनासमर्थसरस्वतीकानल्पवचनादरपरायणोऽहं न वक्तुमीशे।

* अमृतानुवादः *

येषु[1] ग्रन्थान् विधायर्षि र्येषां[2] ग्रन्थिर्विदारिता।
चित्रं कर्म[3] प्रेम[4]गुरो! कर्म[5]कृत् ते भवाम्यहम्।।

१) कर्मसुविषेयषु। २) कर्मणां। ३) कार्यं। ४) भविपुलाछन्दः। ५) सेवकः।



# ।। श्रीप्रेमसूरिस्तवनाष्टकम्।।

– साध्वीश्रीचिन्तनप्रियाश्रीः



पींडवाडापुरे जन्म प्रव्रज्या विमलाचले।
स्वर्गतिः स्तम्भने यस्य प्रेमगुरुं स्तवीमि तम्।। ।।१।।

गाम्भीर्य-स्थैर्य-धैर्यादि-गुणरत्नमहोदधिम्।
सच्चारित्रमहादर्शं प्रेमगुरुं स्तवीमि तम्।। ।।२।।

साधुष्वाचारशैथिल्यं दृष्ट्वा दोदूयते हि यः।
दृष्ट्वान्याचारदक्षत्वं गुरुश्चित्ते प्रमोदते।। ।।३।।

गिरायां यस्य माधुर्यं नैर्मल्यं मानसे परम्।
काये नित्यं विनम्रत्वं प्रेमगुरुं स्तवीमि तम्।। ।।४।। (युग्ममम्)

दोषवादे दरिद्रो यः श्रीमान् सद्गुणकीर्त्तने।
सम्यग्शास्त्रे सुमेधावी प्रेमगुरुं स्तवीमि तम्।। ।।५।।

परामर्शो जिनेन्द्रोक्तौ हर्षो न स्वगुणश्रुतौ।
प्रकर्षः स्वात्मशुद्धौ च प्रेमगुरुं स्तवीमि तम्।। ।।६।।

कुवादि-फेरु-सिंहस्य रामचन्द्रगुरोरपि।
अस्ति सद्गुरुदेवो यः प्रेमगुरुं स्तवीमि तम्।। ।।७।।

यज्ज्ञानगौरवं वक्तुं जिह्वा मे मुखरायते।
यद्गुण**चिन्तने**नैव "**श्रेयः**" सौधे वसाम्यहम्।। ।।८।।

* अमृतानुवादः *
मनोऽमलं भवेद् येषां ब्रहमचर्यादिचिन्तनात्।
प्रेमगुरुवराः स्तुत्या, यतो गुणिजनाद् गुणाः।।

– पू.आ.श्री रामचन्द्रसूरिसमुदायः

# श्रीप्रेमसूरिस्तुत्यष्टकम्

– साध्वीश्रीव्रतरक्षिताश्रीः

पञ्चहृषीकजेतारं पञ्चाचारपवित्रितम्।
पञ्चप्रमादहन्तारं प्रेमगुरुं प्रणौमि तम् ॥१॥

यः प्राप पावनं जन्म पिण्डवाडाख्यपत्तने।
मरुभूमौ शुभे लग्ने प्रेमगुरुं प्रणौमि तम् ॥२॥

यं संस्मरन्ति सद्भक्ता अद्यापि भूरिभक्तितः।
सद्भूतसद्गुणाधारं प्रेमगुरुं प्रणौमि तम् ॥३॥

येन जीवनपर्यन्तं कृतमेकाशनं व्रतम्।
नित्यं द्विद्रव्यमात्रेण प्रेमगुरुं प्रणौमि तम् ॥४॥

यस्मै सूक्ष्मातिसूक्ष्मं च कर्मशास्त्रमतिप्रियम्।
चारित्रपालने स्थैर्यं प्रेमगुरुं प्रणौमि तम् ॥५॥

यस्मात् पलायितः क्रोधो नष्टो द्वेषमहाभटः।
व्यपगता वपुर्मूर्च्छा प्रेमगुरुं प्रणौमि तम् ॥६॥

यस्य पट्टधरो रामो विख्यातो जैनशासने।
संरक्षणेन मार्गस्य प्रेमगुरुं प्रणौमि तम् ॥७॥

यस्मिन् निर्मलचारित्रं रराज काञ्चनोपमम्।
तपः सद्वह्निसंशुद्धं प्रेमगुरुं प्रणौमि तम् ॥८॥

हे चन्द्रोज्ज्वलचारित्र! हे सिद्धान्तमहोदधे!।
ब्रह्मचर्यपवित्रात्मन्! प्रेमगुरो! प्रणौम्यहम् ॥९॥

प्रार्थये मुक्तिपर्यन्तं कुरु व्रते सुरक्षितम्।
भवाटवीभ्रमन्तं मां प्रेमगुरो! प्रणौम्यहम् ॥१०॥



* अमृतानुवादः *

प्रेमगुरोः स्तुतिं कृत्वा त्यक्त्वा सप्तभयं भवम्।
एतास्मि सप्तरज्जूर्ध्वं शिवेऽभयदसंस्तुते॥

– पू.आ.श्री रामचन्द्रसूरिसमुदायः


सन्तः साश्चर्यचर्याः

# सन्तः साश्चर्यचर्याः

- साध्वीश्रीकुलरत्नाश्रीः

अहह! महतां निःसीमानश्चारित्रविभूतयः कल्याणकाङ्क्षिणां जीवा-नामाश्रयस्थानं।

सिद्धान्तमहोदधीनामाचार्यभगवतां श्रीमद्विजयप्रेमसूरीश्वराणां नैके गुणाः सन्ति।

तेषां समाधिगुणः प्रभूततरः मह्यं रोचते।

जीवनान्तकाले परमगुरुप्रेमसूरीश्वरमहाराजाः प्रथमपट्टधरशिष्या-चार्यदेवश्रीमद्विजयरामचन्द्रसूरीणां मुखकमलात् नमस्कारमहामन्त्रं श्रुण्वन्तो 'वीर! वीर! क्षमयामि' इति वदन्तो देहमत्यजन्।

तदापि आश्रितगणानां संयमस्य चिन्तातत्परा अभूवन्यन्मम शरणागतानां शिष्याणां मनागपि कर्मणां बन्धो मा भूत्। भवान्तरेऽपि संयमः सुलभो भवेदतः सर्वे समिति-गुप्तिपालने प्रयत्नं कुर्युः। ते गुरुवरा नानाविधप्रसङ्गेऽपि सहिष्णुतामधारयन्। अतोऽन्तिमसमये समाधिमृत्युं प्राप। जीवनस्य प्रान्ते समाधिगुणप्राप्तिरतीव दुष्करास्ति। सापि तेषां सुकराभूत्। कस्मात्? जिनाज्ञापालनात्।

हे गुरो! भवतः स्तवनान्ममापि जीवने जिनाज्ञापालन-समाधि-समता-सरलता-स्वाध्याय-प्रेम-समर्पणादिगुणानां प्राप्तिर्भवतु।

* अमृतानुवादः *

जिनाज्ञापालनं नित्यं जीवने विद्यते यदि।<br>
प्रेमसूरीन्द्रवन्मृत्यौ समाधिस्तस्य सर्वथा।।

---

- पू.आ.श्री रामचन्द्रसूरिसमुदायः।



# ।। सद्गुरुभ्यो नमः।।

– साध्वी श्री कुलचन्द्राश्रीः

।। अर्हम्।।

गुरुः सत्त्वं गुरुस्तत्त्वं, गुरुरानन्दसागरः।
गुरुः सृष्टिर्गुरुर्दृष्टिस्तस्मै श्रीगुरवे नमः।।

सिद्धान्तमहोदधि–कर्मसाहित्यनिपुणमति–ब्रह्मतेजोमूर्ति–कारुण्यक्षीरसागर–सच्चारित्रचूडामणिश्रीमदाचार्यप्रेमसूरीश्वराणां पावनचरणारविन्दं प्रणतिपुष्पेण प्रपूज्यगुरुगुणगानेन स्वजीवनमपि गुणसम्प्राप्त्या निर्मलीकरणाय गुणकीर्तनं कर्तुं प्रयते।

- आसीद् येषां लोभो गुणगणे, किन्तु न शिष्योपध्यादिषु।
- आसीद् येषां रागो मुक्तौ, किन्तु न संसृतौ।
- आसीद् येषां द्वेषो मोहनृपे, किन्तु न जीवगणे।
- आसीद् येषां मनः परमात्मनि, किन्तु न कर्मणि।
- ये वस्त्र–पात्र–भक्त–कीर्ति–पदग्रहण–शिष्यप्राप्तिषु निःस्पृहा आसन्, अतस्तैर्निःस्पृहशिरोमणिरिति विशेषणं सार्थकं कृतम्।



यथा–क्षारेण वस्त्रं
शाणेन अस्त्रं
नीरेण अङ्गं
अञ्जनेन नयनं
वह्निना जातरूपम्

तथैव–तीव्रात्मविशुद्धिप्रकर्षेण यैः स्वात्मा निर्मल्यकारि।

- केनाकारि-प्रशस्या धवलिमा शशिनि?

बर्हिणां च बर्हे चित्रं विचित्रम्?

जलरुहपटले सारसौरभ्यसम्पत्?

पद्मपाणौ प्रतापः, नैर्मल्यं पयसि?

यथा चन्द्रादौ धवलिमादिगुणाः स्वाभाविकाः,
तथा येषु विनम्रता स्वाभाविकी आसीत्,

- निर्लेपता-निरीहता-निर्विकारिता-निर्मलता-निर्ममता-
निश्चलता-निर्दम्भितादीनां मूर्तयः!
अप्रमत्ततजलेनाभिषिक्तदेहाः हे आचार्यप्रवराः!
मामपि तथैव कुर्वन्तु, यथा मयि द्रुतं वीतरागभाव आविर्भवेत्,
तत्पुष्ट्या च रागभावो विनश्येदिति।

- क्रिया-चिदाह्वपरमचक्रमालिनः,क्षमा-तपोऽतिजवनसप्तिशालिनः।
गतो हि योऽस्य गुरुरथस्य संश्रयं,सुनिश्चिता शिवनगराप्तिरस्य हि।।
(रुचिरावृत्तं, ज-भ-ज-ग, इति तल्लक्षणं छन्दोनुशासनम् २.१९८)

* अमृतानुवादः *

रुचिराशे! महत् सत्वं तव प्रेमगुरो! शुचे!।
प्रभाऽवन्ती जगद् प्रान्ध्यात् स्तुतिस्तथ्या गुणाकर!।।

- पू.आ.श्री विजयॐकारसूरि समुदायः



# ।। मधुरमसमञ्जसम् ।।

– श्रेयःपदहेवाकी

इयं वात्सल्यवारांनिधे वार्त्ता विद्यते–विक्रमस्य २०२४ तमवर्षस्य माघमास्य। परमपूज्यसिद्–धान्तमहोदधिः कर्मसाहित्यनिष्णातो वात्सल्यवारिधिः सच्चारित्रचूडामणिः पूज्यपादविजयप्रेम–सूरीश्वरमहाराजः स्तम्भनतीर्थे विराजमान आसीत्। पूज्यपादस्य समाधिवाञ्छा अत्यन्तप्रदीप्ता–भवत्। पूज्यपादस्य चक्षुणी एकदिशायां विस्तृते स्तः, कर्णौ चैकां वार्तां श्रवणाय विह्वलावास्तां ''मम शिष्यरामचन्द्रसूरिः कदागमिष्यति? इदानीं कुत्रास्ति?'' तद् श्रवणाय अत्यन्ततत्प–रताभवत्।

सङ्घश्रावकाःस्तदागत्य पूज्यपादमवदत्, ''भगवन्! भवतां शिष्यो द्वित्रैर्दिनैरागमिष्यति। ''श्रावकाः पूज्यपादं प्रत्यपृच्छन्, ''यदा परमपूज्यशासनप्रभावकविजयरामचन्द्रसूरीश्वरमहाराज आगमिष्यति तदा वयं स्वागतयात्रां कुर्यामो न वा?'' तदा सरलस्वभाविपरमपूज्यपादोऽवदत्, ''युष्माकं शासनप्रभावकगुरुरागच्छति तर्हि युस्माभिः स्वागतयात्रा कर्तुं योग्यास्ति।'' यदा परमपूज्यविजयरामचन्द्रसूरीश्वरमहाराजः इति वार्तामश्रुणोत् तदा श्रावकान् प्रत्यकथयत्, ''अहम् इदानीं परमपूज्यगुरुदेवनिश्रायामागच्छामि तदा स्वागतयात्रायाः कुत्रचिदवकाशो नास्ति।'' शिष्यो गुरोरग्रे लघुतां दर्शयति, सा च तस्य गुरुसमर्पणनिष्ठास्ति, गुरुश्च उदारतां दर्शयति, सा च गुरो र्गुणगरिमास्ति।''

गुरुशिष्योरिदृशीं वार्तां श्रुत्वा स्तम्भनतीर्थस्य सङ्घो मधुरमसमञ्जसमनुभवति। सङ्घो विचारयति, ''वयं इदानीं किं कुर्यामः?'' तदा श्रावका एकं मार्गमन्विष्यन्ति। स्तम्भननगरीमध्यात् श्रीपञ्चचत्वारिंशदागमशोभायात्रां वयं कुवीर्महि। नगर्याश्च बहिर्गत्वा परमपूज्यशासनप्रभावक–विजयरामचन्द्रसूरीश्वरमहाराजं गृहीत्वा नगर्याः प्रतिविथि गत्वा पूज्यपादविजयप्रेमसूरीश्वरनिश्रा–यामुपाश्रयायागच्छेम। इति वार्तां श्रुत्वोभयगुरुशिष्यौ किञ्चिन्नावदताम्।

तदा स्तम्भननगर्यां प्रतिवीथि प्रतिगृहं शोभाभाजनमभवत्। श्रीचतुःपञ्चाशदागमशोभायात्रा नगरमध्याद् बहिर्गत्वा परमपूज्यरामचन्द्रसूरीश्वरमहाराजं गृहीत्वा प्रतिविथि गत्वोपाश्रयं पूज्यपाद–गुरुदेवसमीपे आगतवती। तदा श्रीपञ्चचत्वारिंशदागमशोभायात्रामध्ये सर्वनगरजना आगतवन्तः। पूज्यपादगुरुदेवविजयप्रेमसूरीश्वरमहाराजः स्वशिष्यमुखदर्शनायोपाश्रयोपरितनवातायनमुपाविशत्।

– पू.आ.श्री रामचन्द्रसूरिसमुदायः।

यदा परमपूज्यविजयरामचन्द्रसूरीश्वरमहाराजः स्वस्य परमोपकारीगुरुदेवमदृश्यत् तदा शीघ्रं गुरुसमीपे गत्वा तत्क्षणमेव गुरुचरणयोर्द्वादशावर्तवन्दनं कृत्वा गुरुभक्तिवशान्-नयनाम्बुजलात् पादप्रक्षालनमकरोत्।

ईदृशमद्भुतं गुरुमिलनं दृष्ट्वा सकलश्रीचतुर्विधसङ्घोऽप्यत्यन्तानन्दाश्चर्ययोः मिश्रसंवेदन-वानभवन्मधुरमसमञ्जसम् चाप्नुवान्।

*** अमृतानुवादः ***

स्तम्भनपुरश्रीसङ्घो मानं गुरो[१] र्गुरोर्गुरोः
रामे प्रेमगुरुं प्राप्ते व्यधादागमयात्रया

---

१) गुरोः इति रामचन्द्रसूरेः, 'गुरोर्गुरोः' इति गुरुः रामचन्द्रसूरिः, तस्य गुरुः
श्री प्रेमसूरिस्तस्य-गुरोः गुरोः द्वयो र्गुरो र्मानं व्यधात्
गुरौ समुपस्थिते शिष्यस्यागतस्य नगर प्रवेशः आगमग्रन्थमिषाद् व्यधात्- इति भावः





# ॥ समाधिवाञ्छा ॥

– मुक्तिपूर्णताप्रार्थी

आजीवनगुरुचरणसेविनां सरलस्वभाविनां सिद्धान्तमहोदधीनां वैराग्यमूत्तीनां तपोनिष्ठानां त्यागसन्निष्ठानां परमपूज्यानां विजयप्रेमसूरीश्वरमहाराजानां जीवनं तपोमयं त्यागमयं चाभवत्। पूज्यपादैः स्वस्य समग्रजीवने वैराग्यनिष्ठा ब्रह्मचर्यसाधना च समाराधिता। पूज्यपादैर्ज्ञानमाहारस्थाने स्थापितम्। यतः पूज्यपादैर्द्रव्यतोऽशनपानरूपं द्विविधमाहारं गृहीतम्। भावतश्च वाचना–पृच्छना–परावर्तना–ऽनुप्रेक्षा–धर्मकथारुपं पञ्चविधमाहारं गृहीतम्।

पूज्यपादैः संयमजीवनस्य प्रारम्भिककाले ज्ञानाभ्यास–तपस्–त्याग–वैराग्यवर्धनं प्रति भृशमप्रमत्तता धारिता। ''ज्ञानस्य परिपाकस्तदा भवति यदा तज्ज्ञानमाचरणे साकारतां समागमिष्यति।'' पूज्यपादानां जीवनमपि समिति–गुप्तिपालनरूपं ''ज्ञानस्य फलं विरतिः'' इति सूक्ते र्दर्पणमेवाभवत्।

पूज्यपादा यदा जीवनसन्ध्यायां समागतास्तदा तेषां एका हि वाञ्छाऽभवत्। **यथा जीवने संयमः, तथा मरणे समाधिः,** विक्रमस्य २०२४ तमे वर्षे पूज्यपादाः स्तम्भनतीर्थे विराजमाना अभवन्। तदा तत्र सुश्रावकः रमणलालश्रोफमहाभागस्तान् वन्दनायागतवान्। स पूज्यपादेभ्यो वन्दनं कृत्वापृच्छत्, ''पूज्याः! अहं मुम्बापुर्यां गच्छामि, भवतां किंचित् कार्यमस्ति? तर्हि तल्लाभं मह्यं यच्छत। तदा पूज्यपादैः कथितं, ''तत्र मम शिष्यरामचन्द्रसूरिरस्ति, तस्मै मत्सन्देशं यच्छ, यत् त्वमनेकस्मै समाधिं यच्छसि, इदानीं गुरवे समाधिं न दास्यसि?'' तदा स श्रावकोऽवदत्, ''भगवन्तः! भवन्तः पत्रं लिखित्वा यच्छत।'' पूज्यपादैः कथितं, ''पत्रलेखनेनात्र किं कार्यं? मत्सन्देशमात्रं त्वं तस्य कथय।''

स श्रावको मुम्बापुर्यां श्रीपालनगरस्थिताय परमपूज्याय विजयरामचन्द्रसूरीश्वरमहाराजाय वन्दनं कृत्वाऽकथयत् ''अहं स्तम्भनतीर्थादागच्छामि। भवतां गुरुभिर्भवन्तं प्रति सन्देशः प्रेषितः।'' तदा परमपूज्या आचार्यभगवन्तो धर्मोपदेशनायै गच्छन्त आसन्। तथाप्यासने उपविश्य हस्ताञ्जलिं कृत्वापृच्छत्, ''गुरुभगवतां मां प्रति कः सन्देशोऽस्ति?'' तदा स श्रावकोऽकथयत्, ''त्वं अनेकस्मै समाधिं यच्छसि, तर्हि गुरवे समाधिं न दास्यसि?'' इति परमपूज्या रामचन्द्रसूरीश्वरमहाराजाः परमपूज्यस्य गुरुभगवतः सन्देशं श्रुत्वा चातुर्मास्य पश्चात् समस्तान् अञ्जनशलाका–प्रतिष्ठादिकार्यक्रमान् स्थगितान् कृत्वा स्वगुरुदेवसमीपं समाधिवाञ्छापूरणार्थं शीघ्रं विहारं कृत्वा स्तम्भनतीर्थं समागताः।

परमपूज्यस्य सच्चारित्रचूडामणेर्विजयप्रेमसूरीश्वरमहाराजस्य ईदृशीसमाधिवाञ्छास्ति। पूज्यपादाः स्वपट्टधरमुखात् श्रीनमस्कारमहामन्त्रं श्रुण्वन्तः सर्वजीवराशिं क्षमयित्वा अन्तिमनिर्यामणां प्राप्ताः।



* अमृतानुवादः *

यस्य जीवितमर्हद्वाक्संयतं सुसमाधिना।
सोऽन्तेऽस्य स्याद् व्रतीशैस्तु कुल्याद्भिः फलवद् द्रुवत्॥

– पू.आ.श्री रामचन्द्रसूरिसमुदायः



# ।। गुरुरिति किम्?।।

- जिनपदप्रार्थी

श्रीजैनेन्द्रशासने देवगुर्वोरद्भुतं स्थानमस्ति। देवगुर्वोराराधनया विना मोक्षाभिलाषिणां जीवानामेकापि धर्मक्रिया सम्यग् न भवति। देवगुरुस्वरूपं कीदृशमस्ति? देव इति सर्वज्ञः सर्वदर्शी वीतमोहो वीतरागो वीतद्वेषो त्रिलोकनाथोऽज्ञानतिमिरहरणांशुमाली।

गुरोरपि श्रीजिनशासनेऽत्यंतमहिमास्ति।

गुरुरिति किम्? एके वदन्ति,''गुरुरिति कुम्भकारः।'' ईदृश्युपमा किमर्थं गुरोर्दीयते? उच्यते-यथा कुम्भकारो वनात्, मृत्पिण्डमानयति, शुद्धं करोति, जलेन प्लावयति, हस्ताभ्याम् मृद्नाति, मृत्पिण्डं चक्रे स्थापयति, सुन्दराकारदानाय कठोरचपेटां ददाति, द्वितीयहस्तेन कोमलरीत्या अन्तः सहायं ददाति, पाकार्थमग्नौ तापयति, अङ्गुल्याः टणत्कारं दत्वा घटो पक्वो दृढो भूतः किं वा न? इति परीक्षां करोति। तथा गुरुरपि भवाटवीपरिभ्रमणभयश्रान्तशिष्यरूपं मृत्पिण्डं भववनात् स्वसमीपमानयति, तद्दोषान् दूरीकृत्य, शुद्धं कृत्वा, भववैराग्यमयजिनवाणीजलेन प्लावयित्वा, संयमोपसर्गपरिष-हादिकष्टदर्शनं चात्मस्वरूपावाप्त्यमोघोपायदर्शनमिति द्विदर्शनरूपहस्ताभ्यां मर्दनं कृत्वा, संयमदानरूपचक्रे स्थापयित्वा सुन्दराकारदानार्थं ग्रहणासेवनशिक्षायां भीमदृष्टिरूपकठोरचपेटां ददाति, द्वितीयहस्तरूपकान्तदृष्ट्या वात्सल्य-सान्त्वन-सहकाररूप-सहायं ददाति, पाकार्थमाकस्मि-कानीच्छनीयाज्ञारूपपरीक्षाग्नौ तापयति, यथावसरे प्रेरणादिरूटणत्कारान् दत्त्वा शिष्यो दृढः सज्जीभूतः किं वा नेति पश्यति। ईदृशीसमग्रप्रक्रियामध्ये गुरोः कुत्रचिदंशमात्रोपि स्वार्थो नास्ति, किन्तु एकमात्रं स्वपरात्महितचिन्ता हि प्रधानास्ति।

ईदृक्रीत्या परमपूज्य-वात्सल्यवारिधि-विजयप्रेमसूरीश्वरमहाराजैर्दीक्षाजीवनप्रारम्भकाले परमपूज्यगुरुवर्गभक्तिर्बहुमानकृतज्ञभावेन कृता। स्वयं वर्यगुरुवर्गस्य शिष्यो भूत्वा निजाश्रितशिष्यगणं निःस्वार्थभावेन जिनाज्ञापक्षपातपूर्वकं जीवनस्य पालनमकरायत्। पूज्यपादैः स्वप्रथमशिष्यमुनि-रामविजयस्यात्महितार्थं दुष्कराज्ञा कृता। कीदृशी दुष्कराज्ञा कृता?-''यावत् त्वं प्रतिदिनं १०० गाथाः कण्ठस्थाः न करिष्यसि तावत् कस्यचिदाहारद्रव्यस्य त्यागमहं करिष्यामि, अथवा न्याय-व्याकरण-काव्य-कोश-शास्त्राऽऽगमपठन-जिनवाण्युपदेशसम्बन्धीन्याज्ञा कृता। पूज्यापादस्य परमविनयिविनेयेन मुनिरामविजयमहाराजेन सर्वदापि गुरोः प्रतिज्ञा सफलीकृता, गुरोः प्रत्येकाज्ञा पूर्णीकृता। एवं पूज्यपादैरनेकानेकशिष्याः सज्जीकृताः, परमपूज्यसिद्धान्तमहोदधिप्रेमसूरीश्वरमहा-राजैर्निःस्वार्थभावेन स्वपरात्महितचिन्तापूर्वकं जिनाज्ञासापेक्षैर्भूत्वाऽऽश्रितवर्गस्यानुशासनं कृतम्।

अत्रार्थे कुत्राचिद् गुरोरुपमा दीयते? गुरुरिति किं? ''गुरुरिति कुम्भकारः''।

* अमृतानुवादः *

प्रेमसूरिर्विधिर्वर्यो जीवं धर्माद्रचेतसम्।
शिष्याकारं विनिर्माय शिक्षाभ्यां सुरकुम्भकृत्।।



- पू.आ.श्री रामचन्द्रसूरिसमुदायः

# ।। श्रीप्रेमसूरिगुरुवराष्टकम् ।।

– साध्वीश्रीश्रेयःपूर्णाश्रीः

निर्वाणपंथे वरयानपात्रम्,

**प्रेमसूरीश्वर**

**सद्ज्ञान पात्रम्...**



(छन्दः – वसन्ततिलका)

ऐन्द्रैर्नतं चरणयुग्ममतीवभक्त्या
दुष्टाष्टकर्मगणमर्मभिदात्मशक्त्या।
आणम्य वीरचरणं सुखदं स्वभक्त्या
वैराग्यदं गुरुवरं सततं स्मरामि।।१।।

दावाग्निदोषशमनाय पयस्समानं
साम्यप्रधानरसपुण्यसरःसमानम्।
ज्ञानस्थितेः प्रसरणाय मरुत्समानं
सौभाग्यदं गुरुवरं सततं स्मरामि।।२।।

रागाद्यनन्तगदवृन्दमपाकरोति
द्वेषाद्भजद्भविजनं शरणं ददाति।
कामारिनाशकरणैकसुगुप्तियुक्तं
तं ब्रह्मदं गुरुवरं सततं स्मरामि।।३।।

भक्तिभरैः श्रमणदेवगणैस्तु सेव्यो
मैत्र्यादिभावनिर्झरणैस्तु रम्यः।
विभ्राजते गुरुवरो मम मेरुतुल्यस्–
तेजोधरं गुरुवरं सततं स्मरामि।।४।।

भव्यं चकोरनिकरं परमोददायी
मिथ्यात्वघर्महरणे शुभशैत्यदायी।
पञ्चप्रमादनिकुरम्बतमोपहारी
तं चन्द्रवद् गुरुवरं सततं स्मरामि।।५।।

---

– पू.आ.श्री विजयरामचन्द्रसूरिसमुदायः

स्याद्वादशास्त्रवरभावरहस्यवेदी
दौर्गत्यदुःखजनितभ्रमणे न खेदी।
यःस्वात्मसौख्यविशदः सहजप्रवेदी
तं ज्ञानदं गुरुवरं सततं स्मरामि।।६।।

स्वाध्यायसङ्गसहितामतिनिर्विकारी
मोक्षैकलक्ष्ययुतनिर्मलभावधारी।
पावित्र्यकान्तिकरणे वरसत्त्वधारी
वात्सल्यदं गुरुवरं सततं स्मरामि।।७।।

श्रेयस्करं प्रशमदं शुभदं स्मरामि
संपूर्णवर्यगुणदं शिवदं स्मरामि।
तं **मुक्तिदं** गुरुवरं सततं स्मरामि
तं प्रेमसूरिचरणं सततं स्मरामि।।।।८।।



* अमृतानुवादः *
आत्मगुणैर्व्रतीन्द्रो यस्तेजो ब्रह्मविरागवान्।
चन्द्रवद् वत्सलो ज्ञानी प्रेमसूरिं स्मरामि तम्।।







# प्रेमवचनामृतम्

– साध्वीश्रीसिद्धिश्रेयाश्रीः

नेमिनाथं हृदि स्मृत्वा रामचन्द्रं परं गुरुम्।
सिद्धान्तानां महासिन्धुं प्रेमसूरीश्वरं स्तुवे ॥१॥

बालोऽपि भक्तिमुग्धोऽहं गुणानुरागप्रेरितः।
प्रेमगुरो र्वचोपुष्पै ग्रंथ्नामि सद्गुणस्त्रजम् ॥२॥

आरूढोपशमश्रेणिं समसौख्यजुषं मुनिम्।
मोहो निगोदकारायां प्रमत्तं क्षिपति ध्रुवम् ॥३॥

आबालवृद्धगोपाला इन्द्रियैः किङ्करीकृताः।
विषयाणां परित्यागी श्रेयस्कामः सदा भवेत् ॥४॥

औदासीन्यं भजेन्नित्यं रागादिके निमित्तके।
दुष्परिणतिदुर्व्यूहो जीयते येन दुर्जयः ॥५॥

भावोल्लासैः सदा कार्या साधुभक्तिर्हितार्थिना।
साधवः स्यु र्जगद्वन्द्याः श्रेयः पन्थे सहायकाः ॥६॥

बिभेति न मुनि र्मृत्यो र्मृत्युं जानन् महोत्सवम्।
जीवने साधना वर्या समाधि र्मरणे तथा ॥७॥

तीर्थरागवशात् साधुरिच्छेत् तीर्थप्रभावनाम्।
शासने हीलनां दृष्ट्वा को लभेत रतिं यतिः ॥८॥

कोऽहमिति हृदि ध्यात्वा समाधिस्थो मुनि र्भवेत्।
बाह्यभावान् मुधा मत्वा निजभावे स्थिरो भवेत् ॥९॥



---

– पू.आ.श्री रामचन्द्रसूरिसमुदायः

रम्याहारपदार्थैं र्यः कायश्चिरं सुलालितः।
क्षणात् क्षीणो भवेन्नूनं ततस्तं विश्वसेन्नहि ॥१०॥

भवाटव्यां चिरं भ्राम्यन् श्रान्तोऽस्मि कर्मपीडितः।
बाहयं त्यक्त्वानुकूल्यं भो! दध्रे देहयात्मभावनाम् ॥११॥

द्रव्यप्राणा भवेयु र्न विना वातं कदाचन।
भावप्राणास्तु साधूनामात्मचिन्तां विना किमु ॥१२॥

इत्थं सर्वेप्सितं प्रेमगुरोर्वचोमृतं शुभम्।
धृत्वात्मँस्त्वं सदा सिद्धिश्रेयः सौख्यं वरं चिनु ॥१३॥

* अमृतानुवादः *
जिनधर्ममहामेरौ प्रेमाह्वनन्दनं वनम्।
गुणपुष्पं शिवच्छायं सिद्धिं फलत्यहो बुधाः!॥



# श्रीगुरुवराः प्रेमसूरीश्वराः

– साध्वीश्रीश्रेयःपूर्णाश्रीः

अत्र श्रीजिनशासननभोमण्डले श्रीतीर्थंकरभगवन्तः सूर्यवत् तेजसा देदीप्यमानाः सन्ति। तेषामुपस्थित्यां सर्वत्र जगति मोक्षमार्गोऽतीव स्फुटतरो भवति। किन्तु यदा श्रीतीर्थंकरभगवन्तः शासनं संस्थाप्य निर्वाणनगरे सञ्चरन्ति, तदा तं मोक्षमार्गं शशिसमाना केवलिभगवन्तो भास्वरं कुर्वन्ति। तेषामनुपस्थित्याममुं मोक्षमार्गं के वक्ष्यन्ति? यदाचार्यभगवन्तो नाभविष्यन्, तर्हि जिनशासनगगनाङ्गणेऽतीवान्धकारमव्याप्स्यत्।

तत्समये सर्वज्ञशासननभसि दीपसमा उद्दीप्यमाना आचार्यभगवन्तस्तं मोक्षमार्गं दीपयन्ति वहन्ति च अनेक भव्यजीवाँस्तस्मिन् मोक्षमार्गे चालयन्ति। शुष्कनद्यां नावं चालयन्त इव भगीरथं कार्यमाचार्यभगवन्तः कुर्वन्ति। तस्मादेव दुःषमकालेऽपि धर्ममार्ग आचार्यैरेव सुरक्षितोऽस्ति।

यथा भीष्मग्रीष्मोष्मे काले जलं विना मत्स्यं न जीवेत्, विषमे पञ्चमकाऽऽरेत्राचार्यभगवन्तं विना मोक्षमार्गः कदापि न चलेत्।

यथोच्छवासं विना जीवा न जीवन्ति, तथाचार्यभगवन्तं विनापि धर्ममार्गो निःश्वासप्राणीव भवति।

आचार्यभगवन्तो धर्ममार्गस्य सुरक्षार्थं निजप्राणानपि जुह्वति। ईदृशा अनेकानेकाः पञ्चाचारपालकाश्चारित्रनिष्ठावन्तो गीतार्थप्रवरा गम्भीरा निःस्पृहावन्तो रागद्वेषविजेतारो गुणगणालङ्कृता आचार्यभगवन्तः प्रभुवीरजिनशासने प्रभूता भूतास्सन्ति। पूज्यपादोमास्वातिजीमहाराजाः, पूज्यपादसिद्धसेनदिवाकरसूरयः, तार्किकप्रवरा पूज्यपादहरिभद्रसूरयः, पूज्यपादबप्पभट्टीसूरयः, कलि–कालसर्वज्ञाः पूज्यपाद हेमचन्द्राचार्या इत्यादय आचार्यभगवन्तो विशिष्टगुणगणान् धारयन्त आसन्। तेषां नामस्मरणमात्रमप्यस्माकं मस्तकं नामयति।

तेषां परम्परायामासन्नकाले सत्यमार्गसंरक्षका पूज्यपादा विजयानन्दसूरीश्वराः समभवन् तेषां पट्टधराः पूज्यपादकमलसूरीश्वराः, तेषां पट्टधराः दानसूरीश्वरा अभूवन्। तेषां पट्टधराः सिद्धान्तमहोदधय आचार्यभगवन्तः प्रेमसूरीश्वरा अभूवन्। तेषां समाधिमरणस्य सुवर्णवर्षमधुना प्रवर्तते।

ते महापुरुषाः कीदृशा आसन्? तत् किञ्चिदुच्यते अद्यप्रभृति एकशतपञ्चत्रिंशद् वर्षाणि पूर्वं पूज्यगुरुवरा मरुधरमण्डले पिण्डवाडानगरे जन्माप्नुवन् पूर्वभवसंस्कारेण वैराग्यवासितान्तःकरणेन

– पू.आ.श्री रामचन्द्रसूरिसमुदायः





युवावस्थायामेव प्रव्रजिताः।

• पूज्यपादैः प्रव्रज्यायाः स्वीकरणेन साधनायज्ञः प्रारब्धः, विनयसहितं वैयावृत्यं, उत्कृष्टत्यागसहितमेकाशनव्रतं, स्वाध्यायश्चात्युत्कृष्टभावेनात्मसात्कृतः।

• पूज्यपादैरत्यल्पसमये शास्त्रपारगामित्वं प्राप्तम्। श्रीदानसूरिवरैस्ते पूज्यपादा आचार्यपदे प्रास्थाप्यन्त, ''सिद्धान्तमहोदधि'' रित्युपाधिरपि प्रादात्। छेदाद्यागमसूत्राणां विशिष्टज्ञातारो भूताः। कर्मसाहित्यविषये विशारदत्वं प्राप्ताः। कर्मप्रकृत्यादिग्रन्थान् स्वयं पठित्वानेकानप्यपाठयन्।

• पूज्यपादैः कर्मसिद्धिसङ्क्रमणकरण-मार्गणाद्वारविवरणाभिधानौ महान्ग्रन्थौ निर्मितौ।

• पूज्यपादाज्ञानेन सह जिनाज्ञापालनेऽपि नितरां रता अभूवन्। श्रमणजीवनं परमात्मभि र्यथाप्ररूपितं, तथैव मोक्षबद्ध्यलक्ष्या गुरुवराश्चारित्रपालनाय सदोद्युक्ताः समभवन्। मलिनवस्त्र-शुद्धगोचरीविजातीयसंसर्गत्यागादौ दृढाग्रहा अभूवन्।

• प्राप्तास्तैःपुनः निःस्पृहता, रसनादिकरणे नीरसता, निर्मलता, वत्सलताद्यनेक-गुणैरशोभन्त।

• पूज्यपादैरेकोऽभिग्रहोऽधारि-यावन् मम गुरुभगवन्तं दशः शिष्या न भवेयुः, तावदहमेकमपि शिष्यं न कुर्याम्। तथाम्रफलमपि सर्वथैव त्यक्तम्। ईदृश्या निःस्पृहतया पूज्यपादा व्यराजन्त।

• पूज्यपादैरापञ्चाशदब्दं फलानि, मिष्टान्नानि जीवनं यावत् त्यक्तानि। एकदौषधार्थं वैद्येन ''मर्मरान्'' आहर्तुं पूज्याः सूचिताः। द्वितीयदिने शिष्येणाहाराय दत्ताः। तदा पूज्यपादैः कथितं - मम त्यागोऽस्ति। अद्यप्रभृति मया त्यक्ताः। तदा शिष्यैर्भणितं-कथं? पूज्यपादैः कथितं गतदिने मर्मराहारे मया स्वादोऽनुभूतिविषयमाप्तस्ततो मया त्यक्ताः। ईदृशी रसनाविषये नीरसतायाः परमोच्चकक्षामाप्ताः।

• पूज्यपादानां देहाद् वस्त्रेभ्यः सुरभिः सदा प्रासरत्। तस्य किं कारणं? तेऽखण्डब्रह्मचर्य-व्रतधारकाश्चारित्रनिष्ठामण्डिता आसन्। दीर्घकालपर्यन्तं चारित्रमाराध्य पूज्याः समाधिपूर्वकं खम्भातनगरे स्वर्गं समचरत्।

• पूज्यपादानां श्रीचरणेऽहमिति विज्ञप्तिं करोमि-यदहमपि भवतां कृपया निर्मलचारित्रं पालयित्वा मङ्क्ष्वात्मकल्याणं साध्नोमि।

* अमृतानुवादः *

गुरु ब्रह्मसरोहंसो जिनधर्माध्वभास्करः।<br>
प्रेमामृतमहामेघो व्यधाद् धर्मसरो मरौ।।

# रत्नपरीक्षणेऽद्भुता शक्तिः

- साध्वीश्रीदर्शनपूर्णाश्रीः

प्रेमचन्दमहोदयैः पूर्वं कदापि न कृता शत्रुञ्जययात्रा, सप्तदशवर्षमिते वयसि यात्रां कृत्वा महातीर्थं प्रबलवैराग्यभावमापन्नाश्चतुर्थव्रतं स्व्यकुर्वत्। प्रतिदिनं प्रवर्धमानसंवेगभावसंयुतः ''कदाहं संयमं ग्रहीष्ये? इत्यादि भावनासुरलतायामरमत। पित्रा निवारितास्तथापि संयम-ग्रहणावसरलिप्सवस्तयोरनुपस्थितेर्लाभं प्राप्य पादलिप्तनगरं गत्वा गुरुदानसूरिपार्श्वे संसार-कारागृहान्निस्सृत्य रम्ये संयमप्रासादे समतिष्ठन्, भागवतीं प्रव्रज्यामङ्गीकृतवन्तः। गुरोः प्रथम-शिष्यत्वमापन्नः। विनयवैयावृत्त्यादियोगोद्युक्ताः, स्वाध्याये रताः, गुरुपादसेवायामासक्ता जिनस्य भक्तौ रममाणाः सन्तः क्रमेण चारित्रस्यापूर्वानन्दं प्रापुः।

एकदा दरापराख्ये ग्रामे चातुर्मासार्थं स्थिताः। तत्रासन्नवर्तिपादराग्रामवासी ''त्रिभुवनाभिधो'' बालः, ''उजमशीनामा शिक्षकः'' च पठनार्थमागच्छताम्। ज्ञानरुचिवन्तं वैराग्यवन्तं तेजस्विनं बालं दृष्ट्वा सहजतया तैः पृष्टं - त्वं किमर्थं दीक्षां न गृह्णासि? सोऽकथयत् - यावन्मम प्रपितामही जीवितास्ति तावत्पर्यन्तं न गृह्णामि, पश्चान्निश्चितं प्रव्रज्यां ग्रहीष्यामि। तदा ते कथयन्ति - त्वं जानासि यत् किं प्रथमं त्वं मरिष्यसि वा सा? कस्य कियदा-युरिति निश्चितमस्ति? तर्हि बालः कथयति ''न'' ईदृशं वचनं श्रुत्वा वैराग्ययुतो बालोऽति-दृढनिश्चयवान् सञ्जातः। स्वीकृतव्रतः स रामविजयः क्रमेणाचार्यविजयरामचन्द्रसूरीश्वरा इत्या-ख्यया प्रसिद्धा जाताः। जैनशासनस्य, सङ्घस्य, समुदायस्य, सिद्धान्तस्य प्रभावका अभूवन्।

तथा यदा सूरिरामचन्द्राः प्रवचनं कथयन्ति तदा तत्पार्श्वस्थिताः प्रेमसूरीश्वराः सर्वेषां मुखमव-लोकयन्ति। तत्पश्चाद् यस्मै प्रवचनमतीव रोचते, तं जनं प्रवचनानन्तरं समाहूय योग्यरीत्या चारित्रमार्गे संवर्धयन्ति, तथा तेऽपि प्रेमसूरीश्वराणां प्रेरणां स्वीकुर्वन्ति।

अहो! कीदृशी तेषां रत्नपरीक्षणेऽद्भुता शक्तिः।

❊ अमृतानुवादः ❊

स्वयं रत्नं गुरुः प्रेम-सूरी रत्नपरीक्षकः।
दानसूरिर्गुरू रत्नं रत्नं शिष्यादिमो गुरोः।।

- पू.आ.श्री रामचन्द्रसूरिसमुदायः






जयन्तु विजयन्तु

**प्रेमसूरीश्वर**

**विजयतेतराम्।**

# षष्ठो विभागः

अक्षतवदक्षत-विमल-विशद-विशुद्ध-
भावाभिरामचारित्रपरिपूर्णानाम्
पूज्यपादाचार्यप्रवराणां
प्रेमसूरीश्वराणां चरणंशरणं व्रजामि.....





अकृत्रिममङ्गलकारकाणां
भावारोग्यभैषजानां पूज्यपादाचार्यप्रवराणां

## प्रेमपारायणाभिधे श्रीनिःश्रेयसे
## शुद्धाखण्डचारित्रप्रेमाक्षताख्यः षष्ठो विभागः

- प्रेमाक्षता न केनाऽपि निर्माप्यन्ते।
- प्रेमाक्षताः परं माङ्गल्यहेतुः संपद्यन्ते।
- प्रेमाक्षताअखण्डचारित्रेणालङ्क्रियन्ते।
- प्रेमाक्षता भवपापौघं विनश्यन्ति।
- प्रेमाक्षताः सदा भद्रं प्रणयन्ति।
- प्रेमाक्षता दोषं विधूनयन्ति।
- प्रेमाक्षतास्तुष्टिं विरचयन्ति।
- प्रेमाक्षताः प्रवरशक्तिं संचाययन्ति।
- प्रेमाक्षता भावारोग्यं प्रकल्पयन्ति।

# स्वचिन्ता गरीयसी
# परचिन्ता लघीयसी

– श्रेयःसरित्

निस्पृहतामूर्त्तिस्त्यागमूर्त्तिः समतामूर्त्ति र्ज्ञानमूर्त्तिस्तपोमूर्त्तिरेवमादिसद्गुणैः, पूर्वं महर्षिभिः स्वात्मानुभूतिस्वरूपगुणप्रकर्षो यथा स्वात्मनि स्थापितस्तथान्यसाधकः साम्प्रतं न दृश्यते। तत्र तु स्वस्वरूपभावनात्मकचैतन्यप्रवाहितप्रवाह एकं कारणमस्ति नान्यत्।

संयमधर्मस्वीकारः सापेक्षभावेन सुलभः। किन्तु संयमधर्मस्वीकारानन्तरं स्वेनैव स्वचिन्ता–करणं पुनस्तु सुदुर्लभम्। सिद्धान्तमहोदधि–सच्चारित्रचूडामणि–गुरुप्रवर–श्रीमद्विजय–प्रेमसूरिवराणां लघुवयस्येव तच्चिन्ता समुत्पन्नासीदिति दरीदृश्यते।

तेषु पुण्यपुरुषेषु सर्वगुणसम्पन्नेषु निस्पृहतागुणः पराकाष्ठां प्राप्तः। यतो निःस्पृहतागुणः, स्वात्मचिन्तायामेव वसति। यदि न स्वात्मचिन्ता, तदा नाप्यते निःस्पृहता, तत एव सुभाषिते प्रोक्तं ''स्वात्मचिन्ता गरीयसी परचिन्ता लघीयसी'' यः स्वात्मचिन्तां करोति तस्यैव निःस्पृहतागुणस्य प्राप्तिः संभवति। यावता तन्न प्राप्नोत्यात्मा, तावता संयमधर्मेऽपि तस्य स्थैर्यं सुदुर्लभमिति।

यथोक्तं ''निःस्पृहतागुणेन विना निरपेक्षता न समागच्छति।'' पुनश्च यस्मिन्नात्मनि निःस्पृहता वसति। तस्मिन्नेवात्मनि समग्रप्रशस्यश्रीर्निजास्पदं प्रपद्यते। न तत्र शङ्का कर्तव्या।

संयमजीवनप्रारम्भकाले हि संयमलक्षितास्पदानां मुनिप्रेमविजयानां तादृशी निःस्पृहता संजाता। न तदनुरूपा निःस्पृहता कुत्राऽपि दृश्यते। सा तु सर्वैर्निर्विवादं स्वीकरणीयम्।

---

– पू.आ.श्री रामचन्द्रसूरिसमुदायः

सा ह्यात्मानं संयमपरिणामे संस्थापयति। सा हि संयमे सुस्थिरं करोति। सा हि जीवने संयमसफलतालक्ष्यमापादयति। सा हि संयमं भगवदाज्ञानुरूपमाचारयति। सा हि संसारसुख-साधनेभ्य-आत्मानमुदासीनं प्रणयति। सा हि सुखानुकुलतायामपि विरक्ततामापादयति।

पूज्यप्रेममुनिपुङ्गवे निःस्पृहता पराकाष्ठां प्राप्ता। तयैव तेन मुनिवरेण मनसा संकल्पितं ''यद् यावता मम गुरुवराणां दश शिष्या'' न भवन्ति, तावता मया शिष्यो न कर्तव्यः। इति सङ्कल्पबलेन यदा स्वगुरुश्रीमुनिदानविजयानां झटिति सुशिष्याः सञ्जातास्तदैव प्रेममुनिवराणां पुण्यप्रभावेण समग्रजैनशासनस्योद्योतकारी प्रथमशिष्यः प्राप्तः। येन च जैनशासनस्य प्रकृष्टा प्रभावना कृता। यो गृहस्थावस्थायामपि सर्वसङ्घवल्लभः सर्वश्रमणसङ्घसुपरिचित आसीत्। 'त्रिभुवनकुमार 'इति नाम्ना बाल्यावस्थामाप्यबालपराक्रमः 'रतन' इतिनामस्वपितामहीसिञ्चित-संस्कारेण संयमधर्मप्राप्तुकामोऽभवत्। संयमप्राप्त्यनन्तरं ''श्रीरामविजयः'' इति समग्रसङ्घे इति प्रसिद्धिं दधानः, स प्रेमविजयस्य प्रथमशिष्यः परमात्मशासनस्य प्रकृष्टां प्रभावकतास्थानं संप्राप्तः।

तेन च स्वगुरुनाम्नोऽपि प्रकृष्टा ख्यातिः प्रसारिता। एतादृशस्य शिष्यस्य या संप्राप्तिर्जाता तन्मूले श्री प्रेमविजयानां निःस्पृहता गुण एव कारणम्, नान्यत्।

एवं निःस्पृहतागुणं प्रवरं, तस्य च प्रवरतरा प्राप्तिरपि नात्मचैतन्यं विना संभवति। तेनैव दृश्यते तेषां प्रेमसूरीश्वराणां संयमप्रारम्भकाले प्रकृष्टतरात्मचैतन्यं, तेनैव स्वात्मगुणपरिपोषणम्। तेन च स्वात्मदोषपरिमार्जनं, तेन स्वपरिणामपरिशुद्धिश्च। ततस्तु परं प्रकृष्टतरान् सौभाग्यवतः मुनिप्रष्ठान् प्रेमसूरिवरान् सततं, प्रकर्षेण, प्रत्नातिशयेन नमनं करोमि।

इति स्वात्मचैतन्यस्वामिनः प्रेमसूरिवरा जयन्तु..., विजयन्तु..., सर्वं प्रभावयन्तु च।।

इति शम्

* अमृतानुवादः *

नास्तीहा यस्य येषां तद्, वृणीते तान् द्रुतं वरम्।
पश्याऽब्धि र्नेहते वेलामिन्दुर्दत्ते दिनाद्दिने।।



सुन्दरं...सुन्दरं...सुन्दरम्

# स्वाध्यायप्रदीपप्रकाशः

- श्रेयःपद्मः



पूज्यपादानां स्वाध्याये परमा प्रीतिरासीत्। यथा चातकस्य मेघेन सार्धम्, कमलस्य सूर्येण सार्धम्, पुष्पस्य सौरभ्येन सार्धम्, जलस्य शैत्येन सार्धं, तथैव पूज्यपादानां प्रीतिरासीत् स्वाध्यायेन सार्धम्। विना स्वाध्यायं न तिष्ठन्ति, विना स्वाध्यायं साधुमपि न सहन्ते, स्वाध्यायार्थं साधुं ते प्रेरयन्त्येव। साधुं स्वाध्याययुक्तं दृष्ट्वा हर्षं प्राप्नुवन्ति। स हि तेषां मनोमन्दिरे स्थैर्यप्रकाशाय प्रदीप आसीत्। तस्यैव मरीचयः सर्वत्र प्रकाशविस्तारमादधति।

स एव नवं नवं सुन्दरं ज्ञानं सृजति। स एव स्वात्मसुखं ददाति। स एवाध्यात्मभावं प्रगुणयति। स एव स्वानुभवरसास्वादं वितनोति। स एव महाव्रतपालने दार्ढ्यं कारयति। स एव वैराग्यं वर्धयते। स एव हि परमाणुसदृशमपि परगुणं दृष्ट्वा हृदयं प्रमोदमेदुरं वितनोति।

इत्येवं प्रभूता गुणाऽऽपगाः केवलमेकस्याः स्वाध्यायगुणगङ्गोत्र्याः संभूताः।

---

- पू.आ.श्री रामचन्द्रसूरिसमुदायः

प्रेमसूरि

तेषां पूज्यपादानां स्वाध्यायप्रेमविषयक एकः प्रसङ्गोत्र । मया प्रस्तूयते। दत्तावधानेन श्रोतव्यम्।

अन्यदा रात्रौ पूज्यपादाः एकादशवादने सुप्तोत्थिता लघुनीत्यर्थम्। तदा पूज्यपादै र्दृष्टं-एकः साधुः स्वगुरुचरणनिकटं निद्रामपहाय स्वाध्या-यकरणरतः। पूज्यपादान् दृष्ट्वा स बालमुनिस्तेषां समीपं समागतः कर-बद्धं च निवेदयति। आज्ञापयन्तु पूज्यपादा! बालमुनिं माम्। ''पृष्टं च पूज्यपादैः-सर्वेऽपि सुप्ता।'' अधुना तु त्वमेकाकी किं करोषि? वदतु। तेन प्रोक्तं न किमपि किन्तु पूज्यपादाः स्वाध्यायमेव करोम्यहम्। पूज्यपादाः हर्षं प्राप्ताः। पुनश्च सुप्ताः।

प्रातर्गोचरीमण्डल्यां यदा सर्वेपि साधवः समुपस्थिताः, तदा पूज्यपादैः कथितं यद् ''सर्वेऽपि महात्मानः!'' श्रुण्वन्तु। अद्य रात्रौ एकदशवादने यदाहं लघुनीत्यर्थमुत्थितस्तदासौ बालमुनि र्हेमभूषणविजयः साश्चर्यमे-काक्येव स्वाध्यायं कुर्वन् दृष्टो मया।- तत्र धन्यवादार्हस्तस्य गुरुवर एव। न जानाम्यहं मुनिमृगाङ्कविजयस्तस्य योगक्षेमं कथं करोतीति। तत्र तु महदाश्चर्यम्, ततो यदि कस्यापि, स्वबालमुनिवराणां सुष्ठुतया योगक्षेम-करणेच्छा वर्तते तदा तेन ते मुनिमृगाङ्कविजयं समर्पितव्यः। स सुष्ठुतया सज्जान् करिष्यति। इत्येवं मां लगति। ईदृशं तेषां प्रेमसूरिवराणां स्वाध्यायप्रेमासीत्। तेषां जीवने विद्यमानं स्वाध्यायस्य माहात्म्यमद्यावधि गच्छे प्रसरति। ज्ञानप्रदीपस्य प्रकाशः स्वात्मनि तेजोऽभिवृद्धिं जनयति, परस्यात्मन्यपि प्रकाशं प्रस्तारयति।

।। इति शम्।।

* अमृतानुवादः *

स्वाध्यायः स्वपूर्णज्ञायः[१], परत्रापि स्वतेजसा।
सूरिः प्रेमगुरुर्दीपो द्योतितस्तेन सन्ततम्।।

१) स्वस्य अधिकं ज्ञं ज्ञानं, तस्य आयः लाभ येन सः।





वैविध्यम्

# गुणपञ्चकम्

– श्रेयःसेतुः

पूज्यपादप्रेमसूरीश्वरा गुणरत्नरोहणाचलाः। तेषां गणना न केनापि भविष्यति। बहुधा गुणरत्नमरीचिभिः समग्रविश्वं प्रकाशयन्तस्ते पूज्यपादा जगति चिरं जयन्ति।

यथा – सूर्यतेजो न केनापि मीयते।
पुष्पसौरभं न केनापि बध्यते।
वह्नेरुष्णत्वं न केनापि त्याज्यते।
वार्धे जललवा न केनापि गण्यते।

तथा न केनापि पूज्यपादानां गुणानां मानादिकं विधीयते।

महती गुणसमृद्धिः पूज्यपादानां जीवनेऽस्ति। किन्तु सा सर्वापि गुणपञ्चकेधिष्ठितास्ति। यथा पञ्चनमस्कारः सर्वसूत्रोपरि स्थानं भजते। तद्वत् गुणपञ्चकपदं तेषां सर्वगुणसमृद्धेर्जनकमस्ति। तथाहि–

**प्रथमो गुणः तपः** पूज्यपादानां जीवने तपोधर्मः सदैव विद्यते। सदैवेकासनं व्रतं ते धारयन्ति। तत्रापि त्रीणि द्रव्याण्यैव गृहणन्ति। ते स्वादमयं भोजनं सदैव त्यजन्ति। ते आहारं प्रति रागभावं न दधति। बाह्यतपसोऽधिकं त्वाभ्यन्तरतपसि ते परिणतिप्राप्ताः। तस्मादेव तेषु सर्वेऽपि गुणाः प्रकटिता भवन्ति। इति न संशयः।

**द्वितीयो गुणः स्वाध्यायः** स्वाध्यायस्तेषां प्राणः। अत एव तेऽहर्निशं स्वाध्यायं कुर्वन्ति। सोऽपि स्वाध्यायो न केवलं ग्रन्थ–पठन–पाठ–नदिरूपः, किन्तु स्वात्मानुभूतिरूपः।

**तृतीयो गुणः विनयः** विनीयतेऽष्टप्रकारं कर्म येन इति विनयः। ज्ञान–दर्शन–चारित्र–तपस्–तीर्थादीनां तथाचार्योपाध्यायसाध्वादीनां विनयं निरन्तरं ते कुर्वन्ति। अथवा बाल–वृद्ध–ग्लान–शैक्ष–तपस्वी–साध्वादीनामौचित्यादिरूपं विनयं तेषां जीवने सदैव स्पष्टतया दृश्यन्ते, ततो हि तेषां महापुरुषता ज्ञायते।

**चतुर्थो गुणः वैयावृत्यं** स्वगुरुदेवानां वैयावृत्यं तु तेषामात्मसादेव समभवत्, किन्तु बाल–शैक्ष–वृद्धादीनामपि वैयावृत्यं तेषां जीवन रङ्गभूमौ भवनाटकस्यान्तिमाङ्क इव प्रावर्तत।

**पञ्चमोगुणः संयमः** संयमस्यापरपर्याय एव प्रेमसूरीश्वरः। सम्यग्नियमो यः स संयमः। मोक्षमार्गे यः सम्यग् यतना स संयमः। संयम एव तेषां जीवने रसायणभूतः, हृदयभूतः,

– पू.आ.श्री रामचन्द्रसूरिसमुदायः

उपनिषद्भूतः, मार्गभूतः, आधारभूतः, बीजभूतः, मूलभूतः, सर्वगुणभूतः, इत्येवं गुणपञ्चकेन समन्विताः प्रेमसूरीश्वराः सदैव मम संयमशुद्धिगुणं समर्पयन्तु।

❊ अमृतानुवादः ❊

पञ्चभूतैर्यथा विश्वं प्रेमगुरोस्तथाऽऽत्मकम्[१]।
पञ्चगुणैस्तपोमुख्यैः श्रेयस्कृद् व्रतपञ्चकम्।।

१) आत्मा एव कं सुखं येन तद्-आत्मकं-आत्मनोऽनन्तचतुष्टयावस्थाकरम्-इति भावः।



# ।। प्रेमशब्दस्तवना ।।

– श्रेयःसद्मा

(पूज्यपादसिद्धान्तमहोदधिप्रेमसूरीश्वराणां ''प्रेम'' येऽपरपर्यायाः शब्दाः, ये प्रेमार्थनिकटवर्त्तिनः शब्दाः, ये च प्रेमप्रकारदर्शकाः शब्दाः, तेषां सर्वेषां शब्दानां गुरुनाम्नि स्थापनां कृत्वा पूज्यपादानां स्तवना कृता, ते शब्दास्तु अभिधानचिन्तामणिः, अमरकोषः, आदर्शकोषाद्या–इत्याद्या धारतया, गुरुस्तवनाव्याजेन संगृहीता निरूपिताश्च।)

भवरागाग्निमुक्तेर्यः शिवरागानुशीतलैः।
संयमरागभूतः स प्रेम **रागगुरुः** स्मृतः।।१।।

चारित्रस्यानुरागेण स्वात्मशुध्यनुरागतः।
कर्ममुक्त्यनुरागे**णानुरागः** संस्मृतो गुरुः।।२।।

जिनाज्ञानुरतिर्यस्य नारतिः संयमे कदा।
सन्मार्गेऽनुरति र्नित्यं प्रेम **ह्यनुरति** र्मतः।।३।।

जीवमात्रेषु संस्नेहाद ब्राह्यस्नेहविनिर्जयात्।
शासने स्नेहपूर्णो यः प्रेम **स्नेहगुरुः** सदा।।४।।

ज्ञान–दर्शन–चारित्र–तपो–वीर्येषु सत्वरम्।
प्रेमयुक्तो भवेन्नित्यं ततः **प्रेमगुरु**र्जय।।५।।

अहिंसामयभावेन हृदयं यस्य निर्मलम्।
भावस्तु भावनाहार्दं **हार्दं** प्रेमगुरुं नतः।।६।।

शास्त्रे प्रीतिर्दृढा यस्य स्वात्महिते पुनस्तथा।
भवप्रीतिस्तु नैवास्ति प्रीत्या **प्रीतिं** स्तुवे गुरुम्।।७।।

प्रमोदेन क्षमाधर्मे प्रतिष्ठा यस्य सर्वदा।
शिवाध्वनि प्रमोदेन नौमि **प्रमोद**सद्गुरुम्।।८।।

जैनसङ्घे भवेच्छिष्येऽनुग्रहो दोषवत्यपि।
सापराधिषु नित्यं स्या**दनुग्रहो** गुरुर्मम।।९।।

कृपावान् सर्वसत्वेषु गुरोः कृपामकाङ्क्षत।
ततः **कृपा** गुरुः प्रोक्तो मम प्रेमगुरुः सदा।।१०।।

मृदुतया जिनेन्दुर्यो मृदुतामृतसागरः।
सर्वत्रः मृदुताभृद् यः प्रेम **मृदुर्गुरु** र्वरः।।११।।

---

– पू.आ.श्री रामचन्द्रसूरिसमुदायः

आमोदश्चरणे यस्य स्वाध्याये परमस्तथा।
आमोद आर्जवे यस्या-**मोदः** स्यात् प्रेम सद्गुरुः।।१२।।

मनो विनोदमाप्नोति संयमेन समाधिना।
विनोदो न भवे यस्य **विनोदः** प्रेम मे गुरुः।।१३।।

यस्योल्लासः सदा सत्येऽहिंसातपोमये मते।
सोल्लासो व्रतनिष्ठासु, तत **उल्लास** सद्गुरुः।।१४।।

प्रणयः साम्यभावेऽस्य, सर्वात्मप्रणयी परः।
गुर्वाज्ञाप्रणयस्तीव्रस्ततः स्यात् **प्रणयो** गुरुः।।१५।।

सर्वकामविनिर्मुक्तः कामं च कामजिद् द्रुतम्।
श्रेयस्कामः शिवाऽऽकामः **कामः** प्रेमगुरुर्मम।।१६।।

संशुद्धि-भावनाशुभ्रैः सच्छृङ्गारैर्विशोभते।
आत्मा हि सर्वदा यस्य स **शृङ्गारगुरो जय!**।।१७।।

सिद्धान्ते सद्रतिर्यस्य ग्लानभक्तिषु सर्वदा।
सदारति-र्गुरोःपादे प्रेम मम **रतिर्गुरुः**।।१८।।

ऐश्वर्यं शिष्यसंपत्सु ज्ञान-ध्यानविरक्तिषु।
ईश्वरभक्तिरूपस्तं **प्रेमैश्वर्यं** गुरुं नुवे।।१९।।

नम्रताभावपुञ्जो यो, लघुतालब्धगौरवः।
शुभभावानुसन्धानाद् **भावः** प्रेम गुरुः स्मृतः।।२०।।

शुभेष्वभिनिवेशाद् योऽजयत् कर्मरणं गुरुः।
नाकार्येऽभिनिवेशोऽस्या**भिनिवेश**स्ततो गुरुः।।२१।।

व्रतिनां लालनं प्रेम्णा दृश्यते यस्य जीवने।
लालनं मुक्तिरामार्थं ततो मे **लालनं** गुरुः।।२२।।

करोति चुम्बनं नित्यं क्षमां क्रोधनिवारणे।
चित्रं **चुम्बन**नाम्नाऽत्र प्रेमधर्मेण सद्गुरोः।।२३।।

श्रामण्यं शुद्धभावेन नित्यमालिङ्गयेन् मुदा।
आलिङ्गयेच्च सद्धर्मं प्रेमा**लिङ्गाभिधो** गुरुः।।२४।।

इत्थं प्रेमगुरोर्भक्त्या पर्यायादिसुनामतः।
स्तवनं श्रेयसा प्रोक्तं दर्शनं शिवदं भवेत्।।२५।।

* अमृतानुवादः *

नयै धर्मेऽर्हतां धीरप्रेम गुरोर्मतिः स्थिरा।
नवोल्लेखमयाऽऽख्याभिः स्तवार्हा गुणभृद्वरैः।।



रहस्यास्वादः

# निर्दोषसंयमप्रेमः

– श्रेयःसखा

दोषा जीवने दुष्टतां विदधति। निर्दुष्टं जीवनं शुद्धतां च। निर्दोषं जीवनं तदैव भवति यदा संयमे एव प्रेम स्यात्। ततः संयमप्रेम्णि सदैव प्रयत्नातिशयः कर्तव्यः। तेनैव जीवनशुद्धिर्भवति। जीवनशुद्धे र्महत्वपूर्णभागो निर्दोषतां प्रत्यस्ति। जीवनशुद्धौ च संयमशुद्धिः संभवति। तेनैव च संयमप्रेम फलितं भवति।

पूज्यपादानां जीवने संयमप्रेम कल्पनातीतमासीत्। न कदापि केनापि सार्धं तस्य तुलना क्रियते। निर्दोषचर्या हि तेषां जीवने संयमस्य मूलाधारो वर्तते।

अन्यदा पूज्यपादानां देहे वातप्रकोपः सञ्जातः। बहव उपायाः कृताः। किन्तु न कैरपि चिकित्सकैर्दूरीकृता तत्पीडा। तदा तै र्निर्णीतं, बाधास्थाने स्थाप्यते यद्युष्णोदकेन भृता वस्त्रपेटीका तदा वातपीडा नश्यति नान्यथा। तच्छृत्वा महात्मभि र्विचारणां कृत्वा यद्युष्णोदकं नाऽकृतं प्राप्स्यते ततः कुत्रापि सूचनां कृत्वा जलमुष्णं प्राप्स्यते। एतच्छृत्वा पूज्यपादैः कथितं नोष्णजलार्थं कुत्रापि कथितव्यम्। यदि वक्तव्यं तदा न मयोपचारः कार्यते।

तत्रस्थैः शिष्यैः पुनः पुनर्विज्ञापिताः पूज्यपादाः, निश्चला न विचलिताः। तदा शिष्यैः पूज्याः प्रश्निताः। कथमुष्णजलं निर्दोषं प्राप्यते? मार्गं दर्शयन्तु। तदा पूज्यपादैः प्रोक्तम्।

ट्रेनयानस्यैञ्जिनयन्त्रे जलमुष्णं सदैवास्ति। यदि तत्र कोऽपि साधुर्गच्छेत् तदा निर्दोषं जलं लभ्यते। शिष्यैः स्वीकृतम्। गतास्ते। निर्दोषमुष्णं जलं प्राप्तं, तदुपचारेण च पूज्यपादानां देहे सुखाकारिता जाता। पुनश्च स्वाराधनानुकुलस्वास्थ्यं सञ्जातम्।

इत्येवं निर्दोषसंयमजीवनप्रेम तेषामतुलतरमस्ति... इति शम्।



✻ अमृतानुवादः ✻

तक्रबिन्दुरिवक्षीरे दोषलेशोपि संयमे।
दोषज्ञः प्रेमसूरिस्तं जहात्येवं हि दूरतः।।

– पू.आ.श्री रामचन्द्रसूरिसमुदायः

अर्थोपनिषद्

# ॥ प्रेमगुरुः ॥

– श्रेयःपुण्यः

॥ प्र ॥

प्रकृष्टतरा

प्रकर्षकरा

॥ ए ॥

स्मृतिः – अनुकम्पा

सिद्धिः

**स्मृतिः** = ज्ञानस्य सम्प्राप्तिः। स्मृतेः ज्ञानरूपत्वात्।

**अनुकम्पा** = दयापरिणामः = अवधपरिणामः। जीवरक्षापरिणामः।

निर्दोषसंयमपालनपरिणामः।

**सिद्धिः** = चारित्रधर्मस्य सिद्धिः

सिद्धचारित्रवान्।

॥ म ॥

• तासां मन्दिरम् स्थानम्।

अथवा तासु

सूर्यसमः, चन्द्रसमः, शम्भुसमः,

हरिसमः, रामसमः, इन्द्रसमः,

इश्वरसमः, इति।

॥ गुरुः ॥

• ''गुः'' इति प्राणः = आत्मा ''रुः'' इति युद्धम्।

निरन्तरं यः स्वात्मगुणप्रापणार्थम् युद्धं करोति स गुरुः प्रेमगुरुः।

अथवा

• गुः इति कान्तिः, तस्यां रुः इति सूर्यः

कान्त्या सूर्यसमाः प्रेमगुरवः सन्ति।

अथवा

• ''गुः'' इति भीरुता पापकरणे इति तथा ''रुः'' इति रक्षणम्।

पापाद् यः स्वात्मानं रक्षतीति गुरुः।

इति

• प्रकृष्टतरप्रकर्षकरसम्यग्ज्ञान–दयापरिणामादिषु–सर्वप्रसिद्धिप्रदः।

• सर्वत्र माहात्म्यसभरः स्वात्मगुणजननप्रयत्नातिशयकृद्।

• पापकरणे भीरुताविशिष्टो गुरुः **स प्रेमगुरुः।**

(एकाक्षरशब्दकोषाधारतया)

– इति प्रेमगुरुशब्दार्थसमुच्चयः।

❊ अमृतानुवादः ❊

स्व–परात्मपरार्थं यो गृणात्यर्थं बहुं गुरुः।

व्रतार्थोपनिषद्भूतोऽनेकार्थैः प्रेम संस्तुतः॥



– पू.आ.श्री रामचन्द्रसूरिसमुदायः

नवं नवं सौन्दर्यम्...

# ब्रह्मव्रतस्य सम्यग्धारणं संरक्षणं च

– श्रेयोदर्शी

पूज्यपादाः श्रीमन्तः प्रेमसूरीश्वराः गुणगणगीर्वाणगिरौ नन्दनवनोपमानाः सन्ति, अतो न दोषकण्टकवृक्षश्चित्तधरायामारोहति, अतो न दोषलेशस्य प्रवेशावकाशस्तदीयमनोमन्दिरे। ये ये गुणाः स्वयं प्राप्ताः, तान् तान् गुणान् स्वानुयायिनोऽपि प्राप्नुवन्तु इति। शुभमङ्ग-लपवित्रभावना तेषां मनसि मानसरोवरे निर्मलनीरमिव प्रवर्तते। अतस्ते दोषप्रवृत्या दुःखिनो भवन्ति। तेनैव दोषोन्मूलनार्थं कदाचिदपि कषायादिसंपृक्ता अपि भवन्ति, न तु स्वं प्रति प्रतिकूलभावसंदर्शिनं प्रति।

कषायविजयार्थं ते पुनः पुनः क्षमाधर्मं स्मृतिमानयन्ति। विषायाणां च भयानकतां दृष्ट्वा, तेभ्यः सदा भीताः सावधानचित्ताः समभवन्। यतो विरागभावा जीवा ब्रहमव्रतसञ्जीवनीं प्राप्नुवन्ति। ब्रह्मव्रतपूताश्च शिवपथं प्राप्नुवन्ति।

अन्यदैको मुनिवरः प्रातर्नमस्कारसहितं प्रत्याख्यानं करोति तदा पूज्यपादाः सकोपा जाताः। भो! धनिकजनकस्य पुत्रोऽसि त्वम्। जानाम्यहं। किन्त्वत्र साधुधर्मे नित्यमेकाशनं जिनैराज्ञप्तम्। अपरं च किं न जानासि?। अस्माकं गच्छे एकवृद्धसाधोरन्तरे युवसाधुना स्वप्तव्यमिति? ह्यस्तनदिनेतव शिष्यः कुत्र सुप्तः? किं त्वं जानासि? ब्रह्मव्रतरक्षणं साधुजीवनप्राणमस्ति। तत्खण्डने प्रभूततरदोषं प्राप्नोति जीवः। ततः सावधानेन साधुना स्वसाधोः संयमचिन्ता कर्तव्या।

नैतादृशशिष्ये संयमचिन्ताकरणोद्युक्तो गुरुः प्राप्नोत्यधम्। यः स्वयं ब्रहमव्रतं सुनिश्चलं दधाति। स नूनं परं तद्व्रतपालने संरक्षणे स्वाश्रितान् सन्तत मुद्यतान् करिष्यत्येव। यः स्वयं जीवने नाचरति व्रतं स कथमन्येषामाचारपालनार्थं बद्धकक्षो दक्षश्च भविता। नैवान्येभ्यः कारयति, श्रूयते चाद्य यथा श्रीमत्प्रेमसूरीश्वराः नैष्ठिकब्रह्मव्रतं दधते स्म। तदर्थंपुनश्चोच्यते-तेषां कदाप्य ब्रहमसेवनविषयः सङ्कल्पोऽभवत्।

* अमृतानुवादः *

नीराग-रोषवृत्त्यन्तोरक्षितोध्वा शिवं पुरम्।
नयत्येवं गुरुर्यातः प्रेमसूरिर्जिनाऽध्वना।।

---

– पू.आ.श्री रामचन्द्रसूरिसमुदायः

## परमपदपन्थाः

# ।। प्रकृष्टतरानासक्तयोगिता ।।

– श्रेयःपथिकः

योगक्रिया सुलभा किन्तु योगभावो योगपरिणामश्च सुदुर्लभः। त्यागः सुकरः। किन्तु त्यागेनोद्भूताऽनासक्तिस्तु सुदुर्लभः। ते पूज्यपादाः प्रेमसूरीश्वरा अनासक्तियोगावस्थामधिगताः। इत्येवं कल्पनाकल्पनं तेषां जीवने चरितार्थतामाञ्चत्, एतादृश्यो घटनास्तु बहुधाः समजीघटन्, किन्तु तद्विषया एका घटनाऽत्र प्रस्तूयते।

यथाहि – अन्यदैको बालमुनिवरः कथितः पूज्यपादैः–यथा त्वं, शतगाथाः कण्ठस्थाः करिष्यसि। तदाऽहं मिष्टभोजनं करिष्यामि। पूज्यपादास्तु इत्येवं मन्यमाना आसन् ''नासौगाथाः करिष्यसि, न च मम मिष्टान्नभोजनकरणप्रसङ्गापत्तिः, किन्तु तेन बालमुनिना तु गाथाशतकं कण्ठस्थं कृतमेव, समग्र समुदायश्चानन्दातिरेकेण समुल्लसितप्रोल्लासोऽभवत्। यदुत समुदायस्य सर्वमहात्मानः समीच्छन्ति स्म। यथा पूज्यपादा मिष्टान्नं भोजयन्तु। पूज्यपादास्तु हृदि विमृशन्त आसते। केनापि सदुपायेन च मया मिष्टभोजनं नैव कर्तव्यम्। बहुचिन्तनेन पूज्यपादैः प्राप्तः उपायस्तत्र यदि स बालमुनिवरोऽनाग्रहवान् भवेत्। तदैव मम कार्यं सुकरं भवेदिति। चिन्ताकुलाः पूज्यपादा निश्चिताः सञ्जाताः।

अन्यदा बालमुनिवराः समूहमध्ये पूज्यपादैः प्रोक्ताः–यः शतगाथाः कण्ठस्थाः करिष्यति, तस्य हस्तेनाऽहं ''चोकलेटं'' (इति भाषायां स्वादिमं खाद्यपदार्थं) ग्रहीष्यामि। ततस्तु सर्वैर्मुनिभिर्गाथाः कण्ठस्थाः कृताः। गताः सर्वेऽपि पूज्यपादानां समीपे, प्रोक्तं चाऽऽहारयन्तु गुरुवरा! इदम्। पूज्यपादाः स्वहस्ते गृहीत्वौषधवज्जलेन सार्धं तं खाद्यपदार्थं चोकलेटं यथा गलितवन्तः पूज्यपादास्तस्य स्वादमपि जिह्वया न ज्ञातवन्तः। ईदृशी दृष्टा तेषामनासक्तता। यन्न सादृश्यतामाप्नोति कोऽपि।

* अमृतानुवादः *

मिष्टभुक्तिमिषाद्बालान् प्रेर्यगाथा कृते गुरो!।
गालितागलितं मिष्टं चित्रं प्रेम प्रतारकः[1]।।

– पू.आ.श्री रामचन्द्रसूरिसमुदायः

१) प्रतारणाकारकः, चित्रमिति प्रेम्णा यः प्रतारयति इति प्रेमप्रतारकः, अथवा प्रेम इति संबोधनं त्वं प्रतारकः– प्रकर्षेण तारकः– यथा गाथाः पाठिताः, मिष्टं भुक्तं, न चास्वादितं इति चित्रम्

## ।। चिन्तनम् ।।

## मुनिव्रतं नवधा मधुरम्

# चारित्रं प्रति नवधाभक्तिः

– श्रेयःपाथेयः

चारित्रं चित्तनैर्मल्यं विदधाति। चारित्रं मनःप्रसत्तिं वितरति। चारित्रं मनःसमाधानं विदधाति। चारित्रं मनःसौख्यं सृजति। जगति चारित्रं विना न प्रकृष्टं तत्वम्, चारित्रं हि मुक्तिपदं दत्ते। न चारित्रसमं किमपि सर्वार्थसाधकतमम्।

चारित्रप्राप्त्यर्थं भव्यजनेन सर्वशक्त्या प्रयत्नातिशयः कार्यः,धृतमाप्यते दधिमथनायासेनैव तथा हि विनायासेन न लभते जनश्चारित्रसम्पत्तिं।

इदं चारित्रं पूज्यपादानां जीवने सहसैव नवधा विकसितम्। तेषां जीवनं हि चारित्ररूपं सञ्जातम्। तेषां जीवने नवविधं चारित्रं अस्ति तत्–चारित्रं प्रति नवधाभक्तिं। प्रकटयामि यथा–

''श्रवणं, कीर्तनं, स्मरणं, अर्चनं, पादसेवनं, वन्दनं, सख्यभावः, दास्यभावः, आत्मनिवेदनम्।'' यदुक्तं–

**''श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।**
**अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्।।१।।**

तथैवात्र सर्वमेतत्

तेषां जीवने कथं घटामञ्चतीति तत् सर्वं निरूपयामि।

**१) श्रवणम्**= पूज्यपादास्तु निरन्तरं चारित्रस्य महिमा– प्रभाव–रहस्यानां श्रवणे समुत्कण्ठिता आसन्। अतश्चारित्रं प्रति श्रवणभक्तिस्तेषु प्रतिष्ठामाप्ता।

**२) कीर्तनम्** = तेषां जीवने सदैव चारित्रमेव मुक्तकण्ठ मुत्कीर्त्यते। यथा प्रियतमा स्वप्रियतमस्य मुक्तमनसा गुणगानं करोति। तन्नामपठने परमानन्दं प्राप्नोति, तद्वत् पूज्यपादा अपि चारित्रं चारित्रगुणकीर्तनं प्रति च परमप्रमोदस्य परां काष्ठामासादयन्ति।

**३) स्मरणम्** = अनवरतं स्मर्यते यत् तत् स्मरणम्। पूज्यपादाः जिनवचनं सदैवादृत्य चारित्रमेव स्मरन्ति, क्षणमपि जिनोक्त–चारित्रं न विस्मरति, तेन हि ते परमं तोषमनुभवन्ति तदेव तेषां जीवनशम्बलमासीत्, यथा प्रेयसी कान्तस्मरणं विना न किमपि जानाति, तद्वत् पूज्यपादास्तु चारित्रस्मरणं विना न किमपि जानन्ति।



**४) अर्चनम्** = अर्चनं समर्पणभावेन पूजम्। चारित्रपूजनं ते नित्यं प्रतिपलं प्रतिक्षणं च प्रकुर्वन्ति। तेषां चारित्रं प्रति किमप्यनर्पितं न। तदर्थं सर्वमेवार्पितमस्ति। यथा बालानां कृते स्वजननीं प्रत्यनिवर्चनीयं किमपि न विद्यते तद्वत् तेषां

---

– पू.आ.श्री रामचन्द्रसूरिसमुदायः

चारित्रस्य पूजनात् किमप्यधिकं न, तेषां मनो-वचन-कायादिकं सर्वं चारित्रे एव समर्पितं, तदेव तेषां व्रतामर्चनम्।

**५) पादसेवनम्** = चरणस्य शुद्धिकरणं, पूज्यपादानां जीवने यदा मुक्तिं प्रति पादायमाने चरण-करणसप्ततिकाम चारित्रे ये काचित् स्खलना भवति, तदैव तस्य शुद्धिं कुर्वन्ति, निशङ्कतया निर्दम्भतया च, यदि नाप्यशुद्धिः कदाचिज्जाता तदापि तस्य पुनः पुनः धोवन-प्रक्षालनस्वरूपं सेवनं कुर्वन्त्येव। तेनैव च तेषां चारित्रभक्तिः प्रकटिता।

**६) वन्दनम्** = निर्मायं निःशङ्कं चारित्रं चारित्रधरं च प्रति वन्दनं = शिरोनमनम्। तत्तु पूज्यपादानां जीवने सदैव विद्यमानं वरीवर्त्तते। यतस्तेषां साधुमात्रं प्रति प्रभूततरं बहुमानमभवत्। पुनश्च ताँस्ते सदैव तान् वन्दनीयभावेनैव पश्यन्ति।

**७) सख्यभावः**= मित्रभावः। तेषां पूज्यपादानां चारित्रेण सार्धमाचरणं मित्रमिवासीदेव। तेषां प्रकृष्टतरं मित्रं चारित्रमेवासीत्तराम्, चारित्रे सदैव सख्यं, तेषां तु सौख्यावहं सत्यं, ते प्राणान् त्यजन्ति, किन्तु न कदापि चारित्रम्। तत्तु चलने, विचरणे, चङ्क्रमणे, वदने, दर्शने, भोजने, प्रवचने, पठने, पाठने, जपने, स्वपने, उपवेशने, चिन्तने, मनने, मन्थने सर्वत्र तैः सार्धं तेषां सहचरमासीत्। तेषामीत्थं सख्यभावश्चारित्रेण सार्धं सदैव स्तुत्यम्।

**८) दास्यभावः** = दास्यं = दासस्य कृत्यं दास्यं तद् भावः स्वभावः इति दास्यभावः। चारित्रं प्रति चारित्रसम्राजो दासत्वं तेषां शिरोमणीयते। अर्थाद् चारित्रार्थं यत् किमपि कर्तव्यमस्ति तत् सर्वं तैः क्रियते। तत्र न कापि शङ्का करणीया। अतो दास्यभावः सुस्पष्टः। चारित्रार्थं ते स्वदेहमपि न गणयन्ति। न च सुखमपि। ततः सर्वं चारित्रार्थमेव तेषामिति दास्यभावः सुनिश्चितः।

**९) आत्मनिवेदनम्** = चारित्रं प्रति सर्वथा स्वात्मनः प्रकाशनं तदेवात्मनिवेदनम्। न ते स्वसामर्थ्यं परिणामादिकं च निगूहन्ति। यद् यद् यथाभूतं स्वसामर्थ्यं परिणामादिकं तद् तत् सर्वं तथाभूतं ते निर्मापयन्ति, दृष्टव्यं भवति तदेव। वक्तव्यं भवति तदेव। कर्तव्यं भवति तदेव। चिन्तनीयं भवति तदेवेति। तेषां सरलतयात्मनिवेदनं घटामञ्चति। इत्येवं पूज्यपादानां प्रेमसूरीश्वराणां जीवने चरित्रं प्रति नवधा भक्तिः प्रबलतरचेतोध्यवसायो मनोमन्दिर-मण्डनमासीत्, तत्र काचिदपि शङ्का न कर्तव्या।

* अमृतानुवादः *

व्रतं यस्य सुधाकुण्डं सुधास्रवः सदाऽऽयत[1]!।
नवधा नवधाम[2]! त्वं प्रेमाऽनागो[3] गुरु जय।।

---

१) आ समन्ताद् यतो यतनाशीलः इति आयतः, तत्सम्बोधनम्।

२) 'नवनं नवः, स्तुतियोग्यं धाम यस्य स नवधामा तत्सम्बोधनम् नवधाम।

३) न विद्यते आगः पापं यस्य सः अनागाः, तत्सम्बोधनम् अनागः,



## जैनं जयति शासनम्

# ।। मोदनमनुमोदनम् ।।

– श्रेयःपथः

जैनशासनं प्रकृष्टं धर्मशासनम्।

तद्विषये न कस्यापि सुधियो विरोधसंभावना। यत इदं धर्मशासनं जिनेन सर्वज्ञेन सर्वदर्शिना संस्था-पितं ततो न तत्र काचिदपि स्खलनावकाशः प्राप्यते। 'यदि स्खलना भवेत्, तर्हि नेदं सर्वज्ञशासनम्' इत्यत्र अविनाभावसहचरसम्बन्धो विद्यते। एतादृशं धर्मशासनमासेवमानाः सर्वेऽपि प्रकृष्टगुणग्रामेण संपूजिता भवन्ति। अस्य धर्मशासनस्य जिनोक्ताराधनतया पूज्यवर्यश्रीप्रेमसूरीश्वरै र्या गुणेषून्नतता संप्राप्ता, कतिपयास्तस्या लघुप्रसङ्गा अत्र प्रकटीक्रियन्ते।

१) परमाराध्यपादाः सदैव संयमराधनायां सुरक्ता अभवन्। तथापि छद्मस्थानां संयमराधनायां काचिदपि स्खलना भवितुमर्हति। तत्र तु तेषां मुनिपुङ्गवानां मनसाऽपि यदि काचित् स्खलना भवेत्, सा च स्वेन ज्ञायते, तर्हि झटिति तस्या स्खलनायाः प्रायश्चित्तकरणार्थं स्वगुरोः समीपं गच्छन्ति स्म। बालवच्च यथा वृत्तं तथा जल्पति गुरुदत्तं च प्रायश्चित्तं कुर्वन्ति स्म।

यदा तु स्वगुरूणां कालधर्मः सञ्जातस्तदाऽपि परसमुदायस्यासांभोगिकाः सूरिचक्रचक्रवर्त्तिनः पूज्याचार्यप्रवरश्रीनेमिसूरीश्वराणां शिष्याचार्यप्रवराणां श्रीमदुदयसूरीश्वराणां समीपमालोचनां कुर्वन्ति स्म, यदा तु तस्याऽपि जातोऽनवकाशस्तदा स्वशिष्यप्रशिष्याणां गीतार्थानां पार्श्वेऽप्यालोचनां गृह्णन्ति स्म। किन्तु न कदापि विना पापशुद्धिं स्थितास्ते।



इति तेषां स्वात्मशुद्धिकरणसद्गुणस्य पराकाष्ठा।

२) दुष्कृतालोचनाकरणं प्रति भवभीरुता एव कारणम्। न तां विना कस्यापि मनः संयमापगाशुद्ध्यै निमज्जति संयमस्वीकारमनोरथोऽपि न भवति। संयमस्य तु का वार्ता?

अन्यदा ग्रन्थस्वाध्यायधीनतल्लीनमनसः पूज्यप्रेमसूरीश्वराः स्वीयं च मुनिचन्द्रशेखरविजयनामानं शिष्यमाकार्य कथितं

– पू.आ.श्री रामचन्द्रसूरिसमुदायः

यत्-श्रुणु। भो ! मुने ! महानिशीथग्रन्थे लिखितं यन्मयाऽधुनैव पठितं ''स्वशिष्या यावन्ति पापानि कुर्वन्ति, तेभ्यश्च चतुर्गुणपापानि गुरूणां लगन्ति पुनश्च चतुर्थमहाव्रते यानि पापानि शिष्याः कुर्वन्ति, तेभ्यः षोडशगुणानि पापानि गुरूणां लगन्ति। इत्येवं भाषमाणास्ते सपश्चातापं साश्रुलोचनाः सुदुःखिनः सञ्जाताः। आत्मगुणदोष-चिन्तासागरे निमज्जमानाः शून्यमनस्का गम्भीरतामादधानाः सञ्जाताः।

क्षणान्तरं पुनः-भों! मम शिष्या बहवः सन्ति। ते कुत्राऽपि किं किं कुर्वन्ति तन्नाऽहं जानामि।

यदि ते पापं कुर्वन्ति कारयन्ति च तदा सर्वं पापं मां लगिष्यति। ततो नूनमहं संसारे पुनः पुनरटिष्यामि। न जानेऽहं मम किं भविष्यति। तेषां पूज्यपादानां हृदये इति प्रकृष्टं दुःखं सञ्जातम्। किन्तु दशवैकालिकग्रन्थेऽपि लिखितं विद्यते यो गुरुः शिष्यस्य यद्यात्मचिन्तां न करोति। तदा तस्य तत् पापं लगतीति। यदि शिष्यस्यात्मगुणदोषचिन्तां करोति, तदा पापं न लगति।-

अत एव, पूज्यपादाः स्वयं स्वशिष्यान् प्रति सततं चिन्तायुक्तचित्तमादधाना भवन्ति स्म। ततो न तेषां किञ्चिदपि दोषप्राप्तेः संभवः। **।। धन्या स्वजागरुकता धन्या स्वचिन्ता।।**

३) स्वक्षतिमपि पूज्यपादा यदि जानन्ति, तदैव तस्याः क्षमापनां कुर्वन्ति, लघुतागुणावलम्बनेन स्वदोषस्वीकारेण स्वभावतया च। यथाकम्मपयडिग्रन्थे काऽपि क्षतिः ग्रन्थप्रकाशनतो बहुवर्षानन्तरं पूज्यपादैर्ज्ञाता, यद्यपि सा क्षतिः प्रकाशितेषु पुस्तकेष्वासीत्, तथाऽपि तैर्विशिष्टप्रवचनकारिप्रमुखबहुजनव्यापृतसभायामुद्घोषणां कृत्वा समाचारपत्रके लिखित्वा च क्षमायाचना कृता।-

**।। धन्यः परिणतिपरिपाकः।।**

४) अनुमोदनमपि तेषां लोकोत्तरम्। तैः कस्मिंश्चिदपि जीवे यद्यत् सुन्दरं दृष्टं, तस्य तस्यानुमोदनं ते कुर्वन्त्येव। तत्तु तेषां जीवने आर्जवगुणातिशयेन सुलभतरमासीत्।

यथाऽन्यदा स्वशिष्यमुनिचन्द्रशेखरविजयस्य सुष्ठुतरं गणधरवादादिस्वरूपं प्रवचनं श्रुत्वा सर्वान् स्वमुनिपुङ्गवान्, तस्य



श्रवणे तत्पुस्तकपठने च पुनः पुनः प्रेरयन्ति स्म। इत्येवं परगुणाह्लादकता तेषां जीवपद्मस्य गुणसौरभं पदे पदे प्रसारयति।

● शासनप्रभावक पूज्यपादाचार्य प्रवरश्रीमद्विजय रामचन्द्र-सूरीश्वराणां अप्रतिमशास्त्रसिद्धान्तसापेक्षमार्गस्थप्रवचनदातृत्वात् स्वप्रथमशिष्यस्य तादृशसामर्थ्यं ज्ञात्वा तैः कथितं यत् ''विजय रामचन्द्रसूरीश्वराणां प्रत्येकप्रवचनपुस्तकानि संस्कृतभाषायां रूपान्तरं कृत्वा ग्रन्थरूपतया कर्तव्यानि। पुनश्च ते संस्कृतग्रन्था ग्रन्थालये सर्वत्र स्थापनीयाः। यतस्ते कालान्तरे शास्त्रग्रन्थतुल्या भविष्यन्ति। इति तेषां गुणदर्शिता गुणानुमोदना पुनः पुनो गुणप्रशंसा सदैव दृश्या भवतीति। **।। धन्या परगुणप्रशंसा ।।**

५) अन्यदैकवृद्धमुनिवरस्य ग्लानावस्थायां सेवार्थमेको महात्मा पूज्यैः स्थापितः। स्वयं तु परिवारेण सह तस्मिन्नैव नगरेऽन्यत्र विहृतवान्। अथ ग्लानावस्थायां स महात्मा समाधिपूर्वकं कालधर्ममाप्तः। तज्ज्ञात्वा पूज्यपादास्तत्र गताः। तत्र च यावता तस्य महात्मनः पश्चाद्विधिः






प्रवर्तमानासीत्। तावता तत्र सेवार्थं पूर्वमायातो मुनिवरः पूज्यपादैः साश्रुको दृष्टः। कथितं पूज्यपादै र्भो! रोदनं न कर्तव्यम्। साधूनां न कल्पते साधुमरणोत्तरकाले रोदनम्। ममताबद्धमानसं साधुभिर्न कर्तव्यम्। क्षणार्धेनैव स मुनि र्ममतामुक्तः प्रशान्तः सञ्जातः। ज्ञातं च स्वस्थानादिकं तेन महामुनिना। इत्येवमाश्रितजनवत्सलता, संसारनिर्गुणता, निरीहता, साध्वादिजीवनकर्तव्यज्ञापनादयो गुणाः प्रतिपदमस्माभिर्दृश्यते। **।।धन्याश्रितवत्सलता।।**

६) पठनपाठनविषये रसिकताऽपि न तादृशी प्रायः कुत्रापि दृश्यमानाऽभवत्। दिवसे तु तेषां स्वाध्यायस्य करणं कारणं च सुनिश्चितम्। किन्तु प्रतिदिनं मध्यरात्रावपि निद्रां त्यक्त्वा, साधुं विनिद्रं कुर्वन्ति। स्वाध्यायं च कर्मग्रन्थविषयं कारयन्ति। यदि स स्वपिति तदा जलेन तच्चक्षुषी विनिद्रे कुर्वन्ति। पुनश्च स्वाध्यायं पदार्थज्ञानं स्वयं प्राप्नुवन्ति शिष्याँश्च प्रापयन्ति। इति पठनपाठनविषया ईदृशी समीहा। **।। धन्या स्वाध्याये समीहा।।**

७) 'शिष्याः स्वधियमनुसारं पठन्तु' तदर्थं स्वमेव तपोनियमेन निबद्धं कुर्वन्ति। तमपि नियमं ते

झटिति कुर्वन्ति। शिष्यान् पठनावसरे प्रमादलेशावकाशमपि न दापयन्ति। यथा-अमुकेन कालेन त्वं यदिदं सूत्रं पूर्णं करिष्यसि। तदैवाहमिदमिदमुपभोगं करिष्यामि, नान्यथा।

तत एव च तेषां शिष्याचार्यप्रवरैः श्री हेमचन्द्रसूरीश्वरैः कर्मप्रकृतिग्रन्थाभ्यासः कृतः। पुनश्च तत एव तैः पूज्यपादैर्धुरन्धरविजयैः शताष्टकश्लोकानां रचनैकदिनमात्रेण कारिता।

एवं ते पठनपाठनविषयेऽपि सदैव पुरुषार्थवन्त आसन्। **।। धन्या पठन-पाठनप्रियता।।**

८) अन्यदा पूज्यपादमुनिश्रीपद्मविजयानां केन्सरव्याधिः पराकाष्ठां प्राप्ताः यदा प्रभूततरा पीडा समजायत तदा सर्वेऽपि महात्मानः समागच्छन्ति। पूज्यपादा अपि समागच्छन्ति। अन्यदा तु सर्वेऽपि समागताः। किन्तु एको मुनिवरः स्वाध्यायमग्नतया न समागतः, तदा पूज्यपादैः तं सौम्यतया सुधावदुपालम्भवचनेन प्रोक्तः- ''वत्स! केवलं स्वाध्यायः कल्याणं न करिष्यति। एवं तु संयमधरस्योपेक्षा संयमिनं संयमभ्रष्टं करिष्यति। इत्येवं ग्लानसेवादिकार्येऽपि दक्षता न तादृशी कुत्राऽपि दृश्यते इति। **।। धन्या वैयावृत्यकारिता।।**






* अमृतानुवादः *

व्रते रत्यादयः सूरि-प्रेम गुरो! गुणास्तवः।
घनाऽघनिधने हेति-ततिवद् दृश्यतेऽधुना।।



# भवतु मम
# प्रेमगुरोः
# शरणम्।



## आत्मैश्वर्यप्राप्त्युपायः

# ॥ प्रेमप्रबन्धः ॥

– श्रेयस्करः

### (एकविंशतिगुणवर्णनम्)

पूज्यपादाः प्रेमसूरीश्वरा गुणरत्नै रत्नाकरमप्यधरीकुर्वन्ति तत्र कारणं ते जिनं प्रति जिनाज्ञां प्रति च सदा समादरवन्तः समासन्। तेषां सर्वाणि गुणरत्नानि महार्ध्याणि सन्ति। तेभ्यः कानिचिद् गुणरत्नानि ते एव गृह्णन्ति ये तस्य गुणरत्नसागरतलं प्राप्नुवन्ति। सामर्थ्यवन्त एव तस्य पारङ्गता भवन्ति। तेषां गुणरत्नसमुद्राणामवगाहनं सुदुर्लभमस्ति। तथाऽपि मयाल्पमेधसा मन्दमनसा एकविंशतिर्गुणराशिराप्ता भवन्ति सुज्ञाता। सुज्ञाः! श्रुणुत स्वस्थमनसा तथाहि–

**१) तत्राद्यः गुणः-** समर्पितता, समर्पणं सर्वगुणबीजभूतमास्ति। रोहणाचलवद् समर्पणं गुणरत्नानि प्रादुष्करोति। यदि समर्पणगुणस्याप्तिर्भवेत् तर्हि नूनमन्यगुणसंप्राप्तिर्भवेदेव। यदि समर्पणं न हि तर्ह्यन्यगुणाः गुणाभासा एव, समर्पणेन तु देव-गुरु-धर्मान् प्रति समर्पितता भवति। सा समर्पितता प्रेमगुरुवरेष्वाबाल्याद् दृश्यते। तेनैव तैः सर्वत्र सिद्धिः सम्प्राप्ता। तया च संयमधर्मस्य

– पू.आ.श्री रामचन्द्रसूरिसमुदायः

साफल्यं प्राप्तम्। चारित्रस्य निष्कलङ्कितता प्राप्ता। ततः समर्पणस्तेषामलौकिकगुण आसीत्।

**२) द्वितीयो गुणः-सरलताः-** समर्पणगुणभावितात्मा सदैव वक्रताविरहितो भवति। यदि च वक्रता निर्मूला भवेत् तर्हि सरलतागुणाप्तिः सहजा भवति। सरलतालता हि पूज्यपादप्रेमसूरी-श्वरजीवनं महावृक्षं समुपवेष्टिता, सरलतायां समागतायां कदाग्रहराहुश्चारित्रचन्द्रमसं न ग्रसते। ते पूज्या बालानामपि वार्तां सरसतया श्रुण्वन्ति। स्वचिन्तितमेव कर्तव्यमित्यवष्टंभरहितता सहसैव प्रकटयन्ति। इत्येवं सरलतापि तेषां सर्वेषामाकर्षयति।

**३) नम्रताः-** नम्रता-कोमलता-वत्सलता-लतावितानैस्तेषां जीवनारामोऽतीव रमणीय-तरोऽभवत् करुणामयस्वभावेन सर्वैः सार्धं सर्वेषु कायेषु सुष्ठुतया प्रवर्तनम् भवति। स गुणः गुरु-शिष्य-सहवर्तिसाधुजन-गृहस्थवर्गादीनां प्रति स्वस्वस्थानानुरुपेण नम्रभावानु-सेवनात् सफ-लतामञ्चति। गुणोऽयं गुरुवरे सौहार्दभावेन सर्वदा सर्वथा समुचिततया स्पष्टं दृष्टः।

**४) निर्विकारिताः-** पूज्यपादाः निर्विकारितालतायै प्रबलपादपायन्ते रोहणाचलोरत्न-खानिः, पूज्यपादाःक्षमाखानिः दिनकरस्तेजसां कारकः, ज्ञानकिरणकरकाः, सागरो जलानां निधिः, पूज्या संयमगुणरत्नानांनिधयः आसन्, न सागरे मर्यादाभङ्गस्तथा पूज्येषु क्षमाभङ्गः, न मेरौ सवौन्नतिगर्वस्तथा पूज्यपादेषु न मानौन्नत्यगर्वः, मानस-सरोवरवारिणि रजः कलङ्को न विद्यते तथा पूज्यानां मनोमानसे रागकलङ्को न दृश्यते नामरलतायां विषविकारस्तथा पूज्य-पादस्य समाधिसुधालतायाः द्वेषविषविकारलेशोपि नैव, ततस्तेषु सर्वविकाराणां निवृत्तिरभवत्। ततस्तेषु निर्विकारिता सहजेन स्वात्मसात् समभूत्। विकृति र्विगतिनयनमार्गो भगवद्भिः समुपदिष्टः, ततः पूज्यपादेषु निर्विकारिता प्रकृष्टासीत्।

**५) निर्दम्भताः-** दम्भो माया कपटं-तेनविरहितं सर्वहितं पूज्यपादानां चित्तं समाहितमासीत् यथाग्निना सुवर्णस्य स्वर्णत्वं, तद्वत् सौजन्य-नम्रत्वादिगुणाः सर्वे निर्दम्भतागुणेन प्रकटा भवन्ति। पूज्यपादा माया-कपटाटि दोषप्रपञ्चे विरहिता आसन्।

**६) त्यागवृत्तिः-** पूज्यपादानां जीवने त्यागवृत्तिः सर्वत्र सहसैव समभवत्, तेनैव च तेषु निर्व्याजवैराग्यमासीत्। प्रतिपदं तेषां जीवने त्यागवृत्ति र्निर्वृतिपद्धतिं प्रदर्शयति। तेषां जीवने सर्वत्र सर्वथा त्यागत्वे दृश्यते। सर्वत्र सर्वदा सर्वथा त्यागवृत्तिरेव राजते।

यथा एकासनप्रत्याख्याने सदैव पञ्चद्रव्यं विना नान्यद् द्रव्यं ग्रहीतव्यमिति दृढतरं संकल्पितं तैः। मिष्टस्वादुभोजनस्य त्यागः, परुषान्नस्य (फरसाणस्य इतिभाषायां) त्यागः। भोजन-वस्त्र-पात्रादिषु सर्वव्यवहारेषु सर्वत्र त्यागभावो हि तेषां जीवने प्रधानतरः। सामान्यतो मुनिजीवने त्यागधर्मो हि प्रधानभूतः।

अन्यदा तु गोचरीचर्यायां महात्मभि र्न किमपि प्राप्तम्। प्रभूतप्रयासेन दाल-मोदके द्वे द्रव्ये प्राप्ते मिष्टभोजनं तु न कदाप्याहारयन्ति पूज्यपादास्ततो मात्रदालं पीत्वैकासनव्रतं कृतम्। बहुधा स्वशिष्यादिभि र्विज्ञप्ताः पूज्यपादास्तथापि स्वनियमान्नचलिताः।

**७) ब्रह्मव्रतधारिताः-** यद् व्रतं जगति दीपकतुल्यं, तत्तु पूज्यपादानां जीवनप्रदीपे जागरुकता वर्त्तिका सत्वभावघृतेन प्रौढकाशं प्राप्ता सर्वत्र ब्रह्मव्रतज्योतिः प्रसारयति, यदुच्यते

यत् तेषां समग्रजीवने ब्रह्मव्रते मनसापि न काचिदपि स्खलना जाता। अद्यापि शुद्ध-चारित्रसम्पन्नानां तेषां नामग्रहणेनैव मनसः संयमाद् बहिर्भूतो जनोऽपि संयमे सुस्थिरो भवति।

अद्यापि तन्नाममात्रग्रहणे कार्याणां संसिद्धिर्भवत्यैव, सा तु स्पष्टतया सानुभूता। इति महात्मभि र्गीयते।

चारित्रधर्मस्य प्रभाव एवेदृशः। इत्येवं तच्चारित्रधर्मप्रभावोऽस्मज्जीवने संभवेत्, येनास्मज्जीवनं चारित्रसम्पन्नतां दृढयति इति समीहामहे।

**८) नियमितता:-** ब्रह्मव्रतधारकः सदैव पञ्चेन्द्रियजीवानामनुपालको भवति। यथा न्यायोपेतो राजा सर्वेषां प्रियो भवति। न कदापि स विषयेष्वनुरागी भवति। न च तस्य विषयैः पराभवो भवति। तथा ब्रह्मव्रतधारकाः पूज्याः प्रेमसूरीश्वराः विजितविषयभावाः सहसैव व्रतपालनपरायणतया नियमिततामनुसरन्ति। निगृहीतनागा इव विषया निगृहीता भवन्ति, तदैव मनः स्थिरतामादधाति। ततो येनकेन प्रकारेण मनः संयमशुद्धिशृङ्खलानिगडितं विधेयम्, ततश्च नियमितता संभवति। पूज्यपादानां जीवने आहारे विहारे निहारे वसतौ सर्वत्र नियमिता आसन्, नियमिततावृत्त्या संरक्षितमेव संयमधनं सर्वदा सर्वोपकारकारणं भवति।

तेनैव च तान् आन्तर्गदा अपि न परिभवन्ति। बाह्यानां तु का कथा? तेनैव ते सदैव नवं नवं गुणं पोषयन्ति। स्वात्मस्वभावं चालङ्कुर्वन्ति।



**९) सहिष्णुता:-** पूज्यपादेषु सहिष्णुतापि सर्वंसहावदभवत्। यतो भयङ्करभीष्मग्रीष्मकालेऽपि पूज्यपादा गजगत्या राजमार्गे गच्छन्ति, न च तैः सार्धं चलितुं कोऽपि समर्थो भवित। यः सार्धं बहिर्भूमौ गच्छति, सोऽपि दूरमग्रे गत्वा योग्यछायायामुपतिष्ठति। पूज्यपादाः शनैः शनैर्गज-गतिगत्या समागच्छन्ति, तदनन्तरं पुनरग्रे गच्छति स, किन्तु न तैः सार्धं शनैः शनै र्विहरणे समर्थो भवति। न च कदापि पूज्यपादाः पादयोः क्षौमवस्त्रनिर्मितमपि पादत्राणं गृहणन्ति स्म। ततः सहिष्णुता सर्वंसहावदवर्णनीयासीत्।

**१०) दृढता:-** पूज्यपादेषु दृढतागुणोप्यचलवन्निश्चल आसीत्। तेनैव च ते निर्दोषं संयमजीवनं जीवितुं सफलता-मासादिताः। एकान्यसमुदायवर्त्तिसूरीश्वरैः प्रोक्तं यत् ''प्रेमसूरीश्वरै र्निर्दोषं जीवनं धृतं तस्यैव प्रभावेण तेषां मरणावस्थायां साधुभगवन्तः सेवाकर्तुं समुद्यन्तवन्तो दृश्यन्ते। यतो न चास्माकं साधवः सेवन्ते किन्तु कर्मकरा गृहस्थाः श्रावका वा सेवन्ते, तत्र कारणमिदमेव भासते। ततोस्माभिरपि निर्दोषचर्यायामेव प्रयत्नातिशयः कर्तव्य

इति। निर्दोषचर्या तु दृढतानुयायिनी। ततो जिनवचनमनुसृत्य मनो दृढं विधाय निर्दोषचर्यायां प्रयत्नं कुरुत सर्वेऽपि इति शुभेच्छा।

**११) स्वाध्यायरसिकता:-** येन स्वस्य अध्याय: चिन्तनं भवति स स्वाध्याय:। तेषां पूज्यपादानां विना स्वाध्यायं न क्षणमपि न व्येति। रात्रावपि द्वि-त्रि वादने ते पूज्यपादा: स्वाध्यायं कुर्वन्ति। मात्र स्वयं न कुर्वन्ति किन्तु शिष्यानपि कारयन्ति। कर्मप्रकृतिग्रन्थ: प्राकृतभाषायां यै: पूज्यपादै: स्वयं पठित्वाऽन्यान् पाठयित्वा नैकशास्त्र-सर्जनं स्वयं कृत्वा समर्थै: स्वशिष्यप्रशिष्यादिभि: वृत्तिग्रन्थादि कारितम्। पुनश्च तत् शोधनं स्वयमेव कुर्वन्ति। यदि संशोधनाय पत्राणि संपूर्णानि भवन्ति तदा ते कथयन्ति स्वशिष्यादीन् मम भोजनं पूर्णीभूतं। नवीनं भोजनं ददतु। इति कृत्वा पूज्यपादा: पुन: पुन ग्रन्थादिरचनादिषु मुनीन् त्वरयन्ति।

**१२) निर्मलता:-** निर्गत: मल: यस्मात् स निर्मल:, तस्य भाव: निर्मलता। निर्मलभाव: शुद्धभाव: दोषाभाव: इत्यनर्थान्तरम्, अशुद्धपरिणामस्वरूपकचवराभाव: निर्मलता। यथा कतकचूर्णप्रभावेण जलस्थमलमधो गच्छति तद्वत् पूज्यपादानां जीवने भगवत्संयमराग-रूपकतकचूर्णप्रभावेण जीवने चित्तेऽशुद्धिर्गतैव।

तेषां पूज्यपादानां जीवने न काश्चिद् दृश्यन्तेऽशुद्धय:। भगवद्वचनकतकचूर्णं स्वात्मनि समायातमत: सर्वाऽप्यशुद्धयो दूरं गता।

**१३) निर्मोहता:-** निर्गत: मोह: यस्मात् स निर्मोह: निर्मोहस्य भाव निर्मोहता, ममता मोहरूपा तस्य अभाव:, न शिष्येषु, न गृहेषु, न उपधिषु, न स्वीयेषु, न परेषु सर्वत्र निर्मोहता, चेतोवृत्ति: प्रतिबन्धाभाव:।



अन्येषां किं वार्ता? तेषां तु स्वशरीरेऽपि न ममत्वभाव:। तत एव तेषु न कदाप्ययं मम इति भाव:। तत्तु बहुप्रकारतया तेषां जीवनपर्यालोचनेन स्पष्टतया दृश्यते। ततो निर्मोहस्वभावा: पूज्यपादा गुणसद्भावेनाद्यापि विद्यमाना: सन्ति।

**१४) निपुणता:-** निपुणता दक्षता इत्यैकार्थकानि पदानि कुशलता निपुणता- तु यद् ज्ञानमात्मनिरीक्षणपूर्वकं भवति। तेषां मति: तीक्ष्णा दर्भाग्रोपमा, अत एव तै: कर्मप्रकृतिग्रन्थ: स्वयं पठित:। स्वयं च संशोधित स्वयमेव च तस्य पुनर्मुद्रणं प्रकाशनं च कृतम्।

तेषां पदार्थबोधोऽपि प्रौढतर:। तत एव पूज्यपादा-चार्यप्रवररामचन्द्रसूरीश्वरैर्बहुभिश्चसूरिपुङ्गवै: पूज्यपादा-चार्यप्रवरप्रेमसूरीश्वराणां निश्रामधिकृत्य, काऽपि पदार्थ-

स्खलना न स्यादित्यागमवाचनादत्ता बहवश्चागमाः पठिताः। तत्र पदार्थबोधे प्रौढता प्रेमसूरीश्वराणां, संस्कृतभाषायां च प्रौढता रामचन्द्रसूरीश्वराणामासीत्।

**१५) निस्पृहता:-** निर्गता स्पृहा यस्मात् स निस्पृहः, तस्य भावः निस्पृहता। बृहत्तर समुदायसर्जनकार्यसमाकुलता तेषामासीत्, तथाऽपि न केषाञ्चित् पार्श्वे काऽपि स्पृहा। तत्तु महदाश्चर्यम् केषाञ्चिद् दुर्लभं कार्यं कृत्वाऽनन्तरं तेषां महापुरुषाणां न काचिदपि तस्मादपेक्षालेशोपि, न च तेषां शिष्यादीन् प्रति स्वभक्त्यादिरूपापेक्षा किन्तु संयममार्गे वृद्धिस्वरुपापेक्षास्ति, ततस्तेषां निस्पृहतागुणः सर्वोपरितारूपेण प्राप्तः।

**१६) अन्तर्मुखता:-** आत्माभिमुखा या दृष्टिः, सैव अन्तर्मुखता समुच्यते। बहिर्मुखतायास्तु त्यागः। यो बहिर्भावं पश्यति, तन्मनः बहिरेव धावति, यस्त्वात्मानं पश्यति तन्मनोऽन्तर्मुखतां दधाति। यथार्थप्रेमी धमार्जनमेव चिन्तयति, कामिजनो काममेव विचारयति, तद्वदन्तर्मुख-तागुणोऽपि पूज्यपादानां जीवनस्य प्रकृष्टां पराकाष्ठां दधाति। सूरिपदार्पणावसरे तेषामन्तर्मुखता प्रकटीभूता। यतो न ते सूरिपदं स्वीकर्तुमिच्छन्ति तेषां सूरिपदप्रदानार्थं तेषां गुरुवराचार्य-प्रवरश्रीमद्विजयदानसूरीश्वरैः प्रभूततरः परिश्रमः कृतस्तत्पश्चादेव तेषां पदप्रदानं सञ्जातम्। साधुधर्मे समता प्रधानभूता। यथा वृक्षेषु कल्पतरुः, सरसि मानसरोवरः, मन्त्रेषु नमस्कारः, पर्वसु पर्युषणापर्व, तत्वेषु देवतत्वं, तीर्थे शत्रुञ्जयः।

**१७) समता:-** यः समभावं प्राप्नोति स समगुणान्वितः 'समनाः' स साधुरीत्युच्यते। समता परिणामवान् साधुः सदैव संयमपरिणामे रमते। समता हि संयमे प्राणभूता, तेषां समता स्वात्मभूता जाता, तेनैव यदा केषाञ्चिदपि महात्मनः क्रोधः समायाति। तदा ते पूज्यपादा मृदुशब्देन वदन्ति- ''असौ क्रोधः 'कालीयो' (भाषायां) कुतः स्थानात् समागतः'' इति मृदुशब्देन सप्रेम प्रेमपादाः यावता जल्पन्ति तावतैव क्रोधस्तस्य शाम्यति स्म। तत्तु तेषां समतायाः प्रभावः। तेषां जीवनेऽनुकूलताप्रतिकूलतासु समभावः। मानापमानेषु समचित्तता। कमपि भक्तिमानमभक्तिमानं प्रति तुल्यभावः, स्वपरयोः प्रति समानप्रतिभावः। इत्येवं समभावप्राप्तानां पूज्यपादानां चरणे कोटिशो वन्दनम्।

**१८) गम्भीरता:-** तेषां पूज्यपादानां जीवने गाम्भीर्यगुणं संदृश्य मन्येऽहं समुद्रो मुद्रायाः बन्धनं स्वयमेव स्वीकरोति स्म, अन्यथा जनवसतौ तस्यावस्थानं कथंकारेण नाभवत्। तेषां जीवने प्रभूतगुणेष्वपि गाम्भीर्यगुणः प्रभूतगुणरत्नप्रजनने हेतुभूत आसीत्। गम्भीरतागुणरत्नेनैव प्रभूतगुणाः



प्राप्यन्ते, ततश्च तेषां दर्शनमपि तुच्छतात्यागेन गाम्भीर्याविर्भावेन परंपरया सुखप्रदं सञ्जातम्।

तत्र तेषां गाम्भीर्ये गुणगौरवशालिता वचोतिगास्ति इति शम्।



**१९) समयज्ञता:-** कदा किं कर्तव्यम्? कदा च किं न कर्तव्यम्? कस्यापि सार्धं केन प्रकारेण कार्यं कर्तव्यम्? केन प्रकारेण कार्यं च न कर्तव्यम्? तस्यातुलतरबोधप्रबोधस्य निकेतनम् पूज्यपादाः सन्ति। समयज्ञतयैव ते सर्वाणि कार्याणि सहसा सहजैव साधयन्ति। तेषां समयज्ञता न कस्यापि दृष्टिगोचरमागमत्। समयज्ञतयैव ते सर्वकार्यसिद्धिं साध्नुवन्तीति निःशङ्कं स्वीकरणीयम्।

**२०) आगमपारगामिता:-** आगमपारदर्शिता। सापि सर्वेषां सुज्ञातैव। तेनैव संयमस्य प्रारंभकाले कर्मप्रकृतिग्रन्थः प्रथमवारं प्राप्तः दृष्टः स्वयं च पठितः। अन्यान् पाठितश्च। यदि कर्मविषयकप्रकृष्टग्रन्थोऽपि स्वयं ते पठन्ति तदा ते आगमग्रन्थाः पठन्त्येव। तत्रागमपारगामिता भवेदेव न तत्राश्चर्यम्। तत् आगमपारगामिता तेषां सहसैव। न तत्र शङ्का कर्तव्या। तदागमपारगामितया ते धन्यवादार्हाः।

**२१) प्रसन्नता:-** संयमे तेषां चित्तप्रसत्तिः सदैवास्ति तत् तु न मोहजाता किन्तु, मिथ्यात्वमोहनीयकर्मक्षयोपशमजनितैव। सा हि कर्ममलापगमाद् भवति। अन्या तु कर्मोदयाद् भवति। तत एव तैः सार्धं स्थिता महात्मानो न कलहादिकं कुर्वन्ति। तेषां स्वाभाविकी प्रसन्नता तु चारित्रधर्मस्य फलश्रुति र्न तत्रान्यत् कारणम्। तेषां प्रसन्नतासभरवदनं विकसितकमलामलदलवदाभाति।

* इति एकविंशतितमगुणसन्दोहस्वरूपप्रेमप्रबन्धो मया प्रोक्तः। ततस्तु पूज्यपादैर्ययदात्मैश्वर्यं प्राप्तं, तद् वर्णयितुं नास्माकं क्षमता। तत्तु धरणीस्थेन जनेन सूर्यस्पर्शतुल्यम्। जलधिजलसङ्गणनतुल्यम्। अस्माभिस्तु तान् सर्वान् गुणानात्मसात् कृत्वा मोक्षप्राप्त्यर्थं च प्रयतितव्यमिति यतिनाम सार्थकं कर्तव्यम्।

* अमृतानुवादः *

सङ्ख्यातीता गुणा प्रेमगुरोर्गुणाम्बुधे र्बुधाः!
न सङ्ख्या[१] भवतां मातुमीष्टे शास्त्रविदां तकान्।।

१) चर्चा सङ्ख्या विचारणा-अभिचिन्ता० १३७३

# शुद्धम्...[1] सिद्धिप्रदम्... शुभावहम्[1]...

## तेणं कालेणं तेणं समएणं

– श्रेयःश्रीः

आसन् खम्भातनगरे पूज्यपादाः। प्रवर्त्तते स्म चातुर्मासः। आसीत् तत्तदा द्विसहस्रा-धिकत्रयोविंशतितमो वैक्रमीयोऽब्दः। पूज्यपादानां शरीरेऽस्वस्थता सञ्जाता। चिन्तितं च तैः स्वयम्। न मम शरीरस्वस्थता पूर्ववद् भासते। किं ममायुः झटिति पूर्णं भविष्यति? न जानेऽहं किं भविष्यतीति?। नाधुना ममायुःसुदीर्घकालं भविष्यति। ततो मयाप्यन्तिमसाधना स्वीकरणीया। एतच्चिन्तनेन तेषां पूज्यपादानां स्वप्रथमशिष्याः स्मरणपथं समागताः। ते दीक्षायुग-प्रव-र्तकजैनशासनप्रभावकमहाराष्ट्रदेशोद्धारकव्याख्यानवाचस्पत्यादिनैकविशेषणविशिष्टा आसन्। ते नैकशिष्यप्रशिष्यादिपरिकरपरिकरितास्तदा मुम्बापुर्यां विहरन्ति स्म। तत्रैव भूलेश्वरलालबाग-जैनसङ्घे पूनानगरगमनादिकं सर्वं सुनिश्चितं सञ्जातमासीत्। महतां विकल्पोद्भवोऽपि कार्यकरणक्षमतां विदधाति। तत एव पूज्यपादानां तच्चिन्तनेनान्तरमेव द्वि-त्रि-दिनान्ते मुम्बा-पुर्यात् समागतेन रमणभाईश्रोफसुश्रावकेण पूज्यपादेभ्यः कथितम्। गच्छाम्यहं मुम्बापुर्यां। यद्यस्ति किमपि मम प्रायोग्यं कार्य भगवतां? तर्हि ममाज्ञापयन्तु पूज्यपादाः! तच्छ्रुत्वा पूज्यपादैः कथितं न मम किमपि कार्यमस्ति, किन्तु रामचन्द्रसूरिभ्यो वक्तव्यं भवता ''यद् भवता बहूनां साधूनां समाधिर्दत्ता ममापि सा दातव्या, ततोऽत्र समागन्तव्यं ''तत् श्रुत्वा श्रावकेण कथितम्। भगवन्! पत्रं लिखित्वा मां ददातु। पूज्यपादैः प्रोक्तम्। न पत्रस्यावश्यकता। अनेनैव ते समागमिष्यन्ति। गतः स मुम्बापुर्यां, प्रातः प्रभुपूजाकरणस्य पश्चाद् गुरुवन्दनार्थं पौषधालये गतः। तदा सञ्जातः प्रवचनसमयः। सज्जीभूताः प्रवचनप्रभावकाः। स्वासनाच्चोत्थिताः तदैव पौषधालये प्रविसन् स श्रावको वदति स्म। खम्भातनगरं गत्वा प्रत्यागतोस्म्यहम्। तत् श्रुत्वैव साञ्जलि शिरोनमनपूर्वकं समुपविष्टाः प्रवचनप्रभावकाः। पृच्छन्ति च ते, संयमयात्रा सुखंसुखेन वर्तते नवा किं पूज्यपादानां तत्र? किमप्यस्ति तेषामाज्ञानिर्देशः? किं वा पत्रं दापितम्? एतश्च श्रुत्वा कथितं श्रावकेण।' सुखशातायां वर्तन्ते पूज्यपादाः। पुनश्च कथितं पूज्यपादैः ''भवद्भिः बहूनां समाधि र्दत्ता ममापि सा दातव्या। अतस्तदर्थं च भवद्भिः समागन्तव्यमिति।''

---

– पू.आ.श्री रामचन्द्रसूरिसमुदायः

१) शुद्धं उभयकुलपो शुद् योर्जन्त. - शुद्ध स्यात् २) शुभगुरुदत्तं व्रतं-शुद्धतया पालितं सिद्धिप्रदंस्यात्

३) समाधिमयश्चमृत्युः भाविनि शुभावहम् भवेत्- अमृतः।

तत् श्रुत्वा प्रवचनप्रभावकैर्मनसैव निर्णीतम्। गुरुचरणनिश्रा झटिति स्वीकरणीया। चातुर्मासार्वाक् मुम्बापुर्यां विचरणं, पूनानगरे गमनादिकं सर्वं यत् कार्यजातं सुनिश्चितमासीत्, तत् सर्वं निराकृत्य प्रवचनप्रभावकाः मुम्बापुरीतो विहृतवन्तः खम्भातं प्रति। क्रमानुसारेण विचरणेन खम्भातनगरनिकटवर्तिग्रामं संप्राप्ताः प्रवचनप्रभावकाः।

समागता वन्दनार्थं खम्भातनगरतः सुश्रावकाः। प्रवचनप्रभावकैर्निवारितैरपि खम्भात-श्रीसङ्घे कर्मसाहित्यनिष्णातपूज्यपादाचार्यप्रवरनिर्देशानुसारेण ''शासन-प्रभावकास्ते ततस्तेषां स्वागतं प्रवचनप्रभावनापूर्वकं कर्तव्यम्।'' श्री सङ्घैरायोजिता भव्यरथयात्रा चतुःपञ्चासदागम-संरचनासहिता। सञ्जाता च शासनप्रभावना। नैकग्रामनगरेभ्यः प्रभूताः सुश्रावका गुरुभक्ताश्च समागताः। मुम्बापुरीतः सपूर्णस्वतन्त्रट्रेनयानेन सुश्रावकाः गुरु-शिष्यमिलनमुद्दिश्य भक्ति-भृद्हृदयाः समागताः। राधनपुर-कर्णावती-सुरत-सुरेन्द्र-नगरादिभ्यो बहुग्रामनगरेभ्यः सुश्रावकाः समागता आसन्। गुरुशिष्यमिलनं च दृष्ट्वा सर्वेऽप्यानन्दिताः। संपूर्णखम्भातनगरं श्रीसङ्घेन सुशोभितं कारितम्। पूज्यपादप्रेमगुरुचरणयोरेव द्वादशावर्त्तवन्दनं कृतं शासनप्रभावकसूरिपुङ्गवैः। स्थिरता च तत्रैव कृता। अत्र तत्र सर्वत्र प्रहर्षः सञ्जातः। माङ्गलिकमपि सिद्धान्तमहो-दधिसूरीश्वरैः संपूर्णं न कृतम्। केवलं नमस्कार-मन्त्रमेव पठितः, तत् पश्चात् तु माङ्गलिकेऽपि पूज्यपादैः शासनप्रभावकाः सूचिताः। शासनप्रभावकैश्च माङ्गलिकं पूर्णं कृतं। अनेन च सूचितं भवति यदधुना सर्वं शासनधुरा त्वयैव निर्वहितव्या। तत्पश्चात् स्वशिष्यान् कथितं च पूज्यपादैः प्रभावकसूरिपुङ्गावानामासनं मम समीपं पाटोपरि हि स्थापितव्यम्। यदुत शासनप्रभावका नाद्यावधि गुरुनिश्रायां पाटोपरि समुपविशन्ति। अत्र च पूज्यपादैः स्वशिष्यान् निर्दिष्टं पाटोपर्यासनस्थापनार्थमिति।

अन्यदा तु शासनप्रभावकसूरिपुङ्गवेभ्यः कथितं सिद्धान्तमहोदधिपूज्यपादैः। वैक्रमीय २०२० तमेऽब्दे शासनहितार्थं यः पट्टकोऽस्माभिः कृतस्तत्र यो लाभोऽस्माभिः सङ्कल्पितः स तु न सञ्जातः, पश्चाद् भवता योग्यावसरे पुनः निर्णयं कृत्वा सन्मार्गस्य प्रवर्तनं कर्तव्यम्। तदा शासनप्रभावकैश्च कथितं यदधुनापि भगवतां नाम्नैव तत् कार्यं कर्तव्यम्? तदा तु पूज्यपादैः कथितमहं त्वधुना वृद्धावस्थां प्राप्तस्ततो न तत् कर्तुं क्षमः। ततस्त्वयैव कर्तव्यमवसरे। तदा शासनप्रभावकसूरिपुङ्गवैश्च स्वीकृतं गुरुवचनम्। प्रतिदिनं गुरुचरणपर्युपासनां ते कुर्वन्ति। स्वगुरुवर्रांश्च निर्यामणामपि कारयन्ति।

गुरुवराणां स्वास्थ्यं शनैः शनै रोगदोषदूषितं भवतीति ज्ञात्वा शासनप्रभावकसूरिपुङ्गवै निर्णीतं यन्नाधुना कुत्रापि गन्तव्यम्। मात्रैकगुरुस्वास्थस्यैव प्राधान्यं दातव्यमिति।

तत् पश्चात् वैशाखकृष्णदशमीदिने प्रतिदिनवद् शासनप्रभावकसूरिपुङ्गवा गुरुणा



सार्धं सायंकालीनं प्रतिक्रमणं कृत्वा स्वासने गताः। सूरिमन्त्राराधना च प्रारब्धा। तल्लीना जाताः। तन्मया जाताः। तदैवैको मुनिवरः प्रागतः।

झटिति समागच्छन्तु पूज्याः! पूज्यपादानां स्वास्थ्यं न किञ्चिदपि समीचीनमस्ति। भवद्भिस्तु तत्रभवतां समाराधनाकृते द्रुतमेव समागन्तव्यम्। शासनप्रभावकसूरिपुङ्वा झटित्येव तत उत्थिताः। गताश्च तत्र, यत्र पूज्यपादाः अस्वस्थशरीराः सन्ति। तत्र गत्वा च निर्णीतं शासनप्रभावकैर्यन्नाधुना मम गुरुवरस्यायुर्भविष्यतीति लगति। गुरोः कर्णे वदनं दत्वा प्रारब्धो नमस्कारमन्त्रः। तदा किञ्चित् समयानन्तरं तदवसरं शासनप्रभावक-सूरिपुङ्गववदननिर्गतनमस्कारावलि-श्रवणतल्लीनाः सिद्धान्तमहोनिधिपूज्यपादाः कालधर्मं गताः। निराधारो जातो गच्छः। शासनप्रभावकसूरिपुङ्गवाद्या अपि शून्यमनस्का जाताः।

**।। धन्यवादार्हो गुरुशिष्ययोरन्तिमो योगः।।**

* अमृतानुवादः *

जन्मशुद्धं व्रतं सिद्ध्यै समाधिश्च मृतौ वरः।
शुद्धा कुलं गुरुर्निर्यामकः प्रेमगुरोरहो।।



साम्प्रतम्

# ।। चारित्रचन्द्रोदयः ।।

– श्रेयोमतिः

सिद्धान्तमहोदधिपूज्यपादप्रेमसूरीश्वराणां समुदायस्य प्रभावः साम्प्रतं सर्वत्र प्रभूततरो दृश्यते। तस्य समुदायस्य संयमप्रेम जैनेन्द्रशासने जाज्वल्यतामाबिभर्ति। तस्य स्वाध्यायप्रेम प्रमाणातिकोऽस्ति। नैके महात्मानः प्रकरण–कर्मग्रन्थ–व्याकरण–न्याय–काव्य–कोषागम–योगादिग्रन्थेषु प्रागल्भ्यं प्राप्य संयम–तपः–समिति–गुप्तिषु परिषहोप–सर्गसहनादिषु च सात्त्विकतां साधयन्ति। नैकविधतपश्चरणाचारणेषु समुद्यतवन्तः सन्ति।

जिनवचनस्वाध्याये पराकाष्ठां संप्राप्य नैकविधग्रन्थानां परिशीलनादिना नैककर्मग्रन्थ–प्रकरण–काव्य–टीकादिग्रन्थग्रथनेषु चन्द्रमा इव सकलासु कलासु चातुर्यसाकल्यमाक–लयन्ति

अत एव प्रभुवचनप्रदीप्रवणाः प्रकाशनाय व्याख्यानवाचस्पतिपदमाप्ताः साधवः प्रचुरतराः प्रमुख प्रवचनप्रभावकाः सन्ति। जैनशासने यावन्त्यः साधूनां सङ्ख्याः सन्ति, तासु प्रभूततरा सङ्ख्या प्रेमसूरीश्वरस्यप्रवरसमुदायेह्यस्ति तत्तु निर्विवादं सत्यम्।

सन्त्यन्यसमुदायेऽपि ज्ञान–ध्यान–स्वाध्याय–तपश्चरणादिक्रियायुक्ताः साधवः। नास्त्यत्रास्माकं न्यूनाधिककथने तात्पर्यम्, किन्तु वस्तुस्थितिविलोकनेन विज्ञातमिदम्।

सिद्धान्तमहोदधीनां पूज्यपादानां साधुजीवनस्यैव तत्प्रभावः स्पष्टतया दृश्यते।

तेषां पूज्यपादानां मार्गे ये साधवश्चलन्ति,

ते एव कृतार्थतां प्राप्नुवन्ति

ते एव च संयमधर्मस्य साफल्यमाप्नुवन्ति।

अतः सत्यं, तेषां गुणानां स्मरणं पुनः पुनः करणं चरणफलवितरणकरम्, यतस्तेषां पूज्यपादानां प्रिय आसीत् संयमः। यद्यस्माकं प्रियास्ते महापुरुषास्तर्हि किं कर्तव्यमस्माभिः? तत्तु स्वयमेव चिन्तनीयम्। यद्यत् तेषां प्रियम्, तत् तत् सर्वमस्माभिः कर्तव्यमेवेति। यद्येतादृशमाचरणं वयं कुर्मस्तदा जिनशासनगगने पार्वणपीयूषकरस्य महोदयो भवेदिति आशासे।

।। इति शम्।।

* अमृतानुवादः *

आर्हतशासनाकाशे प्रेमसूरिः कुमत्[१]प्रियः।
किरति व्रतिकुमुद्भिः कौ मुदं व्रतकौमुदी।।

– पू.आ.श्री रामचन्द्रसूरिसमुदायः १) चन्द्रः

वादो न वितण्डावादः

# ॥ बुद्धिपीयूषप्राकट्यम्॥

## चतुर्विधं व्यक्तित्वम्

– श्रेयःकान्तः

### पात्रपरिचयः

(१) देशः = भवचक्रः
(२) नगरं = धर्म पूरम्
(३) राजा = धर्मः
(४) राज्ञो मित्रम् = स्वाध्यायः
(५) लघुमित्रम् = प्रह्लादः
(६) चौरः = मोहः
(७) सार्थवाहः = प्रेम
(८) सार्थवाहपत्नीः = सन्मतिः
(९) सा० पुत्रः = सात्विकः
(१०) पुत्रः = जीवन्तः
(११) पुत्रः = सरलः
(१२) पुत्रः = प्रेमबन्धुरः
(१३) पुत्रीः = आनन्दा
(१४) पुत्रीः = आचरणा



### दृश्यः १

नेपथ्यः

धर्मराजस्य राज्यसभा, सञ्जातो जयजयारवः। राज्ञो गुणगौरवगाथा मङ्गलपाठकैः समुद्घोषिता। राजा प्रवेशितः सभायाम्। सार्धं नैक मूर्धाभिषिक्तराज–सेनापति–मन्त्रि–श्रेष्ठ्यादयः प्रवेशिताः। सभाऽऽरम्भः। सेनाधिपतिना समुद्बोधिता प्रजा। मन्त्रीश्वरेण समुद्घोषिता नृपाज्ञा। प्रवर्त्तते राज्यविषयकचर्चा।

संवादः

द्वारपाल :– महाराज! समिच्छति प्रवेष्टुं देवस्य मित्रं श्रीस्वाध्यायः।

राजा :– झटिति झटिति। (स्थगिता राज्यविषयकचर्चा। मित्रागमनोदन्तं ज्ञात्वा नन्दितो राजा।)

राजा :– बहु वासरा जाता स्वाध्याय!

स्वाध्याय :– सत्यम्, राजन्! प्रभूतः समयो गतः।

धर्मराजाः – किं चौरः प्राप्तो न वा?

स्वाध्याय :– बाढं, प्राप्तः।

धर्मराजः :– किं नाम तस्य ?

स्वाध्याय :– राजन्! मोह इति नाम तस्य।

धर्मराजः :– तस्य नगरं प्राप्तं न वा ?

स्वाध्याय :– प्राप्तं तदपि। (राजा प्रभूततरं प्रमोदितः)

धर्मराजः :– कथं प्राप्तः स ? कुत्र प्राप्तः ? केन प्राप्तः ? किं केनापि मथितो न वा ?

(राज्ञः प्रश्नचतुष्कं श्रुत्वा सानन्दं स्वाध्यायः प्रत्युत्तरायाऽधीरोऽभवत्)

स्वाध्याय :– राजन्! सर्वं विस्तरतस्तस्य वृत्तान्तं दत्तावधानेन श्रुणु।

भवतु मम

प्रेमगुरु



सदृशं

ज्ञानमगाधम्...

(राजा एकाग्रचित्तेन स्वस्थमनसा श्रुणोति।)

स्वाध्याय :– यदा स चौरोऽस्मन्नगरे प्रविष्टस्तदा त्वैकाक्यपि दुर्जय आसीत्।

राजन् ! तेन चौरेण किं किं कृतं नास्माभि र्ज्ञातम् तेन दुष्टेन केनानेकीभूय समग्रनगरे विसंस्थुला स्थितिः समुत्पादिता। सर्वेऽपि जना निराश्रयाः कृताः। ततस्ते तदधीनाः सञ्जाताः। ततः सर्वेऽप्यनादरणीया जाता सत्कार्ये। पुनश्चादरणीया जाता असत्कार्ये।

तथाहि–विषयलाम्पट्यं जातम्। वृद्धिं गतानाचारिता। हिंसां सर्वेऽपि दृढमनसा कुर्वन्ति। वारंवारमसत्यं वदन्ति। चौरीषु सर्वे सावधानाः सञ्जाताः। निःशङ्कं परस्त्रियं सेवन्ते। तासां च रूपं पुनः पुनः निरूपयन्ति। ताः प्राप्तुं धावन्ति। नवं नवं कल्पनाजालं रचयन्ति। निरन्तरं ता एव स्मरन्ति। स्वकरणीयकर्तव्ये शिथीलतां धरन्ति। परिग्रहविषये यं यं वस्तु ते पश्यन्ति तं सर्वं ग्रहीतुमनाः निर्विचारमनुधावन्ति।

तच्चौरप्रभावेणैव यद्वातद्वा वदन्ति। अवक्तव्यं वदन्ति। अकर्तव्यमेव कुर्वन्ति। अपेयं पिबन्ति। अभोज्यं भुञ्जन्ति। अपचेष्टां कुर्वन्ति। अन्यानन्याँश्च कारयन्ति।

न स्वकुलं विचारयन्ति। न स्वजातिं स्मरन्ति। न लाभं हानिं च चेतसा चिन्तयन्ति। यदा यो विचारो मनसि स्फुरति तं सर्वं निर्विकल्पं कुर्वन्ति।

अत्र तत्र सर्वत्र धर्मनगरे राजन्! भवदाज्ञां पालयित्वाऽपि सर्वान् स्वायत्तान् कृत्वा नष्टः स चौरः।

**धर्मराजः** :- स्वाध्याय! स कुत्र गतः?

**स्वाध्याय** :- राजन्! प्रथमं तु नगरस्य कुतोपि स्थानान्निर्गतः स इति न ज्ञातं मया। किन्तु बहुप्रयासानन्तरं काचित् पदावली दृष्टाऽस्माभि-स्तदा सपरिकरोऽहं हर्षं प्राप्तः। पदावली निःशङ्कं तस्यैवेति ज्ञात्वा तन्मार्गेऽस्माभिः प्रस्थानं कृतम्।

**धर्मराजः** :- केनाभिज्ञानेन भवद्भिर्ज्ञातं, यत् स इतः स्थानात् गतः इति।

**स्वाध्याय** :- राजन् ! यदि तदपि ज्ञातुमिच्छा वर्तते भवतां, तर्हि श्रुण्वन्त्वनन्यमनसा।



## दृश्यः २

राजन्! अत्र भवचक्रदेशेऽज्ञानाभिधानदेशात् कोऽपि समागतः रूपवान् धनवान् प्रेमनामा सार्थवाहः। अन्यदा स स्वकार्यार्थं प्रस्थितः। मिलित एकः पान्थः। साहचर्याज्जातात्मीयता। तदा तस्य देशस्य चर्चा प्रवर्तिता। प्रेमसार्थवाहस्य जातोत्कण्ठा। प्रश्नितः सः, किं रुपो देशः, कानि च तस्मिन् नगराणि चेति पान्थेन विस्तारतो वर्णनं प्रारब्धम्। तथाहि-

My God

भवचक्रदेशे नैकनगराणि सन्ति। तानि सर्वाणि समृद्धानि सबलानि च। तत्र वसन्तो लोकाः स्व-स्वकर्मानुरूपं फलमादधानाः सन्ति। न तत्र कस्यचिद् विरोधः।

आसीत् तत्र धर्म इति नाम्ना नगरम्। न तदनुरुपमेकमपि नगरमस्ति। तन्नगरे नन्दनवनतुल्यानि पञ्च महोद्यानानि सन्ति। भवति च नन्दनवनस्याप्युपमा तस्याग्रे लघ्वी। तत्र यो नरः प्रविशति स सानंद एव बहिर्निर्गच्छति। तत्र न प्रविशन्नरो दुःखं प्राप्नोति।



न पुनस्तत्रैकं वनं नरमानन्दयति, किन्तु सर्वाण्यपि सर्वानानन्दयन्ति। तेषां च नामानीमानि सन्ति। तत्राद्यं सर्वतः प्राणातिपातविरमणम्, द्वितीयं सर्वतो मृषावादविरमणम्, तृतीयं सर्वतोऽदत्तादानविरमणम्, चतुर्थं सर्वतो मैथुनविरमणम्, पञ्चमं

सर्वतः परिग्रहविरमणं चेति वनपञ्चकस्यावञ्चकाभिधाः।

तत्र यो यः प्रविशति। स परमानन्दं दधति। तत्र दशविधानि सुखस्थानानि सन्ति। तेषां नामानि तु क्षान्ति-मार्दवाऽऽर्जव-मुक्ति-तपः-संयम-सत्य-शौचाऽकिञ्चन्य-ब्रह्मचर्यादीनि सन्ति। यः कोपि तत्र याति परमाह्लादं स संपद्यते। शोको दूरीभवति। मनःस्वास्थ्यं वर्धते। प्रसन्नता भवति। मनागपि खेदः मनसि न प्रविशति।

तत्र सन्ति परमोच्चानि सौधानि। तत्र ये केऽप्यधर्मनगरस्य मोहचौरसत्काः प्रविशन्ति। तेषां निग्रहाय पञ्चस्थानानि सन्ति। प्रथमं स्पर्शेन्द्रियविजयो, द्वितीयो रसनेन्द्रिविजयस्तृतीय घ्राणेन्द्रियविजयश्चतुर्थचक्षुरेन्द्रिविजयः पञ्चमः श्रोत्रेन्द्रियविजयश्चेति।

राजन्! बहुविस्तरतस्तेन पान्थेन कृतं धर्मनगरवर्णनम्। ततो बहु समुत्कण्ठितो जातस्तत्र प्रवेशाय प्रेमसार्थवाहः।

अत्र तु बहुकदर्थनां कृत्वा यदा नष्टः स चौरः तदैव तस्य प्रेमसार्थवाहस्य सञ्जातमत्रागमनम्। येन मार्गेण स गतस्तस्यैव मार्गेण स सार्थवाहः समागतः। तस्य चौरस्य गमनमार्गं चास्माभिः सार्थवाहादेव ज्ञातम्।

धर्मराजः :- कथं प्रकारेण भवता ज्ञातं तत्?

स्वाध्याय :- राजन्! प्रतिद्वारं तद्गमनागममार्गदर्शनार्थमस्मत्सेवकास्तत्र बम्भ्रमन्ति। तदा भ्रमद्भिस्तै र्दृष्टः स सार्थवाहः। पृष्टश्च सः।

(बहुदिनैस्तत्र प्रवेशार्थं प्रयत्नातिशयवता प्रेमसार्थवाहेन नृपाज्ञया प्रतीहारेण प्रवेशितेन कथितमेतद्।)

प्रेमसार्थवाह :- धर्मनगरप्रवेशे मम बाधकः स एव, यस्य शुद्धिर्भवद्भिः प्रारब्धा।

स्वाध्याय :- स चौरो भवता दृष्टः किम्?

प्रेमसार्थवाह :- बाढं स दृष्टः।

स्वाध्याय :- स किंरूपोस्ति? कदा नष्टः? तेन सार्धं भवतः कोऽपि वार्तालापः सञ्जातो न वा?

प्रेमसार्थवाह :- दृष्टमात्रेण 'स महाधूर्त्तोस्ति' इति ज्ञायते कपटशिरोमणिः, सर्वदोषपूर्णः, सर्वथा सर्वान् प्रतार्य प्रणाशयति, स कस्याप्यायत्तो नास्ति, रूपपरावर्त्तिनीं विद्यां धरति, अत स विभिन्नरुपोऽस्ति, स प्रतिसमयं रुपपरावर्तनं करोति, न तस्य प्रतारणायाः पारं कोऽपि प्राप्नोति।

भवतु मम
**प्रेमगुरुसदृश**
निस्पृहतागुणः...



# सूरि प्रेम





**स्वाध्याय** :- अथ कदा दृष्टः ?

बहुदिवसैरस्माभिस्तत्रैव स दृष्टः। धर्मनगरप्रवेशे महान् प्रयासोऽस्माभिः कृतः? युद्धमपि जातम्। महाबलवान् स न केनाऽपि सत्वरं जीयते।

अथ तृतीयप्रश्नो भवता पृष्टः। तेन चौरेण सह वार्तालापोऽभवन्नवा। तत्र तु युद्धे मया क्रोधेन आहूतः सः। अद्य त्वं न भविष्यसि, तिष्ठ! तिष्ठ! रे दुरात्मन्! बहुदिनेभ्योऽहमत्रस्थः त्वां पश्यामि। समस्तेऽस्मिन् धर्मनगरे सद्भावरहितेषु जनेषु त्वमेव स्वसाम्राज्यं स्थापयसि। सर्वान् स्वायत्तान्

करोषि। निःसीम-दुःखगर्त्तायां पातयसि।

तदा मया बहुप्रकारशस्त्रैर्जर्जरितः स ''यदि त्वमधर्मनगरे कदाप्यागमिष्यसि तदा त्वां जीवन्तं नाऽहं मोक्ष्यामि।'' इति वदन्ननेन मार्गेण स नष्टः इति। तदैव च मया ज्ञातमयमधर्मनगरे वसति। पुनश्च तत्र गमनमार्गमपीदमेवेति लगति।

स्वाध्याय :- एतत् श्रुत्वा तद्दर्शितमार्गेणैवागच्छमहं सपरिकरः। नान्यः कोऽपि तन्मार्गे गन्तुमलम्। ये केऽपि गच्छन्ति ते सर्वे तत् सेवका एवेति। ततः सम्पूर्णमार्गे तस्य धूर्त्तस्य पदावलिः दृष्टा।

तेनैव मार्गेणाधर्मनगरं गत्वाहं बहु दृष्टवान्, तत्र सर्वे मोहेन पटलबद्धविलोचनाः दुःखपरिप्लुताः। न तत्र तेषां कोऽपि शरण्यः। तत्राधर्मराजापि दुःखपूरपूरितं जनं दृष्ट्वा परमप्रमोदं प्राप्नोति। तदैव स्वराज्यस्य सार्थक्यं समर्थयति।

तत्र सावद्यो नाम तस्याङ्गरक्षकः प्रत्यहं सर्वान् तस्याधीनं करोति। तत्र मनो-वचन-कायन् दण्डाभिघातैर्जनानतीव जर्जरिता कृत्वा पञ्चेन्द्रियविषयपाटके ये गच्छन्ति, तेषां मरणसमानां वेदना-मुत्पादयति। तत्र नगरे पञ्चाश्रवनामस्थाने प्रवेशन्तो जीवाः परमाशातां वेदयन्ति। न मनागपि शान्तिं प्राप्नुवन्ति। यानि यानि दुष्कार्याणि जगति सन्ति, तानि सर्वाणि मया तत्रैव दृष्टानि। किं बहूक्तेन? सुखेन सार्धं सर्वं विसंवादं तत्रैव दृश्यते। इत्यलं विस्तरेण।

(स धर्मराजः सर्वं जानाति, तथापि 'स्वनगरप्रविष्टा बहुजनास्तदायत्ता न भवन्तु' इति सर्वेषां बोधार्थं सर्वं श्रुणोति साश्चर्यम्)

धर्मराजः :- स्वाध्याय! तत् पश्चात् किं जातम्?

स्वाध्याय :- ततः परमहं तत्स्थानान्निर्गत्य भवतां च पार्श्वं समागतः।

धर्मराजः :- तत्र चौरः किं भवता दृष्टो न वा?

स्वाध्याय :- दृष्टो दृष्टो बाढं दृष्टः स। यदाहमधर्मराजस्यः सभायां गतः। तदा तत्पार्श्वे लघुतमसिंहासने एकः पुरुषः सर्वालङ्कारालङ्कृतो दृष्टः। मया पृष्टस्तत्र कोऽपि नरः 'कोऽयं नरः सिंहासनोपविष्टः?' तेन प्रोक्तः- किं न जानासि? असौ तु राज्ञः सर्वकार्यकर्तास्ति। यदि न भवत्यसौ तदेयं अधर्मनगरं तु धर्मनगरं भवेत्। नात्र संशयः। पश्चात्तु तस्य प्रभूततरः बहुधा प्रभावो मया प्रत्यक्षमीक्षितः।

धर्मराजः :- स्वाध्यायमहोदय! सुष्ठु सुष्ठु प्रयासस्तव।

किन्तु प्रेमसार्थवाहेन केन प्रकारेणासौ महाबलोऽपि मोहचौरः स्वायत्तः कृतः?

स्वाध्याय :- सुष्ठु प्रश्नः कृतो देवेन? प्रेमसार्थवाहेन विहितो विजयोऽस्माकं सर्वेषामा-दर्शभूतः। सार्थवाहोऽसौ धर्मनगरप्रवेशार्थं सन्मतिपत्न्या सार्धं सर्वं विचारविमर्शं करोति। सन्मत्या तस्य चत्वारः सत्पुत्राः समुत्पन्नाः। तैः सत्पुत्रप्रभावैस्तेन विजितो मोहः।

भवतु मम

**प्रेमसूरिसमान**

वेयावृत्यभाव

परायणता।



**तत्र : प्रथमः पुत्रः सात्त्विकः** – स्वस्य सत्कार्यैः प्रयत्नातिशयवान्। बहुविध–विघ्नवृन्दान् सत्वरंजयन्ति। मरणमपि न गण्यं कृत्वा स्वकार्यसिद्धिप्राप्तात्मवीर्यः, विनष्टराजसतामसदोषः, स्वाम्याज्ञापालनदृढतर–स्वभावः, दक्षः, सदाचारवान्, शुद्धमनोभावः इत्यादि–नैकगुणसन्दोहसमन्वितः प्रथमपुत्रः। राजन्! कथमीदृश–पुत्रेण न विजयमाप्नोति सार्थवाहः।

**द्वितीयः पुत्रः जीवन्तः** येन प्रकारेणात्मना स्वजीवनं व्यतितव्यं, तदाचारसंहितायां स्पष्टतया दृश्यते। पुत्रेऽस्मिन् नैकगुणग्रामः प्रकटितो विद्यतेऽत्र न संशयः।

**तृतीयः पुत्रः सरलः** अत एव येन केन प्रकारेण स्वात्मगुणविकासमिष्यते स्वोपकारिगुर्वादिजनेन तदा तत्र सहजभावेन यः स्वीकरोति, सर्वथा तु निर्मायकपट–भावं निसेवते। स तु सरलताया एव भवति। विना कलुशभावेन स मोहं मारयतीति न तत्र शङ्का कर्तव्या।

**चतुर्थः पुत्रः प्रेमबन्धुरः** मात्रैकवारं यस्तस्य सम्पर्कं करोति, स प्रेमार्द्रहृदयः सन् निरन्तरं तस्य सम्पर्कं नैव मुञ्चति। स हि मैत्रीभावनायुक्तस्वभावतयैव सर्वप्रियः सञ्जायते न तत्र काचित् शङ्का कर्तव्या।

इत्येवं चतुश्चतुःपुत्रसद्भावसहकारेणै व सात्त्विकता भवति, जीवद्रुपेण स्वभावतयैव जिनाज्ञापालने दाढ्र्यं भवति। यथा यथा जिनाज्ञापालनं भवति तथा तथा स निःशङ्कं प्रज्ञापनीयतागुणाधानेन सरलतां प्राप्नोत्येव ततश्च मैत्री भावनारसस्थालीप्रेमाक्ता प्रवर्तते इति।

ततश्च धर्मनगरे सार्थवाहः परमहर्षप्रदा सदानन्देति प्रथमां पुत्रीं, द्वितीयां च प्रकृष्टतरबलवतीं' सदाचरणा–भिधानां प्राप्नोति।

राजन्! भवतां लघुमित्रं प्रहलादो मया सार्धं छायावत् स्थितोस्ति। तत्तु भवता सुज्ञातमेव। तस्य वर्णनं तु मातुरग्रे मातुलस्य वर्णनवद्विद्यते।

## ।। उपनयः।।

इत्येवं मया संवादव्याजेन पूज्यपादसिद्धान्तमहोदधीनां प्रेमसूरीश्वराणां चतुःप्रकारं व्यक्तित्वं व्यावर्णितम्।



- प्रेमसार्थवाहः – पूज्यपादाः।
- धर्मनगरं – संयमधर्मः।
- धर्मराजः – धर्मप्राप्तिः।
- अधर्मनगरं – पापमयीप्रवृत्तिः।
- धर्मराजमित्रम् – स्वाध्यायः (यथा तेन विना धर्मो न संभवति)
- धर्मराजलघुमित्रम् – प्रह्लादः (यथा संयमे जातो हर्षः।)
- सार्थवाहस्य पुत्रः – गुणचतुष्कम्।
- प्रथमः – सात्विकगुणप्राप्तिः।
- द्वितीयः– जीवन्तजिनाज्ञापालनम्।
- तृतीयः – सरलतागुणप्राग्भारः।
- चतुर्थः – प्रबलमैत्रीभावना।
- प्रेमसार्थवाहपत्नी ''सन्मति'' – सम्यक्विचारकारिका मतिः।

इत्येवं पूज्यपादैश्चतुर्विधं व्यक्तित्वं
सम्प्राप्य धर्मसम्प्राप्तिः कृता।

तया च पूज्या अभवन्

- सदानन्दमग्नाः,
- प्रकृष्ट धर्माचरणाप्रमत्ताः

।। इति शम्।।



# सप्तमो विभागः



प्राज्याज्यपक्वयद्भोज्यसमान–
सद्भूतगुणमाधुर्यधुरीण!
जीवनपुष्टिप्रद!
पूज्याचार्यप्रवर प्रेमसूरीश्वर!
अस्मादृशां संयमजीवनं
निष्ठामाधुर्येण प्रपुषाण

- नीरसरसनानां
- संयमशोभाधराणां
- पुद्गलासक्तिहराणाम्
- स्वस्वास्थ्यभूतरत्नत्रयीप्रदानाम्
- प्राज्यब्रह्माज्यसिद्धपुष्टात्मानाम्
- पूज्यपादाचार्यप्रवराणां
- प्रेमाचार्यवर्याणाम्

## प्रेमपारायणाभिधे श्रीनिःश्रेयसे प्रेमनैवेद्याख्यसप्तमो विभागः

- नूतनं प्रेममिष्टं यत् सदा सुपुष्टिं विदधाति।
- नूतनं प्रेममिष्टं स्वात्मस्वास्थ्यं वितनोति।
- नूतनं प्रेममिष्टं रत्नत्रयं वितरति।
- नूतनं प्रेममिष्टं सदा सदात्मानं विभूषयति।
- नूतनं प्रेममिष्टं पुद्गलासक्तिं विनाशयति।





# जयतु वरगुरुः...

– अमृतपटेलः

नित्यस्थेमात्मनीनं श्रमणगुणफलैः प्रेमधामात्मसूरि–
रात्मारामोऽनन्यश्रमणगुणसुधासिक्तमूलः प्रफुल्लः।
विद्यन्ते पञ्चशाखा द्विगुणितधवला [1]सद्यशःपुष्परामः,
श्रामण्यामर्त्यशाखी जयतु वरगुरुः प्रेमनामाभिरामः ॥१॥

नित्यद्युतिप्रभाविप्रवचनजननी सङ्ख्यकोणैः सुरम्यं,
नित्यं चैतन्यरक्ताऽऽशुचिरुचकगुणं कामितापूर्त्तिदक्षम्।
देवेन्द्रैर्मानवेन्द्रैर्महितममितशं दातुमात्मीयवीर्यं
श्रामण्यामर्त्यरत्नं जयतु वरगुरुः प्रेमरत्नप्रधानम् ॥२॥



कारुण्यापीनपीनाखिलजनहितकृत्स्निग्धबन्धुत्वदुग्धा
शिक्षाक्षिप्रेषितात्मामरपदपदवी पुण्यपादा प्रसारा,
सत्याहिंसा तपस्या तप इति चरणै र्मुक्तिमार्गेऽग्रयाता
श्रामण्यामर्त्यधेनुर्जयति वरगुरुः प्रेमपीयूषवर्षी ॥३॥



स्वाध्यायाम्भःप्रधौतकलिकलुषमलौ यस्य दन्तौ प्रशस्तौ
कुन्दावश्यायमुक्ताविशदयमदमौ कामकूटप्रकुट्टौ
योग्यात्मामर्त्यपत्युर्वहनविधिवरः संवरो यत्करश्रीः
श्रामण्यामर्त्यनागो जयतु वरगुरुः प्रेमनागो नगेन्द्रः ॥४॥

पूतोदग्रात्मवीर्यभृतशुभधिषणाम्भोजिनीच्छन्नकण्ठः–
सम्यग्श्रद्धानजाम्बूनदविहितमहोदार–सत्त्वैकमूलः।
चारित्राचारहारद्युतिमुदितरजा राजते [2]राजमानः
श्रामण्यामर्त्यकुम्भो जयतु वरगुरुः प्रेमकुम्भोऽमृतश्रीः ॥५॥

---

१) सत्सुयशः इति सद्यशः, सद्यश एव पुष्पाणि सद्यशःपुष्पाणि, सद्यशःपुष्पैः राजते या इति सद्यशःपुष्परा, सद्यशःपुष्परा मा ज्ञानं यस्य सः सद्यशःपुष्परामः।
२) राजसु नृपादिषु मानं येन सः राजमानः।

मूले कल्याणकायः शिरसि जिनवचोमौलिभूतं विशाढ्यं[1]
चूडायां प्रौढनन्दिप्रमुदितसुम नोऽध्यात्मकल्पद्रुमालिः।
रौप्याद् हैमाच्च रात्नात् सुपरिणतिवशाद् वप्रत्रिकोपमानः,
श्रामण्यामर्त्यगोत्रो जयतु वरगुरुः प्रेमचारित्रगात्रः ॥६॥

अर्हत्पादाद्रिशृङ्गे समुदितसुवचःपादनष्टान्धकारो
भव्याम्भोजातजाता विकसितहृदयाः पूतकोशात्मपद्मः।
स्फारौदार्यप्रतापैर्बहुभवजनितं पापपङ्कप्रशोषी
श्रामण्योद्दामधामा जयतु वरगुरुः प्रेमसत्सौम्यधामा ॥७॥

आत्मा कह्लारशीतो भवति च वचनं सर्वनन्दिसुधाभं
सत्त्वाः सर्वे नितान्तं गतमरणभया यत्कलाभिः शुभाभिः।
येन प्रादर्शि सौख्यं भवसरसि महापापशैवालरन्ध्रे
श्रामण्येन्दुः सुपर्वा जयतु वरगुरुः प्रेमचन्द्रामृतश्रीः ॥८॥

श्रीप्रेमाख्याप्ततत्त्व द्युमणिकरभरैरस्तदोषो व्रतेषु,
ब्रह्मैकावापसिद्धे निरवधिसुविधे शास्त्रवाक्साधनायाम्,
निश्रामाश्रित्य यस्य श्रमणगणमणेः साधवो धौतपङ्काः
तं वन्दे ब्रह्मपूतं सततमनलसं प्रेमवाग्भिर्मधुरम्[2] ॥९॥

कामाद्रिब्रह्मवज्रं चरण-करण प्रोद्दामधारं सयामं
येन क्लृप्तं प्रमादप्रमदघनगिरिर्मूलतो मङ्क्षु मङ्क्षु।
दग्धो ज्ञानातिभीभि र्विषयविषनगः पञ्चशाखो विशालः
तं वन्दे ब्रह्मशक्रं शं[3]-ततधृतरसं प्रेमवाचंयमेन्द्रम् ॥१०॥

नित्यं सद्ब्रह्मगङ्गाऽतिशुभदसलिला स्वान्तशैत्याविसारा।
प्रेमेत्याख्या यदीया मनसि भवगदेऽमोघभैषज्यकल्पा।
यत्त्यागः प्रोच्चचूडा विजितमनसिजा यत्र वैराग्यधारा
तं वन्दे ब्रह्म पृथ्वीधरवरशिखरं प्रेमसूरीश्वराद्रिम् ॥११॥

---

१) विशिष्टं शं सुखं, तेन आढ्यम् समृद्धं इति - विशाऽऽढ्यम्।
२) मं कल्याणं प्रसन्नता वा, तत्र तत् दातुं धुरा उत्तरदायित्वं यस्य सः मधुरः-
३) शं सुखं, तेन ततः-श-ततः, श-ततः धृतः रसः यस्य सः इति श-तत धृतरसः, तं



# आत्मप्रेमौपम्यम्

– अमृतपटेलः



प्रेम सूरिः

आत्माऽऽरामाऽमरांह्रिपः– कमलाऽऽत्मविभावसुः।
आत्मारिविग्रहे वीर आत्मेभदानवर्षणः ॥१॥

आत्मप्रेमद्युतेर्गेह–मात्ममङ्गलकेतनः।
आत्ममेरुर्वरोधीर आत्मरामाब्जचन्द्रमाः ॥२॥

आत्मसौख्य यशो-धर्म-हिमांशुरात्मशैत्यकृत्।
आत्महीरद्युति कान्ति–रात्म भद्रङ्करो विभुः ॥३॥

कनकात्मतपोवह्नि–र्माऽऽनतुङ्गात्मवीर्यवान्।
आत्मभाऽऽकीर्णभुवन आत्मसुधांशुसागरः ॥४॥

मलयात्मप्रशीताऽऽशो रविरात्मतमोपहः।
आत्ममुक्तिकृद् ब्रह्मा–ऽऽत्मकृत्येषु विचक्षणः ॥५॥

आत्मराजश्रीतिलक–आत्ममृगाङ्ककैरवम्।
आत्ममुक्तिप्रभापूर्ण–चन्द्रज्योत्स्नाव्रतोज्ज्वलः ॥६॥





महात्म-धर्मघोषेण जितेन्द्रियः स्वधामभिः
आत्मगुणरत्नौधै-रात्मभाजयघोषकृत् ॥७॥

आत्मभानुकरैरिद्ध आत्मपद्म प्रभाकरः।
आत्मधर्मे हेम-चन्द्र आत्मचन्द्रांशुशेऽखरः ॥८॥

आत्मचारित्र पावित्र्यमात्ममोदित[1]महोदयः।
आत्महेमैकभूषणः सदात्मपुण्यपालितः ॥९॥

आत्मश्रेयःप्रभः सम्य-गात्मज्ञजिनदर्शनः।
आत्महिततपो-बोधि-रात्मकल्याणरत्नसूः ॥१०॥

आत्मार्यद्रिवज्रसेन आत्महेमकषोपलः।
आत्मशर्म-चिदानन्द आत्मकल्याणबोधिदः ॥११॥

आत्मसंवेग-वैराग्य-आत्मप्रशमकारकः
आत्महित-महाप्रज्ञः-आत्मतत्त्वपरप्रभः ॥१२॥

आत्मना ज्ञेय आत्मा[2]ऽऽयो वराचार्यो गुरुत्तमः।
प्रेमसूरिर्व्रतश्रीयँ पूर्वं मुक्तिश्रियो वृता ॥१३॥

आत्ममोक्षरतिव्याप्त आत्मामृतहितप्रदः।
आत्म प्रेम गुरो! प्रेम! स्वात्ममग्नत्वमर्थये ॥१४॥

---

१) आत्मनः मा, तया उदितः महान् उदयः यस्य स इति विग्रहः कार्यः
२) आत्मा एव आयः येन सः आत्माऽऽयः इति विग्रहः कार्यः - अमृतः



# अमृतानुवादः

– अमृतपटेलः

सिद्धान्तमहोदधि–सद्ब्रह्मसद्म–श्रीमत्–प्रेमसूरीश्वराणां समाधिसुधासमृद्धस्य कालधर्मस्य पञ्चाशदब्दीमुद्धिश्य 'श्रीनिःश्रेयस'स्य श्रीप्रेमपारायणाभिधे 'श्रीप्रेमसूरिविशेषाङ्के प्रकाशितानां कतिपयानां लेखानां मया यथामति सारांशस्वरूपे 'अमृतानुवाद' इति शीर्षकेऽनुष्टुब्–वृत्तानि प्रणीतानि, तदत्र प्रस्तूयते

- 'यावच्चन्द्र–दिवाकरौ' लेखे –
  चन्द्रमा व्रतितारासु पापपङ्के दिवाकरः।
  व्रताम्बुकतक्रब्रह्मचर्ये जीयात् सदा चरन् ।।

- 'श्री प्रेमसूरीश्वरमहाराज पञ्चाशिका 'लेखे–
  गुर्वायत्तं मनो यस्य मनोजं योऽखयल्लघु।
  संयतरक्षितात्मौद्यं तारं[1] प्रेमगुरुं नुवे।।

- 'आह्वान प्रत्यादाता' लेखे –
  प्रत्याह्वां कर्मणां दत्त्वा ब्रह्मणाखयदाह्वम्।
  मुक्तिनेदिष्ठसंसारं प्रेमसारं स्तुवे गुरुम्।।

- 'अहो वचनसिद्धिः' लेखे –
  वचनं यस्य सिद्धं यन्मनोभीप्साप्यते ध्रुवम्।
  मधु व्रतं मुक्तिपद्मेऽलिहन् भव्या मधुव्रताः।।

---

१) ता श्रीः, तस्यै श्रियै आरः गतिः येन सः तारः, तं तारम् मुक्तिलक्ष्म्यर्थं गतिप्रेरकम्
'...ता श्रियाम्' इति सुधाकलशमुनि–प्रणीतौकाक्षरनाममाला– २३ तमे पद्यानुसारेण



- 'गुणनिधीनां गुणस्मरणं' लेखे-

श्रामण्याध्वनि दोषज्ञा दोषलेशे पराङ्मुखाः।
वैयावृत्यफलज्ञाः श्रीगुणाढ्या प्रेमसूरयः।।

- 'सूरिश्रीप्रेमस्तुत्यनुवादः' लेखे-

संसारान्धौ महाध्वान्ते देहिनां मोहचक्षुषाम्।
प्रेमाचार्यो निर[1]स्तोऽर्को मुक्त्यंशवे मुदोदितः।।

- 'नमो पेमसूरिवराणं' लेखे-

सम्मं संजमपूयस्स जुयस्स सव्वज्जऽद्धणि
निरवज्जजईसस्स णमो पेमगुरुस्स णं।।

- 'प्रेमसूरीश्वरं स्तुवे' लेखे-

श्राद्धभगवानावासे प्रेमधर्मावतारतः।
त्यागकुङ्कुमकान्तिश्रीः प्रासीसरद् व्रतौकसि।।

- 'नमो प्रेमसूरीश्वरं' लेखे-

प्रेमसूरीश्वरं नौमि मैत्रीमानसमन्दिरम्।
दानसूरेर्वरं पट्टं योऽद्योतयद् व्रतांशुभि।।

- 'सद्गुरुभ्यो नमः' लेखे-

रुचिराशे! महत् सत्त्वं तव प्रेमगुरो! शुचे!।
प्रभाऽवन्ती जगत् प्रान्ध्यात् स्तुतिस्तथ्या गुणाकर!।।

---

१) निर्गतः अस्तः यस्मात् सः- निरस्तः, अस्त रहितः

अमृतानुवादः

- 'प्रेम जीवनोपवनं' लेखे-

आर्यवर्य! गुणारामः प्रेमधामन् व्रतीश्वर!।
व्रतवार्य[1] गुणावासं[2] प्रसारय कृपां कुरु।।

- 'निष्परिग्रहः प्रेमविजयः।' लेखे-

परिग्रहो महाग्राहः संयतजीविताम्बुधौ।
गृह्णाति यो यतेः सत्त्वं सत्त्वरं मज्जयेद् भवे।।

- 'श्रीप्रेमसूरिस्तुत्यष्टकं' लेखे-

प्रेमगुरोः स्तुतिं कृत्वा त्यक्त्वा सप्तभयं भवम्।
एतास्मि सप्तरज्जूर्ध्वं शिवेऽभयदसंस्तुते।।

- 'सन्तः साश्चर्यवर्याः' लेखे -

जिनाज्ञापालनं नित्यं जीविते विद्यते यदि।
प्रेमसूरीन्द्रवन्मृत्यौ समाधिस्तस्य सर्वथा।।

- 'चारित्रमहोदधिश्रीप्रेमसूरीश्वराः' लेखे -

पवित्रं चारित्रगोत्रं योऽरक्षन्नववृत्तिभिः।
चित्रं प्रेमगुरोरेवं तास्वात्मनस्तु दर्शनम्।।

- 'सूरिप्रेम गुणगेयं' लेखे -

जय प्रेमपदाम्भोज! जीविते व्रतसौरभम्।
यद् ब्रह्म स्मारयेन्नेमिं गुणरैवतपर्वते।।

- 'श्रीप्रेमचरणे शब्दकुसुमाञ्जलिः' लेखे-

शब्दाब्जेषु गुणाः प्रेम सूरेः परिमलायिताः।
दत्ते मोक्षरतिं यस्मै यः पर्यधाद् व्रतस्रजम्।।

- 'श्री गुरुवराः प्रेमसूरीश्वराः' लेखे -

गुरु र्ब्रह्मसरोहंसो जिनधर्माध्वभास्करः।
प्रेमामृतमहामेघो व्यधाद् धर्मसरो मरौ।।

---

१) वार्यं वरदानं २) गुणानां आ समन्तात् वासः गुणावासः तं - गुणसौरभम्

- 'रत्नपरीक्षणेऽद्भुता शक्तिः' लेखे –

स्वयं रत्नं गुरुः प्रेमसूरी रत्नपरीक्षकः।
दानसूरिर्गुरूरत्नं शिष्यादिमो गुरोः।।

- 'गुरुरिति किं' लेखे –

प्रेमसूरिर्विधिर्वर्यो जीवं धर्माद्रचेतसम्।
शिष्याकारेण निर्माय शिक्षाभ्यां कामकुम्भकृत्।।

- 'सूरिप्रेम स्तुत्यष्टकं' लेखे –

सिद्धान्तपारगः प्रेम–जीवारामे सुधां किरन्।
भीमकान्तगुणज्ञातं मुक्तिरमावरप्रदः।।

- 'पूर्णं प्रेमगुरुं स्तुवे' लेखे –

कामनिशातबाणेषु – ब्रह्म वर्म दृढं धृतम्।
कामनिशातमश्चन्द्रं पूर्णं प्रेम गुरुं स्तुवे।।

- प्रेमशतक लेखे –

मरो र्जातः सुधासिन्धुः प्रेमाऽऽर्याख्यस्तु चित्रकृत्।
यमैर्बद्ध्वा यमान्मोक्तुं स्वं परान् सततोद्यतः।।

- ज्ञानगर्भितवैराग्यवान् लेखे –

नैसर्गिकी प्रभा यस्य सद्वैराग्यप्रदीपके।
चित्ते ज्ञानं घृतं पूर्णं प्रेम ब्रह्मप्रभं स्तुवे।।

- 'श्रीप्रेमसंयममन्दिरम्' लेखे –

श्रीप्रेममन्दिरं विश्वे मोहराजरणाङ्गणम्।
तच्छ्रितेभ्यो बुधैः प्रोक्तं ते पुण्यश्रीफलं गताः।।

- 'प्रेमपीयुषोद्गार' लेखे –

आत्मगुणोन्नते र्जीयाज्जिह्वादीन्द्रियसञ्चयम्।
जितेऽक्षे हि जितं कर्मेत्युद्शारात् प्रेमगौरवम्।।

- 'सङ्क्रमकरणग्रन्थांशः' लेखे –

येषु[१] ग्रन्थान् विधायर्षि येषां[२] ग्रन्थि विंदारिता।
चित्रं कर्म[२] प्रेम[३] गुरो! कर्मकृत[४] ते भवाम्यहम्।।

- 'श्रीप्रेमसूरिस्तवनाष्टकम्' लेखे –

मनोऽमलं भवेद् येषां ब्रह्मचर्यादिचिन्तनात्।
प्रेमगुरुवराःस्तुत्या यतो गुणिजनाद् गुणाः।।

- 'श्रीप्रेमसूरिगुरुवराष्टकम्' लेखे –

आत्मगुणैर्व्रतीन्द्रोयस्तेजोब्रह्मविरागवान्–
चन्द्रवद् वत्सलः ज्ञानी प्रेमसूरिं स्मरामि तम्।।

- 'शुद्धं सिद्धिप्रदं शुभावहम्' लेखे –

जन्म शुद्धं व्रतं सिद्ध्यै, समाधिश्च मृतौ वरः।
शुद्धाः कुलं गुरु र्नियामकाः प्रेमगुरोरहो।।



- 'नवधामधुरं मुनिव्रतं मधुरं' लेखे –

व्रतं यस्य सुधाकुण्डं सुधाः स्रव सदाऽऽ[५]यत।
नवधा नवधाम[६]! त्वं प्रेमा[७]ऽनागो गुरुर्जय।।

- 'नवं नवं सौन्दर्यं' लेखे–

नीरागरोषवृत्त्यन्तोरक्षितोध्वा शिवं पुरम् ।
नयत्येवं गुरुं र्यातः प्रेमसूरि र्जिनाऽध्वना[८]।।

अ
मृ
ता
नु
वा
दः

---

१) कर्मणामिति, २) कर्म कार्यं ३) भविपुलाछन्दं ४) कर्मकृत् सेवकः
५) सदा नित्यं आ समन्तात् यतः यतनाशीलः – नित्यं यतनामयः इति भावः।
६) नवः स्तवनं, तस्य धाम गृहं इति नवधामं स्तोतव्यगुणगृहं, तत्संबोधनं नवधाम!
७) प्रेम तथापि नाग इति विरोधालांकारः, प्रेम नामा साधुः, प्रेमसाधुः,
न विद्यो आगः पापं यस्येति विग्रहे कृते अनागाः–
निष्पाप, इति विरोध परिहारः–
८) जिनैः प्रज्ञप्तः अध्वा इति मध्यमपदेन विगृह्य समासो ज्ञेयः।

- 'समाधिवाञ्छा' लेखे -

यस्य जीवितमर्हद्वाक् संयतं सुसामाधिना।
सोऽस्माऽन्ते स्याद् व्रतीशैस्तु कुल्याद्भिः फलवद् द्रुवत्।।

- 'ब्रह्ममूर्त्ति प्रेमसूरीश्वराः' लेखे-

ब्रह्मतेजश्चये यस्य मारविकारतमी घना।
स्थातुमलं न, प्रेमश्री गुरु र्भानुरनुत्तरः।।

- 'मोदनमनुमोदनं' लेखे -

व्रते रत्यादयः सूरे ! प्रेमगुरो! गुणास्तव।
घनाऽघनिधने हेतिततिवद् दृश्यतेऽधुना।।



- 'स्वचिन्तागरीयसी'...लेखे -

नासस्तीहा यस्य येषां तद् वृणीते तान् द्रुतं वरम्[1]।
पश्याब्धिर्नेहते वेलामिन्दुर्दत्ते दिनाद् दिने।।

- 'स्वाध्यायप्रकाश' लेखे -

स्वाध्यायः स्वाधिकज्ञाऽऽयः[2], परत्रापि स्वतेजसा।
सूरिः प्रेमगुरुर्दीपो द्योतितस्तेन सन्ततम्।।

- 'गुणपञ्चक' लेखे -

पञ्चभूतै र्यथा विश्वं, प्रेमगुरोस्तथाऽऽत्मकम्[3]।
पञ्चगुणैस्तमोमुख्यैः, श्रेयस्कृद् व्रतपञ्चकम्।।

---

१) श्रेष्ठं।

२) स्व इति आत्मा, अधिकः उत्तरोत्तरं वृद्धिं गतः, ज्ञायते सर्वं येन तद् ज्ञं ज्ञानं = 'आ समन्तात् आयः लाभः आऽऽयः, सर्वतो लाभः,
स्वस्य अधिकः ज्ञस्य आऽऽयः इति स्वाऽधिकज्ञाऽऽयः,

३) आत्मा एव कं सुखं येन तद् आत्मकम्, आत्मनोऽनन्तचतुष्टयावस्था करं इति भावः व्रतपालनेन आत्मा कर्मविनाशेन सुखमयो भवति।



- **'प्रेमस्तवना' लेखे –**

नयैर्धर्मेऽर्हतां धीर प्रेमगुरो र्मतिः स्थिरा।
नवोल्लेखमयाऽऽख्याभिः स्तवार्हागुणभृद्वरैः।।

- **'निर्दोषसंयमप्रेम' लेखे –**

तक्रबिन्दु क्षीरे क्षीरं, दोषलेशोपि संयमे।
दोषज्ञः प्रेम सूरिस्तं जहात्येव दूरतः।।

- **'प्रेमप्रबन्ध' लेखे –**

[१]सङ्ख्यातीता गुणाः प्रेम गुरोर्गुणाम्बुधे बुधाः!।
न सङ्ख्या भवतां मातुमीष्टे शास्त्रविदां [२]तकान्।।

- **'श्री प्रेमसूरिवरो गुणमूर्त्तिः' लेखे–**

परगुणान् गुणा यस्य प्रेक्ष्य प्रमोदमाप्नुवन्।
[३]गुणाः स्तुवन्ति तं प्रेमसूरिं गुणवत्सलम्।।

- **'प्रेमसूरिस्तु मङ्गलं' लेखे–**

विहाय स्वजनाद्यान् ये बालास्[४]तु संश्रिताः गुरुम।
गुरुणा प्रेर्य पोष्यास्ते प्रेमाचार्योऽत्र भद्रकृत्।।

- **चारित्रचन्द्रोदयलेखे –**

आर्हतशासनकाशे प्रेमसूरिः कुमुत्प्रियः।
किरति व्रतिकुमुद्भिः कौ मुदं व्रतकौमुदी।।

---

१) सङ्ख्या = चर्चा तां अतीताः = वर्णयितुमशक्याः।
२) तान् इत तकान्।
३) जनाः गुणिनः स्तुवन्ति इति सामान्यम्,
गुणिनः गुणान् स्तवन्ति–इत्यतो गुणिषु मात्सर्याभावः,
किन्तु गुणा यदि कमपि स्तुवन्ति–तत्तु गुणिनस्तस्याद्भुततरं
चरितमिति भावोऽत्र व्यज्यते।
४) तुः अपेरर्थे।



- 'मधुरमसमञ्जसम्' लेखे –

स्तम्भनपुरश्रीसङ्घो मानं गु[1]रो र्गुरो र्गुरोः।
रामे प्रेमगुरुं प्राप्ते व्यधादागमयात्रया।।

- 'षट्कारकैः प्रेमसूरिस्तवना' लेखे–

'संस्तुतः कारकैः षड्भिरष्टकर्मविदारणे।
प्रेमसूरिरहोचिद्[2]– [3]स्तपागच्छनभोऽर्यमा।।

- 'प्रेमसूरीशगुणपद्मानि' लेखे–

सङ्ख्यातीता गुणाः प्रेम सूरिवरेऽमिता व्रते।
[3]व्रताम्भोजेऽनीला भृङ्गाश्चित्रं कर्षन्ति पद्मकान्।।

- 'प्रेमप्रसाद' लेखे –

पूर्णोदितैर्गुणैः प्रेम सूरि र्बध्नाति दर्शकान्।
स्वाध्याय–ब्रह्म वात्सल्यैश्चित्रं तै र्न मुमुक्षवः।।

- 'विरलतमा महापुरुषाः' लेखे –

गुणगाथाः कथा येषां गुणस्पर्शस्तथा स्तुतिः।
सत्त्व प्रियङ्करा प्रेमाचार्या जैनाध्वभूषणाः।।

- 'परमपदपन्थाः – प्रकृष्टतरानासक्तियोगिता' लेखे –

मिष्टभुक्तिमिषाद् बालात् प्रेर्य गाथाकृते गुरो!।
गलिताऽगलितं मिष्टं चित्रं प्रेम[4]प्रतारकः।।

---

१) ''गुरोः'' इति श्रीरामचन्द्रसूरेः, 'गुरोर्गुरोः' इति गुरुः श्रीरामचन्द्रसूरिः, तस्य गुरुः श्री प्रेमसूरिः– तस्य 'गुरो र्गुरोः' अर्थाद् द्वयो र्गुरो र्मानं संघो व्यधात्।
२) चित् ज्ञानं, तेन राजते, तस्मिन् रमते वा चिद्–रः।
३) व्रते तु अनीलत्वं श्वेतत्वमेव साधूनां भृङ्गत्वम्, पद्म शब्दः पुल्लिङ्गेपि अस्ति– लघवः पद्माः– पद्मकाः तान्, अत्र लघु पदेन नूतनाः मुनयो व्रतेच्छवो वा व्यज्यन्ते।
४) प्रतारणाकारकः, चित्रमिति प्रेम्णायः प्रतारयति इति–प्रेमप्रतारकः, अथवा प्रेम इति संबोधनं त्वं प्रतारकः अस्ति,प्रकर्षेण तारकः, यथा गाथाः पाठिताः, तथा मिष्टं भुक्तं न चास्वादितं इति चित्रम्।

# अष्टमो विभागः

संयमेन सकलात्मनः
सफलयन्तः
फलेग्राहिणां धरेव
चरणाधाराः
पूज्यपादाचार्यप्रवराः
प्रेमसूरीश्वराः!
मम मनोगगने
गुणगगनरत्नं
उदयन्तु !!!!....



सदैव मिष्टान्नवन्मधुराणां
कुभावक्षुधाहराणां
भावजीर्णतावारकाणां
सुतुष्टि-पुष्टि-ऋद्धि-वृद्धिकारकाणां
पूज्यप्रेमवर्याचार्याणां
प्रेमपारायणाभिधे

# सुस्वादुप्रेमफलाख्योऽष्टमो विभागः

- प्रेमफलं सदैव पक्वं मधुरं विद्यते।
- प्रेमफलं भवबीजं विना रोहति।
- प्रेमफलं सर्वथा कुभावक्षुधां हरति।
- प्रेमफलं सदा कर्मज्वरं जीर्यति।
- प्रेमफलं तुष्टिं-पुष्टि-ऋद्धि-वृद्धिं करोति।



# ।। काव्यप्रतिभाविष्कारः ।।

यस्य ज्ञानगुणैर्जितः सुरगुरुः प्राप्तः सुरेन्द्राश्रयं
सम्यग् दर्शनदाढर्यतः सुरगिरिः, पातालमूलेऽविशत्।
सम्यक्संयमतेजसा सुरमणिर्ग्रावायतेऽद्यापि स
श्रीमान् प्रेमगुरुः सदा विजयते, जैनेन्द्रसच्छासने

।।१।। आचार्यश्रीविजयश्रेयांसप्रभसूरिः

येषां सद्गुणसञ्चयो नभवत् सर्वत्र विस्तारिभः[1]
दुर्भावैर्दुरितैः सदाविरहितः सद्भाव सौख्यालयः,
आहारादिवुशद्धभावसहितश्चारित्रपूज्यो मम,
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्र सच्छासने

।।२।।आचार्यश्रीविजयअजितरत्नसूरिः

श्रीमद्दानगुरोः सुगच्छगगने स्वच्छे दिनेशो महान्,
जीवौघे समनेत्रसौम्यकिरणः सौभाग्यसिन्धुः सुधीः।
वात्सल्यामृतवर्षि-धर्मजलदः पापोष्मसन्नाशनः,
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने

।।३।। पंन्यासश्रीधर्मदर्शनविजयो गणी

---

१) विस्तारिणी भा यस्य सः इति- विस्तारिभः - एवं विग्रहः कार्यः - अमृत

यद् योगो भववार्दिधपारकरणे सन् सज्जनैः प्राप्यते
यद् योगो बहुदुर्लभो भववनेऽमोघस्तथागम्यधीः।
यद् योगेन जनः सदैव लभते मुक्तेः सुखं सत्वरं
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने
।।४।। श्रीभव्यकीर्तिविजयो मुनिः

सिद्धिश्रीपरमार्थसाधकगुरोः कीर्तिर्मनोरञ्जनी,
सर्वेषां भवदोषनाशजननी मूर्तिर्भवाब्धौ तरीः,
भक्तिर्यस्य विमुक्तिकृद् भववने वैराग्यसंवर्धिनी,
श्रीमान् प्रेमगुरुः सदा विजयते जैनन्द्रसच्छासने
।।५।।



चारित्रास्त्रविदीर्णमोहचरटश्चारित्रविद्याधरो-
विज्ञानालयभावितान्तकरणो निर्मोहि-निःसङ्गधीः,
सद्बुद्धिप्रतिभाकलापकलितो निःगौरवो यो गुरुः,
श्रीमान् प्रेमगुरुः सदा विजयते जैनन्द्रसच्छासने
।।६।।

सन्मेधासरितायुतं सुमनसा जैनागमं ध्यायति,
वाणी चन्दनशीतला सुभतया तथ्या च पथ्या गुरोः,
कायः पूर्णतपोयुतो भववने मिथ्यात्वशार्दूलहा,
श्रीमान् प्रेमगुरुः सदा विजयते जैनन्द्रसच्छासने
।।७।। श्रीदिव्यदर्शनविजयो मुनिः

यः सौम्यः समतारतः सरलतासद्पुण्यसौभाग्यधीः,
स्नेहार्दो वचने प्रियो गुणकरः सन्मार्गधीशोभितः।
संसारार्णवसेतुकः शुभतनुः श्री रामचन्द्रगुरुः
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने
।।८।। श्रीगणधररत्नविजयो मुनिः

दृष्ट्वा यस्य मुखं, गतो दिनमणिर्मन्येऽम्बरे सर्वदा,
सौम्यं दृष्टियुगं प्रपश्य निहतश्चन्द्रो नभे ब्रह्मणा।
गाम्भीर्यादिगुणं सुवीक्ष्य जलधिर्लोकाद्बर्बहिः स्थापितः,
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने
।।९।। श्रीक्षेमरत्नविजयो मुनिः

कल्याणद्रुमवारिसारणिसमः सद्धर्मरत्नाकरो–
दुर्वाारिकलापभृत्कुविषयान्निष्कासितात्मा सदा।
संसारार्जितकर्मनागहरिणारातिर्महामानसः
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने
।।१०।।

मिथ्यात्वप्रचुरान्धकारहरणे सम्यक्त्वसूर्योदयः,
षड्त्रिंशद्गुणधामयुक्तमुनिपैः संसेविताङ्घ्रिद्वयः।
पञ्चाचारसुपालनोद्यततनूः संवेगभावोद्यतः
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने
।।११।।

यत्त्वावश्यकधर्मकार्यकुशलप्रज्ञानविज्ञोऽजितः,
सिद्धान्तोदधिमन्थनाप्तसमतासंवेगशुद्धामृतः।
दोषाणां परिनाशबद्धकरणो ज्ञानादिरक्षोद्यमः
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने
।।१२।।

कायासौख्यनिराकृतो गुणमहापाथोधिशीतद्युतिः,
कर्मग्रन्थविशालशास्त्ररचनासन्दृब्धमेधाधनः।
स्वाध्यायाध्ययने रतः सरलहृच्छुद्धाशनः सत्प्रियः
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने
।।१३।।

षड्जीवव्रजरक्षणेन रचितप्रेमाभिधासत्क्षणो
नित्यं श्रीजिनभक्तिपूर्णमनसा सन्मार्गबद्धासनः।
मोहारातिजची सतां शिवकरो गीतार्थमध्यासनः
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने
।।१४।। श्रीआगमरक्षितविजयो मुनिः

सच्चारित्रमयः कृपारसमयः सच्छास्त्रविद्यालयः
सम्यग्दानमयो दयारसमयः सिद्धान्तनिष्ठालयः।
त्यागानन्दमयः क्षमारसमयः सद्ध्यानधारालयः
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने
।।१५।।

पञ्चाचारधरो महाव्रतधरः षट्कायरक्षाकरः
कायोत्सर्गकरो महाभयहरो वात्सल्यगङ्गाधरः।
श्रद्धादीपधरो महाधृतिधरो माङ्गल्यमालावरः
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने
।।१६।।



दोषोच्छेदकरो गुणाकरधरो निर्वेदवार्त्ताकरो
धर्मोद्योगधरः शुभाशयमयो वैराग्यतेजोधरः।
कर्मोद्वेगकरः शिवाङ्कुरकरः संवेगभाग्श्रीमयः
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने
।।१७।।

वैयावृत्यकरस्तपोनिधिभरः स्वाध्यायशोभाधरः
कायक्लेशसहो यशोनिधिमहः संसारपीडाहरः।
औनोदर्यकरः सुधानिधिभरः साहित्यभूषामयः
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने
॥१८॥

प्रायश्चित्तपरः सदात्मभवने सन्तोषलक्ष्मीश्वरः
प्रत्याख्यानपरो भवाब्धितरणे कौशल्यतुम्बीश्वरः।
मुक्तिप्रेमपरः परार्थकरणे सद्भावभङ्गीश्वरः
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने
॥१९॥

भव्योद्बोधकरः शमामृतभरः सौजन्यगीताधरः
पुण्योद्रेकवरः परिश्रमकरः सौहार्दगोष्ठीमयः।
दिव्यादर्शमयः क्रियागृहमयो दाक्षिण्यदेवालयः
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने
॥२०॥

सत्त्वोत्कर्षमयः पवित्रमनसा गाम्भीर्यस्रोतोधरः
सत्याराममयः पवित्रवचसा सन्मार्गचेष्टाकरः।
ब्रह्मोद्योतमयः पवित्रवपुषा क्षान्त्यादिरोचिर्मयः
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने
॥२१॥

हर्षोल्लासमयः समाधिमरणे सम्यक्त्वनिश्राधरो
वीर्योत्साहमयः प्रमादहरणे संविग्नचर्याचरः।
अध्यात्माक्षरदो विरक्तिजनने प्रारब्धसूर्योदयः
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने
॥२२॥

–साध्वीश्रीजयवर्धनाश्रीः., साध्वीश्रीसुरक्षिताश्रीः, साध्वीश्रीव्रतरक्षिताश्रीः

नूनं शङ्कर एष कामदहनात् साहित्यसृष्टे र्विधिः?
कल्कारिष्टविनाशनाद् हरिरसावित्यादि शङ्काकुलैः।
दृष्टो यस्त्रिसुरात्मकः सुरनरैः श्रीरामसूरेर्गुरुः।
श्रीमान् प्रेमगुरुः सदा विजयते, जैनेन्द्रसच्छासने
।।२३।। साध्वीश्रीक्षमानिधिश्रीः

**यः** सिद्धान्तनिधिर्निरीहगुणधिश्चारित्रचूडामणिर्-
**यं** दृष्ट्वा सुगुणाः स्वयं कनकवत् सन्निस्पृहं संश्रिताः।
**येना**प्ता वरभोजने विरसता जित्वा रसं दुर्जयं
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्र सच्छासने।।
।।२४।।

**यस्मै** सूरिपदं बलाद् गुरुवरैर्दत्तं निराशंसिने,
**यस्माद्** बीजरूपात् सुशिष्यनिचयो जातो वटः शोभते।
**यस्मिन्** ब्रह्मगुणो महास्मरकरि-प्रोन्माथकण्ठीरवः,
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने।।
।।२५।। साध्वीश्रीविरागदर्शनाश्रीः

विश्वे यो मदमानमल्लविजयी प्राज्ञो जिनाज्ञाधरः
कर्मग्रन्थविशारदो मधुरवाक् सिद्धान्तरक्षापरः।
मुक्तिस्त्रीकरसङ्गलालसमनाः संवेगरत्नाकरः
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने
।।२६।।



भव्यात्माम्बुजवर्गबोधकिरणो विश्वैकतेजोनिधिः
पापानां भवकर्मरोगहरणे कारुण्यपुण्यो भिषक्।
स्वस्मिन् व्याप्तविशिष्टसंयमतया गाम्भीर्यवारान्निधिः,
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने
।।२७।। साध्वीश्रीदिव्यरत्नाश्रीः

श्रीमद्दानमुनीशहस्तकमलात्, सम्प्राप्य रत्नत्रयीं
शिष्यं प्राप्य भवाब्धिरत्नमनघं, श्रीरामचन्द्राभिधम्।
विश्वं येन प्रकाशितं स्वमहसा, मिथ्यातमोभिद्धि स
श्रीमान् प्रेमगुरुः सदा विजयते, जैनेन्द्र सच्छासने
।।२८।। श्रेयःश्री

वाच्यर्हद्वचनं प्रभोर्गुणगणस्तोत्रस्मृतिश्चेतसि
काये चाचरणा सदा जिनवचोध्याने तथैकाग्रता।
भक्त्या देहमनोऽवधोऽर्पणमहो! श्रीशासने यस्य स,
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्र सच्छासने
।।२९।। साध्वीश्रीचिंतनप्रियाश्रीः

ऐन्द्रैर्वन्दितचारुसच्चरणभृत् सिद्धान्तसारोदधिर्-
ब्रह्मारामरमी मणिश्च विदुषां, वात्सल्यवर्याम्बुधिः।
जैनेन्द्रागमसारवृष्टिजलदः सत्यस्य सामर्थ्यकृत्।
श्रीमान् प्रेमगुरुः सदा विजयते, जैनेन्द्रसच्छासने
।।३०।। साध्वीश्रीश्रुतश्रेयाश्रीः

संसाराम्बुनिधौ निमग्न जननोद्धाराय पोतायते
मिथ्यात्वादि तमोन्धजन्मगहने यद्वाक् प्रदीपायते।
शिष्याणां गुणसागरोर्मिनिकरे यः पूर्णचन्द्रायते।
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्र सच्छासने
।।३१।। साध्वीश्रीआत्महर्षाश्रीः

यावन्न प्रवणाः सुशिष्यदशकाः स्युर्मे शुभाः सद्गुरोस्-
तावन्नैव करोम्यहं निजकृते नाम्रं फलं स्वादये।
एवं सन्नियमेन बद्धसुमनाः श्रामण्यचूडामणिः।
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने
।।३२।। साध्वीश्रीश्रेयःपूर्णाश्रीः

जैनाज्ञाप्रवणः स्मरार्त्तशरणः कारुण्यपूर्णाम्बुधिः,
सच्चारित्रशिरोमणिर्गुणनिधिः स्वाध्यायनिष्ठाधरः।
श्रेयःपन्थगतः कषायरहितः कैवल्यरामास्पृहः,
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने।।
।।३३।। साध्वीश्रीसिद्धिश्रेयाश्रीः



कार्याकार्यविचारसारकथने धुर्यः सदा यो गुरुर्–
वैराग्यात् प्रशमादिसद्गुणभरः संवेगभावादरः।
कमौघप्रभवं भवं गमयते धर्मात् सुखं ख्याति यः
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्र सत्शासने.
।।३४।। साध्वीश्रीभक्तिदर्शनाश्रीः

स्वाध्याये निरतः स्पृहाविरहितो भव्याब्धिजैवातृकः
सम्यग्गुप्तिधरैकपर्वतसमः संवेगरङ्गान्वितः।
श्रेयःपन्थगतैकमात्रशरणो निर्वेदभावाधिपः
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने।।
।।३५।। साध्वीश्रीनिर्वेददर्शनाश्रीः

श्रीसिद्धान्तमहोदधिः शिवकरो भव्याब्जसूर्यो वरः
कर्मग्रन्थ–विशुद्धदेशकवरः श्रीसङ्घसंरक्षकः।
आचार्येषु शिरोमणिर्गुणनिधिः शान्तस्वभावी सदा
श्रीमान् प्रेमगुरुः सदा विजयते, जैनेन्द्रसच्छासने।।
।।३६।। साध्वीश्रीसिद्धिदर्शनाश्रीः

यस्मिन् ब्रह्मगुणं सुवर्णकरणं सर्वत्र देदीप्यते,
यो नम्रः फलवान् विनम्रशिखरः शाखीव राराजते।
गाम्भीर्येण समुद्रतुल्यहृदयो योगेन बिभ्राजते,
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने
।।३७।। साध्वीश्रीकुलरत्नाश्रीः

सिद्धान्ते निपुणः शमप्रतिकृतिर्बाल्ये प्रतिज्ञाधरः
औचित्ये कुशलश्च सर्वविषये जिह्वारसं योऽजयत्।
सर्वाधौधविमोचकस्तु पुरुषे प्रज्ञाप्रधानः प्रभुः
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने
॥३८॥ श्रेयशिशुः

येषां दर्शनमेव सर्वसुखदं ब्रह्मैकसिद्धिप्रद-
मर्चा पापविनाशिका तु परमा सम्प्राप्यसंसाधिका।
यन्नाम्नः स्मरणाद् व्रजन्ति सहसा दुःखानि दूरं सदा
श्रीमान् प्रेमगुरुः सदा विजयते जैनेन्द्रसच्छासने
॥३९॥ साध्वीश्रीदर्शनपूर्णाश्रीः



# लेखप्रेषकेभ्यो विज्ञप्तिः

* ''श्रीनिःश्रेयसम्''पत्राय प्रेषणीयलेखेषु लेखाः पृष्ठस्यैकपार्श्वे लेखनीया-ऽक्षरपङ्क्तिमध्ये व्यवधानमावश्यकम् उभयपार्श्वयोरपि रिक्तस्थानं रक्षणीयम्। * स्वच्छाक्षरै र्लिखिता एव लेखाः प्रेषणीया अर्थाल्लेखेषु अक्षरस्वच्छताऽनिवार्या, अस्पष्टाऽशुद्धाक्षरलिखितलेखा न प्रकाशिष्यन्ते * नव्यसृष्टलेखेषु व्याकरणछन्दोऽलङ्कारप्रमुखाणां शुद्धिरावश्यिकी। * ये लेखा निर्णित-प्रकाशनदिनात् मासत्रयपूर्वं प्राप्स्यन्ते त एव लेखा प्रकाशिष्यन्ते। * तदनन्तरंप्राप्तलेखा यदि यथोक्तपूर्वा भविष्यन्ति तर्ह्यागामिन्यङ्के प्रकाशिष्यन्त इति समवधेयम्। * गद्यपद्य लेखेषु सर्वेषु स्वरव्यञ्जनसन्धिः कर्तव्यैव। * अर्थभेदस्थान एव ''अवग्रहः'' कर्तव्यः। * अनुस्वारा-नुनासिकयोर्विकल्पस्थानेऽनुनासिक एव कर्तव्यः, यत्र नित्यानुस्वारस्तत्रानुस्वाकरणे न बाधा। * लेखप्रकाशनेऽप्रकाशने च सम्पादकप्रवराणामेवाधिकारो भविष्यति। * अधुळा येन लेखो लिखितो भवेत् तं प्रार्थयेऽहम् न कदाऽपि ''अज्ञातकर्तृकः'' इति कृत्वा प्रेषणीयो भवेद्। अज्ञात इति प्रयोगः प्राचीनेषु भवत्येव इति ज्ञातव्यम्।

– प्रकाशकः



मम कदा भविष्यति प्रेमगुरुसमकं संयमप्रेम...







# 'श्रीमत्प्रेमसूरीश्वराणां पावनपरिचयः'

* संसारीनाम : श्रीप्रेमचन्दः
* माता–पिता : कङ्कुदेवी–भगवादासः
* जन्म : वि.सं. १९४० फाल्गुणशुक्लः १५, मङ्गळवारः ११/३/१८८४, नान्दिया (राजस्थानः)
* निवासः : पिण्डवाडा, राजस्थानः
* दीक्षा : वि.सं. १९५७ कार्तिककृष्णा ६, १२/११/१९००, सोमवारः, पालीताणा
* गुरुः : सकलागमरहस्यवेदी आचार्यदेवश्रीविजयदानसूरीश्वराः
* गणिपदम् : वि.सं. १९७६, कार्तिककृष्णा ६, १३/११/१९१९ डभोई
* उपाधिः : 'सिद्धान्तमहोदधि' वि.सं. १९७६, महेसाणा
* पंन्यासपदम् : वि.सं. १९८१, कार्तिककृष्णा ६, १७/११/१९२४ अमदावादः
* उपाध्यायपदम् : वि.सं. १९८७, कार्तिककृष्णा ३, ०९/११/१९३० मुम्बापुरिः
* आचार्यपदम् : वि.सं. १९९१, चैत्रशुक्ला १४, १७/०४/१९३५ राधनपुर
* अद्यावधिशिष्य–प्रशिष्याः : ११००
* काळधर्मः : वि.सं. २०२४, वैशाखकृष्णा ११, २२/०५/१९६८ खम्भातः

प्रकाशकम्
जगद्गुरु पू.आ.श्री विजय हीरसूरीश्वरजी श्रुतज्ञानभवनम्
पालडी–अहमदाबाद

Print : Deepak Oswal, Pune.
Ph. 24477791, 9822055891